M-36

PDFSR32

४४

S.K.M. 104/89 (L)

Pages 186

४४

भागवत एकादश स्कंध (सटीक)

पंत्र ~~134~~ 126

समय १८वीं श०

भाषा संस्कृत

ततो द्वाभ्यां मौशलक्रीडे ते वृमेकत्रिंशताध्यायैरेकादशस्कंधस्य प्रवृत्तिः ॥ तस्य व्याख्याम
ति व्याख्यानमारभ्यते ॥ तत्र मौशलप्रसंगात्पूर्वस्कंधार्थमनुवदति श्लोकद्वयेन कृत्वे

श्रीबादरायणिरुवाच ॥ कृत्वा दैत्यवधं कृष्णः सरामो यदु
भिर्वृतः ॥ भुवोवतारयद्भारं जविष्ठं जनयन्कलिं ॥ १ ॥

ति ॥ भुवोवतारयत् भुवोवताराय दिष्ट्य जगमोद्भुतव्ययः यतिसंवेगकारणं अथवा शीघ्रं हिंसा
पर्यवसायिनमित्यर्थः ॥ कलिं कलहम् ॥ १ ॥ श्रीरामो जयति ॥ श्रीराधावल्लभो जयति

भा०१०

एतद्विवरणोगतिः। ये कोपिता इति सपत्नैर्दुर्योधनादिभिः कोपिताः कोपं कारिताः॥ सुबहु अत्यन्तमभवन्तित योवहुवार इत्यर्थः। तद्वारहेतुर्द्यूतं हेलनं कचग्रहणादिभिरिति॥ दुर्घूतं कपटद्यूतं हेलनमवज्ञा कचग्रहणं दुःशासनेन। द्रौपद्याः केशाकर्षणमेतानि प्राप्तियेषां गरदानं जतुगृहदाहादिभिस्तैः कृत्वाये कोपिताः तान्पाण्डुसुतान्निमित्तं कृत्वा इतरेतरतः उभयोः पक्षयोः समवेतानमिलितान्नृपान्हत्वा इति २

यः भारं निरहतजहार। यद्वा एको पिता। येभ्यः को पिता नितरेतरतः। परस्परं निमित्तं कृत्वेत्यन्वयः॥ य तावत्प्रकटं द्वेषाः। एतनाद्यः। तान्स्वयमेव हतवान्। येतु द्वेषाभावाद्दध्वज्ञनानिस्थिताः॥ तान् परस्परं निमित्तं विधाय हिलाभं भारमवाकृतवानित्यर्थः। १ अपि च॥ भारेत्याह भूभारेत्यादि अभवोभार

ये कोपिताः सुबहु पाण्डुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान्। कृत्वा निमित्त मितरेतरतः समेतान्हत्वा नृपान्निरहंसि तिभारमीशः। भूभारराजपृतनायदुभिर्नि रस्यगुप्तैः स्वबाहुभिरचिंतयदप्रमेयः। मन्येवनेर्ननुगतोप्यगतं हि भारं यद्यादवं कुलम होऽविषह्यमास्ते ३

भूभारो राजपृतना राज्ञां पृतना सेनाः राजसैषां पृतनास्त्रितिवा। स्वबाहुभिर्गुप्तैः परिरक्षितैर्यदुभिर्विवा मृता राजपृतनाराज्ञां पृतनासेनाः। राजसैषां पृतनाश्चेतिवा। स्ववाहुभिर्गुप्तैः परिरक्षितैर्यदुभिर्विवा

राम

विहाय दधतिननिरस्य हत्य। वाहुभिरिति वहुवचने वस्तुतश्च बहुत्वेजाभिप्रायेणान्वेवं कृत्स्नः विकीर्यतीति ज्ञात्वा कथं तास्मियादुधतितंत्र हि। अप्रमेयः अप्रमत्तु शावयः चिन्तामाह मन्य इति नन्वि तिवितर्कं पृथ्व्ये ने नमे भरिष्यद्यपि लोकप्रतीत्यागतः। तथाप्यहमत्वमेवमन्येयद्यस्मात्तद्विषह्यं शेष मशाक्यं यादवं कुलमित्यन्येनेवस्ववंशात्तान्स्वयं हननान्नचितमितिसूचितं ३॥ श्रीरामोजय

२

तर्हीदमप्यन्यैर्वार्त्तितं तत्राह । नैवेति । अन्यतः स्वाद्विभोर्विपियात् स्वकुलस्य परिभवस्तिरस्कारो न भवेत् ॥ कुतः
मत्संश्रयस्य मामाश्रयत इति कुलं तेस्य किंच । नितं विभवो न्न हननस्य विभवे गजतुरगादिभिर्ऋद्धिरखलस्य यदा
तर्हीदं किमिति निसंहर्त्तव्यं तत्राह । विभवोन्न हननस्येति तस्मादेवं करिष्यामीत्याह । अतः कलिमिति । शांतिम्
परामुपैमि । वर्त्तमानसामीप्ये वर्त्तमानवद्वा उपेष्यामि तद्दनंतरं धामे चवैकुंठाख्यमपैष्यामी
त्यर्थः ॥ ६ ॥ व्यवसितः स्तनिश्चयः संजनेउपसंहृतवान् । ५ । तद्दैवमवतारप्रयोजनं सर्वं संपाद्य संलोके
जगामेत्याह ॥ श्लोकद्वयेन स्वमूर्त्तीति । लोकानां लावण्यनिर्भुक्तसांगो यया ॥ यामपेक्ष्य लोके मुलावण्य

नैवान्यतः परिभवोस्य भवेत् कथंचिन्मत्संश्रयस्य विभवोन्नहनस्य नित्यम् । अतः कुलिं यदु
कुलस्य विधाय वैरं शांतं वस्यवह्निमिव शांतिमुपैति धाम ॥ ६ ॥ एवं व्यवसितो राजसेतप्स्य
कल्प ईश्वरः ॥ शापव्याजेन विप्राणां संजह्रे स्वकुलं विभुः ॥ ५ ॥ स्वमूर्त्त्या लोकलावण्यनि
र्मुक्त्या लोचनं नृणां ॥ गीर्भिस्ताः स्मरतां चित्तं पदैस्तानीक्षतां क्रियाः ॥ ६ ॥ आच्छिद्य कीर्त्तिं
सुश्लोकां वितत्य ह्यंजसानु कौ ॥ तमोनया तरिष्यंतीत्यगात्स्वंपदमीश्वरः ॥ ७ ॥

स निर्भुक्त स्त्यक्तं यतः । वत्संपर्कात् लोकालावण्यवतो भवंतीत्यर्थः । तया स्वमूर्त्या नृणां लोचनमाच्छिद्याकृष्य ततो
न्यस्य वस्तो कनेलोचनरूपाकृष्टतः । तेयस्व गीर्भिस्ताः गिरः स्मरतां चित्तं चाह च्छिद्य । तथा पदैस्तत्र तत्र कितैस्ता
निपदानि स्तानीक्षमाणानां प्रत्यतेग मनादिकाः । क्रियाश्चाच्छिद्य तत्स्त्रीसर्वेषां चक्षुरादिप्रवृत्ती स्वेकनि
ष्ठाकृतेत्यर्थः । किंच । ए इत उपरिजनिष्यमाणानां संसारतरणाय कायपिवां शोभना श्लोकाः श्लोकाः कवी

भा०१०

न्यब्रह्मण्येभ्योऽप्युदारेभ्यो वान्यसेवकेभ्यो वा विप्राः कुप्यन्ति ब्रह्मतिस्मयसन तथेत्याह । ब्रह्मण्यानामि
त्यादि किं च कृष्णे जातेऽपि कृष्णचेतसां कथमभूत् तं शापं प्राप्तुं रम्भस्तिपर्थः । ८ । अतः स एव सा निमित्तस्य भावा निता
तां पृच्छति । यन्निमित्त इति । एकात्मनामेकचित्तानां कथं भेदः कलहः । ९ । ईश्वरेच्छैवात्र निमित्तमिति परिह
रति । बिभ्रदिति सकलानां सुन्दराणां वस्तूनां सन्निवेशो विन्यासविशेषो यस्मिन् । तत् बिभ्रद्विभ्रत् । तर्हि किम
तिसौन्दर्यादिविषयपरः । न सुमंगलं कर्माचरन् तर्हि किं कृपापि कामनया । न आप्तकामः तर्हि किमिति कर्मा

२

मि

राजोवाच ॥ ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनां । विप्रशापः कथमभूद्वृष्णीनां
कृष्णचेतसां । ८ । यन्निमित्तः स वै शापो यादृशो द्विजसत्तम । कथमेकात्मनां भेद एतत्सर्वं
वदस्व मे । ९ । श्रीशुक उवाच ॥ बिभ्रद्वपुः सकलसुन्दरसन्निवेशं कर्माचरन्भुवि सुमंगल
माप्तकामः । आस्थाय धाम रममाण उदारकीर्त्तिः संहर्त्तुमैच्छत कुलं स्थितकृत्यशेषः । १० ॥

चरति धाम द्वारवत्याख्यं गृहमास्थायेममारणात्कर्म ग्राहयितुमित्यर्थः । ननु किमाप्तकामस्य गृहद्र
त्याकर्मभिर्वा तत्राह उदारकीर्त्तिर्वेदकृत्फलप्रदा कीर्त्तिर्यस्य सः कीर्त्तिवितानार्थमित्यर्थः । एवं परमैश्वर्ये
णावर्त्तमान एव मानस्वकुलं संहर्त्तुमैच्छत् । तत्कस्य हेतोः । स्थितः कृत्यभूमिभारहरणशेषो यस्य सः । १०

राम

३

ईश्वरेच्छया स्थितं ब्रह्मशापनिमित्तं वक्तुमाह कर्म्माणीति । कर्मापेक्षा कृता । कर्म्माणि कृत्वा निसृष्टा मुनयः
पिंडारकं समगमन्निसन्वयः निसृष्टाः प्रस्थापिताः पर्वे कामस्वर्गे । जितं तिचरात्र कर्म्माणि विशिनष्टि
पुण्यनिवहानि सत्कृतिभिः प्रकाशितानि च स्वमेधादिकर्म्मणि पुण्यापुण्यमेव जनयेति । भक्तोपलालनादी
नि तु तत्कालमेव सुखं कुर्वंति प्रायश्चित्तादीनि तु पापमेव हरंति । एतानि तु सर्वतो मुख्यानीत्याह । पुण्यनिवह
निकीर्तिना पुण्यानि निर्वहंति प्रापयंतीति तथा । सुमंगलानि प्रतिसुखात्मकानि गायतो जगतः कलिम

कर्म्माणि पुण्यनिवहानि सुमंगलानि गायज्जगत्कलिमलापहराणि कृत्वा ॥ कालात्मना निव
सता यदुदेवगेहे पिंडारकं समगमन्मुनयो निसृष्टाः ॥ ११ ॥ विश्वामित्रोऽसितः कण्वो दुर्वासा भृगुरं
गिराः कश्यपो वामदेवोऽत्रिर्वशिष्ठो नारदादयः ॥ १२ ॥ क्रीडंतस्तानुपव्रज्य कुमारा यदुनंद
नाः ॥ उपसंगृह्य पप्रच्छुरविनीता विनीतवत् ॥ १३ ॥ ते वेषयित्वा स्त्रीवेषैः सांबं जांबवती
सुतं ॥ एषा पृच्छति वो विप्रा अंतर्वत्न्यसितेक्षणा ॥ १४ ॥ प्रष्टुं विलज्जती साक्षात्प्रब्रूतामोघ
दर्शनाः प्रसोष्यंती पुत्रकामा किंस्वित्संजनयिष्यति ॥ १५ ॥

लापहरणानि कृत्वा मुनिप्रस्थापनेन तु कालात्मना संहाररूपेण । यदुदेवगेहे निवसता स्वकुलं संजिही
र्षता पिंडारकं ततो नातिदूरे तीर्थविशेषं ॥ १२ ॥ उपसंगृह्य पादग्रहणं कृत्वा ॥ १३ ॥ प्रश्नप्रकारमेवाह वेषयेन
ते वेषयित्वेति हे अमोघदर्शनाः विप्राः सर्वज्ञाः अंतर्वत्नी गर्भिणी ॥ १४ ॥ न तु युष्मान्साक्षात्प्रष्टुं विलज्जती लज्जा

भा०ए० प्रलब्धावंचिताः १६ तस्मिन्नुदरे अयस्मयं लोहमयं १७ मंदभाग्यैरस्माभिः किमेतत् कृतं तेन ततः अस्मा
न्किंवदिष्यंतीति विह्वलिताः संतो मुशलमादाय गृहान्ययुः १८ राज्ञे उग्रसेनाय न तु श्रीकृष्णाय १९
२० आहुकः उग्रसेनः सोपि श्रीकृष्णमपृष्ट्वैव प्रासक्षिपत् प्रक्षिप्तवान् अस्य मुशलस्य चूर्णीकृत्य मा

६

एवंप्रलब्धामुनयस्तानूचुःकुपितानृप । जनयिष्यतिवोमंदामुसलंकुलनाशनं १६ तच्छ्रुत्वातेति
संत्रस्ताविमुच्यासहसोदरं । सांबस्यददृशुस्तस्मिन्मुसलंखल्वयस्मयं १७ किंकृतंमंदभाग्यैर्नःकिंव
दिष्यंतिनोजनाः । इतिविह्वलितागेहानादायमुसलंययुः १८ तच्चोपनीयसदसिपरिम्लानमु
खश्रियः । राज्ञआवेदयांचक्रुःसर्वयादवसंनिधौ १९ श्रुत्वामोघंविप्रशापंदृष्ट्वाचमुसलंनृप ।
विस्मिताभयसंत्रस्ताबभूवुर्द्वारकौकसः । २० तच्चूर्णयित्वामुसलंयदुराजसआहुकः । समुद्रस
लिलेप्रास्यल्लोहंचास्यावशेषितं २१ कश्चिन्मत्स्योग्रसील्लोहंचूर्णानितरलैस्ततः । उह्यमा
नानिवेलायांलग्नान्यासन्किलैरकाः । २२ मत्स्योगृहीतोमत्स्यघ्नैर्जालेनान्यैःसहार्णवे । तस्यो
दरगतंलोहंसशल्येलुब्धकोकरोत् । २३ भगवान्ज्ञातसर्वार्थईश्वरोपितदन्यथा । कर्तुंनैच्छ
द्विप्रशापंकालरूप्यन्वमोदत । २४ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेप्रथमोध्यायः

पटेरेरकः
कौ:३

रामराम
राम
६

शल्ये शराग्रे २३ ज्ञाताः
शास्य विशेषितं लोहं च प्रास्यन् २१ तरलैस्तरंगैः २२ अन्यैर्मत्स्यैः सह
सर्वार्था येन सः ईश्वरोपि समर्थोपि सन् अन्यथा कर्तुं नैच्छत् किंतु मोदयत कालरूपी २४ इतिश्री

द्वितीयेनिमिजायंतसंवादेनाहनारद॥ धर्मान्भागवतान्तावसुदेवायपृच्छते॥१॥ अभीत्सांप्रस्थापितोपिपु
नःपुनरवात्सीदित्यर्थः। नन्वेनारदस्यदक्षादिशापात्तैकत्रवासः। संभवइत्याशंक्याहगोविंदभुजगुप्तायामिति न
दासंगशापपरिभावइत्यर्थः। कृष्णोपासनेलालसाऽत्यौत्सुक्यंयस्यसः॥१॥ यद्भजनेमेकानामपिदृष्टमोलक्षं
तं कोनुनामनभजेदित्याह कोन्विति इंद्रियवानिति इंद्रियवानितिइंद्रियवानितिश्रीयवश्यमात्रमचयन्त्रा
धिकारिविशेषणानित्यर्थः। सर्वतः सर्वेभ्यःब्रह्मलोकेषुमृत्युर्यस्यसः॥२॥ अथपूजितोपित्रागमनपत्तानाख

श्रीशुकउवाच॥ गोविंदभुजगुप्तायांद्वारवत्यांकुरूद्वह॥ अवात्सीन्नारदोभीक्ष्णांकृष्णोपा
सनलालसः॥१॥ कोनुराजन्निंद्रियवान्मुकुंदचरणांबुजं॥ नभजेत्सर्वतोमृत्युरुपास्यमम
रोत्तमैः॥२॥ तमेकदातुदेवर्षिंवसुदेवोगृहागतं॥ अर्चितंसुखमासीनमभिवाद्येदमब्रवीत॥३॥
वसुदेवउवाच॥ भगवन्भवतोयात्रास्वस्तयेसर्वदेहिनां॥ कृपणानांयथापित्रोरुत्त
मश्लोकवर्त्मनां॥४॥ भूतानांदेवचरितंदुःखायचसुखायच॥ सुखायैवहिसाधूनांत्वादृ
शामच्युतात्मनां॥५॥ भजंतियेयथादेवान्देवाअपितथैवतान्॥ छायेवकर्मसचिवाःसाधवोदीन

वत्सलाः॥६॥ ...

सयेमंगलायपथाचउत्तमश्लोकस्यसर्वभूतानामहतांयात्राऽऽकृपणानांस्वस्तये। तथाभगवद्रूपसभ
तयेमंगलायपथाचउत्तमश्लोकस्यसर्वभूतानामहितंयात्राऽऽगमनमनुचितमित्याह भूतानामिति देवानांचरितमित्ति
वतोयात्रासर्वदेहिनांस्वस्तयइति॥४॥ देवैरपिसहत्वामनमनुचितमित्याह॥ भूतानामितिदेवानांचरितमित्ति
नकृपादिनाभूतानांदुःखायापिभवतीतित्वादृशांत्वयादृशानांअच्युतेअच्युतात्मायेषांतेषां॥५॥ किंचसुखंकुर्वतो

भा०ए०
५

तस्यैव पि भगवत आगमनं मम भाग्याव स्वयं भूतार्थोस्तथा पि पृच्छामः ।तवेति। तव्येर्धर्मैः प्रसन्नो भगवा
न् तानि सर्वं ।७। ननु त्वत्तोपि किमन्यो भगवत्प्रसादस्यान्नमसि तत्राह ।अहं किलेति ८ वि प्रजार्थी पर जाय पु
त्र लाभ प्रयोजनः ।संपूजितवान्। कीर्ततिस्तनीं ग्रहे भगवंतमनुस्मरति ।९ अतो यथा मज्जे मत्स्थियानोस्मा
न् साधि शिक्षय विचित्राणि व्यसनानि यस्मिन् तस्मात् संसारात् तथाविश्वतः सर्वतो भयं यस्मिन् तस्मा

अथापि पृच्छामो धर्मान् भागवतांस्तव ॥ यान् श्रुत्वा श्रद्धया मर्त्यो मुच्यते विश्वतो भयात् ॥७॥
अहं किल पुरानंतं प्रजार्थो भुवि मुक्तिदं ॥ अपूजयन्नमोक्षाय मोहितो देवमायया ॥८॥ यथा
विचित्रव्यसनाद्भवद्भिर्विश्वतो भयात् ॥ मुच्येम ह्यंजसैवाद्धा तथा नः साधि सुव्रत ॥९॥ श्रीशुक
उवाच ॥ राजन्नेवं कृतप्रश्नो वसुदेवेन धीमता ॥ प्रीतस्तमाह देवर्षिर्हरेः संस्मारितो गुणैः
१०॥ श्रीनारद उवाच ॥ सम्यगेतद्व्यवसितं भवता सात्वतर्षभ ॥ यत्पृच्छसे भागवतान् धर्मांस्त्वं
विश्वभावनान् ॥११॥ श्रुतोनुपठितो ध्यात आदृतो वानुमोदितः ॥ सद्यः पुनाति सद्धर्मो देव
विश्वद्रुहोपि हि ॥१२॥

तस्मादञ्जसा हितुभूते अंजसच्छ्रनयासेन अद्धा साक्षात् ८ हरेर्गुणैर्वर्णनीयतेन प्रसन्नतेहिरिसंस्मारितमि
त्यर्थः प्रतीति मा विः कुरो तिसम्यगिति त्रिभिः यत्पृच्छसे पृच्छसि विश्वभावनान्सर्वशोधकान् ११ श्रु
तः प्रतिवचनेन गृहीतः अनुमोदितः परैः क्रियमाणः संस्तुतः स धर्मो भागवतो धर्मः देवहेवसदे

राम
५

किंच तयामहन्नुपकारःकृतइत्याह। त्वयेति। भ्रोपश्रवणंकीर्त्तनंयस्यसः १३ अत्रापिभगवद्धर्म्मनिरूपयिवि
मेदेहस्यजनकस्यश्रार्षभाणांपामुत्पत्तिसान्वयंविविच्यकथयतिसप्तभिः प्रियव्रतइति १४ मोक्षधर्मेविव
त्तस्यापिगेहिधर्मप्रवर्त्तनिछयाप्रवर्तीरंविवासुदेवांशमाहः। तस्यचवैश्पारगंसुतसत्तमासीत् १५ तेषां
प्रथमसुतानांमध्येनयोगेश्वराणांचरितवक्तुंमितरेषांचरितंततोविप्रित्याह। तेषामिति। एतश्चजनाभ
नामवर्षंजस्यनाम्नाभारतमित्यङ्कृतंविख्यातमासीत् ॥ एतेनतस्यधर्मेतिरेकोनिरूपितः ॥ १७ इमांछन्दी

त्वयापरमकल्याणः पुण्यश्रवणकीर्त्तनः ॥ स्मारितोभगवानद्यदेवोनारायणोमम ॥ १३ ॥ अत्राप्युदाहरंतीममितिहासंपुरातनं ॥ आर्षभाणांचसंवादंविदेहस्यमहात्मनः ॥ १४ ॥ प्रियव्रतोनामसुतोमनोःस्वायंभुवस्ययः ॥ तस्याग्नीध्रस्ततोनाभिऋषभस्तत्सुतःस्मृतः ॥ १५ ॥ तमाहुर्वासुदेवांशंमोक्षधर्मविवक्षया ॥ अवतीर्णंसुतशतंतस्यासीद्वेदपारगं ॥ १६ ॥ तेषांतुभरतोज्येष्ठोनारायणपरायणः ॥ विख्यातंवर्षमेतद्यन्नाम्नाभारतमद्भुतं ॥ १७ ॥ सभुक्तभोगांत्यक्त्वेमांनिर्गतस्तपसाहरिं ॥ उपासीनस्तत्पदवीलेभेवैजन्मभिस्त्रिभिः ॥ १८ ॥ तेषांनवनवद्वीपपतयोस्यसमंततः ॥ कर्मतंत्रप्रणेतारएकाशीतिर्द्विजातयः ॥ १९ ॥ नवाभवन्महाभागामुनयोह्यर्थशंसिनः ॥ श्रवणावातरसनाआत्मविद्याविशारदाः ॥ २० ॥

गृहान्निर्गतःहरिमुपासीनःसेवमानःसन् १८ नवसुताःनवद्वीपपतयः नवानांद्वीपानांवर्षाणांदिक्षुखंडेषुनात
पतयः अस्यभारतवर्षस्यएकाशीतिसुताः कर्ममार्गप्रवर्त्तकाः ब्राह्मणाअभवन् १९ अर्थशंसिनः

परमार्थनिरूपकाः श्रवणाः श्रमवंतः विश्रामाप्या सेद्धतः श्रमाद्यपर्थः वातरसनाः दिगंबराः आत्मविद्यायांविशारदाः निस्नातः २०

भा०ए०
६

तेषां परमहंसस्य चरितश्रावणाभ्यां तरतइति ॥ भगवद्रूपं विश्वं पश्यंतः सदसदात्मकं स्थूलसूक्ष्मरूपं तच्चात्म
व्यतिरेकेण पश्यंतः ॥२२॥ अव्याहता अप्रतिहता इष्टा अभिप्रेता गतिर्येषां ते ॥ मुक्ता अव्यासक्ताः ॥२३॥ महात्म
नो निमेः वितायमाने अनुष्ठीयमाने अजनाभे भारतवर्षे ॥२४॥ यजमाने निमिः अग्नयः आहवनीयादयः

कविर्हविरंतरीक्षः प्रबुद्धः पिप्पलायनः ॥ आविर्होत्रोथ द्रुमिलश्चमसः करभाजनः ॥२१॥ तए
ते भगवद्रूपं विश्वं सदसदात्मकं ॥ आत्मनोव्यतिरेकेण पश्यंतोव्यचरन्महीं ॥२२॥ अव्याहते
ष्टगतयः सुरसिद्धसाध्यगंधर्वयक्षनरकिंनरनागलोकान् ॥ मुक्ताश्चरंतिमुनिचारणभू
तनाथविद्याधरद्विजगवां भुवनानिकामं ॥२३॥ तएकदानिमेः सत्रमुपजग्मुर्यदृच्छया
वितायमानमृषिभिरजनाभेमहात्मनः ॥२४॥ तान्दृष्ट्वासूर्यसंकाशान्महाभागवतान्
नृप ॥ यजमानोग्नयोविप्राः सर्वएवोपतस्थिरे ॥२५॥ विदेहस्तानभिप्रेत्यनारायण
परायणान् ॥ प्रीतः संपूजयांचक्रेआसनस्थान्यथार्हतः ॥२६॥ तान्रोचमानान्स्वरुचा
ब्रह्मपुत्रोपमान्नव ॥ पप्रच्छपरमप्रीतः प्रश्रयावनतोनृपः ॥२७॥ विदेहउवाच ॥
मन्येभगवतः साक्षात्पार्षदान्वोमधुद्विषः ॥ विष्णोर्भूतानिलोकानांपावनायचरंति

चित्रांज्ञातिविज्ञाद्यः ॥२५॥ अभिप्रेत्य ज्ञात्वा ॥२६॥ स्वरुचैव रोचमानान् ॥ नत्वाभरणादिप्रकाशैः ब्रह्मपुत्रो
पमान् सनत्कुमारादिसदृशान् ॥२७॥ परमप्रीत्या तद्दर्शनानिनं दृतिहाभ्यां मन्ये इति ननु भगवतः

राम०
६

मनुष्यदुर्लभं लब्ध्वा भगवत्प्राप्त्युपायं दुर्लभमिति वदन्तोऽस्माभिः भवंति येषां । देहिनो जीवास्तेषां क्षणभंगुरेपि मानु
षो देहो दुर्लभः परमपुरुषार्थसाधनत्वात् वैकुंठप्रियो येषां ते वैकुंठस्य वा प्रियास्तेषां दर्शनं ॥२९॥ अत्र
नघा निरवद्या भवतो युष्मानात्यंतिकं क्षेमं पृच्छामः । यतः क्षणार्धकलमात्रोपि सत्संगः शेवधिर्निधिः
निधिलाभे यथानंदो भवेत् तथा परमानंद इत्यर्थः ॥३०॥ तदर्थं च भागवतान् धर्मान् ब्रूत यदि नोऽस्माकं

दुर्लभो मानुषो देहो देहिनां क्षणभंगुरः । तत्रापि दुर्लभं मन्ये वैकुंठप्रियदर्शनं ॥२९॥
अत आत्यंतिकं क्षेमं पृच्छामो भवतोऽनघाः । संसारेऽस्मिन् क्षणार्द्धोपि सत्संगः शे
वधिर्नृणां ॥३०॥ धर्मान् भागवतान् ब्रूत यदि नः श्रुतये क्षमं ॥ यैः प्रसन्नः प्रपन्नाय दा
स्यत्यात्मानमप्यजः ॥३१॥ ॥ नारद उवाच ॥ एवं ते निमिना पृष्टा वसुदेव महत्तमाः
प्रतिपूज्याब्रुवन् प्रीत्या ससदस्यर्त्विजं नृपं ॥३२॥ श्रीरामो जयति ०

श्रुतये श्रवणाय क्षमं योग्यं भवति कथंभूतान् यैर्धर्मैः प्रपन्नाय भक्ताय अजो हरिः आत्मानमपि दास्य
[illegible] भगवद्धर्मश्रवणपरास्त्वभवन्नित्यर्थः भगवद्धर्मं तत्र
लितान् ३१ ससदस्यैः ऋत्विग्भिश्च वर्तमानं तेऽपि भगवद्धर्मश्रवणपरा [illegible]
तानाय यतन तरणोनि [illegible] ब्रह्मकर्मावतारेहीभक्त्वा प्राप्य युगक्रमात् ज्ञात्वा क्रमेणाकृतवान् नव प्रश्नानि
नृपं कौतुकेनासेत्तरं प्रेक्ष्य [illegible] कविर्मुख्या मुनीश्वराः ३३ श्रीरामो जयति श्रीराम रामो रामो ०

भा०११०

प्रथममात्यंतिकं क्षेमं पृच्छतीति । मन्य इति ॥ अकुतश्चिन्न यस्मात्तदकुतश्चिद्भयं अत्र संसारे असदात्मभावात् असति देहादावात्मभावनात् नित्यं सर्वदा उद्विग्नबुद्धेः विश्वात्मना सर्वथा निरस्तं यत्र पादांबुजोपासने भीर्निवर्त्तते तत् ३३ भागवतधर्मलक्षणं तानाह । ये वै इति मन्वादिमुखेन नरार्णाश्रमादिधर्मान् उक्त्वा तिरहंसत्वात् स्वमुखेनैव भगवताविदुषामपि पुंसामंजः सुखेनैवा त्मलब्धये ये वै उपायाः प्रोक्ताः । तान् भागवतान् धर्मान् विद्धि ३४ अनेनः पदेनोक्तं सुखकरं तं वि

७

कविरुवाच ॥ मन्येऽकुतश्चिद्भयमच्युतस्य पादांबुजोपासनमत्र नित्यं । उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मना यत्र निवर्त्तते भीः ३३ ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये । अंजः पुंसामविदुषां विद्धि भागवतान् हि तान् ३४ यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित् । धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ३५

२ तु

वृणोति यानिति यानास्थायाश्रित्य योगादिष्विव न प्रमाद्येत विघ्नैर्न विहन्येत । निमील्य नेत्रे धा वन्नपि इहैतेषु भागवतधर्मेषु न स्खलेत् । निमीलनं नामाज्ञानं यथाहुः श्रुतिस्मृती उभे नेत्रे विप्रा णां परिकीर्तिते । एकेन विकलः काणो द्वाभ्यामंधः प्रकीर्तितः । अज्ञात्वापि तत्पर्थः । यथा पदन्यासस्थान मतिक्रम्य शीघ्रं परतः पदन्यासेन गतिर्धावनं तद्वच्छास्त्रापि विधिविं किंचिदतिक्रम्य प्रतिशीघ्रमनु

७

ननुकृतेभागवतधर्माःईश्वरार्पितसर्वकर्माण्यपीत्याह॥ कायेनेति॥ आत्मना चित्तेनाहंकारेणवा॥ अनु
सृतोयःस्वभावस्तस्मात् अयमर्थः नकेवलंविधितः कृतमेवेति नियमः॥ स्वभावानुसारि लौकिकमपि
॥ तथाचभगवद्गीतासु॥ यत्करोषियदश्नासिजुहोषिददासियत् यत्तपस्यसिकौंतेयतत्कुरुष्वमद
र्पणमिति॥ वद्य॥ ननुकायादीनामेवकर्मनामत्वमित्याशंक्याह आत्मासेनानुसृतात् ब्राह्मणादित्यादि
स्वभावाद्यत्करोतीत्यर्थः तत्सकलंपरस्मैनारायणायेतिसमर्पयेत॥ तथासतिसकलमपिकर्मभाग
वतोधर्मोभवतीतिभावः॥ ३६॥ ननुकिमेवंपरमेश्वरभजनेनब्रह्मज्ञानकल्पितत्वयस्यज्ञानेकनिवर्त्य

कायेनवाचामनसेंद्रियैर्वाबुद्ध्यात्मनावानुसृतस्वभावात॥ करोतियद्यत्सकलंप
रस्मैनारायणायेतिसमर्पयेत्तत्॥ ३६॥ भयंद्वितीयाभिनिवेशतःस्यादीशादपेतस्यवि
पर्ययोस्मृतिः॥ तन्माययातोबुधआभजेत्तंभक्त्यैकयेशंगुरुदेवतात्मा॥ ३७॥ श्रीरामोजयति

त्वादित्याशंक्याह॥ भयमिति॥ यतोभयंतन्माययाभवेत् अतोबुद्धिमांस्तमेवाभजेत् ननुभ
यंद्वैताद्यभिमानाभिनिवेशतोभवति॥ ईशाद्विमुखस्यतन्माययास्मृतिः॥ भगवत्स्वरूपास्फूर्त्तिस्ततोविपर्ययोदे
होस्मीति॥ ततोद्वितीयाभिनिवेशाद्भयंभवति॥ एवंहिप्रसिद्धंलौकिकीष्वपिमायासु॥ उक्तंचभागवता
दैवीह्येषागुणमयीममामायादुरत्यया॥ मामेवयेप्रपद्यंतेमायामेतांतरंतिते इति॥ एकयाअव्यभिचारिण्या
भक्त्याभजेत॥ किंच॥ गुरुरेवदेवतात्मागुरुर्देवएवताईश्वरः॥ आत्माप्रेष्ठश्चयस्यतथादृष्टिःसन्नित्यर्थः॥ ३७॥

भा॰ ए॰ नतद्विषयविलिंगस्य कुतो व्यभिचारादिरूपभक्तिः संभवति कुतस्तरामभयं तत्र न तावद्विषयो नाम तत्त्वतो

१ स्ति किंतु मनोविलसितमात्रं अतो मनोनियमनेन भजनादभयं स्यादित्याह ॥ अविद्यमानोपीति द्वयः दे

तः प्रपंचः ध्यातुः पुंसः धिया मनसा स्वप्नमनोरथवत् अवभातीत्यर्थः ॥ तत्तस्मात्कर्माणि संकल्पयति विकल्पयति च यन्म

नस्तन्निरुंध्यात् नियच्छेत् ततश्च कथा न तस्मात् भजनादभयं स्यादित्यर्थः ॥ ३८ ॥ एतत्पत्याशंक्याभिमत्याशं

का सुगममार्गमाह ॥ शृण्वन्निति तदर्थकानि जन्मकर्माणि अर्थोपि येषां तानि एतान्यपि सा कल्ये

अविद्यमानेऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा ॥ तत्कर्मसंकल्पवि

पोरं कल्पकं मनो बुधो निरुंध्यादभयं ततः स्यात् ॥ ३८ ॥ शृण्वन्सुभद्राणि रथांगपाणेर्जन्मानि

कर्माणि च यानि लोके ॥ गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसंगः ॥ ३९ ॥

एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ॥ हसत्यथो रोदिति रौति गायत्युन्माद रोतिर

न्नृत्यति लोकबाह्यः ॥ ४० ॥

न ज्ञानं न शंका नीत्यर्थः ॥ यानि लोके गीतानि प्रसिद्धानि शृण्वन् गायंश्च विचरेत् असंगो निस्पृहः

३९ ॥ संप्राप्तप्रेमलक्षणभक्तियोगस्य संसारधर्मातीतां गतिमाह ॥ एवंव्रतः एवं यस्य सः ॥ स्वप्रियस्य हरेर्ना एम

मकीर्त्या जातो अनुरागः प्रेम यस्य सः अतएव द्रुतचित्तः अवशः कदाचिद्भक्तिपरतंत्रितभगवंतमाकल

य्य हसति ॥ एतावंतं कालं न प्राप्तोस्मीति रोदिति ॥ अयं साक्षात्स्फुरतीति क्रोशति प्राप्तिहर्षेण गायति

जितमिति नृत्यति किं राम भक्तिं वत्तारान्प्रति प्रतारयितुं ॥ न उन्मादवत् ग्रहगृहीतवत् लोकबाह्यो विवशः ॥ ४० ॥

किंचत्वमिति सत्त्वानि भूतान्याकाशादीनि यत्किंचिद्रूपं तन्मात्रं हरेः शरीरमिति मत्वा प्रणमेदेतत् संभावनायां लिङ् ४१ ननु चेयमारूढयोगिनामपि बहुजन्मदुर्लभा गतिः कथं नामकीर्तनमात्रेण कस्मिन्नेव जन्मनि भवेदित्याशंक्य सदृष्टांतमाह भक्तिरिति प्रपद्यमानस्य हरिं भजतः पुंसः भक्तिः प्रेमलक्षणा परेशानुभवः भगवद्रूपस्फूर्तिः तया निर्वृतस्य ततोन्यत्र गृहादिषु विरक्तिरित्येष त्रिकः। कालभजनसमकाल एव स्यात् यथाश्नतो भुंजानस्य तुष्टिः सुखं। पुष्टिरुदरभरणं। क्षुन्निवृत्तिश्च प्रतिग्रासं स्युः उपलक्षणमेतत्

खंवायुमग्निंसलिलंमहींचज्योतींषिसत्वानिदिशोद्रुमादीन्॥ सरित्समुद्रांश्च हरेः शरीरं यत्किंचिद्भूतं प्रणमेदनन्यः॥४१॥ भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः॥ प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोनुघासं॥४२॥ इत्यच्युतांघ्रिं भजतोनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः॥ भवंति वै भागवतस्य राजंस्ततः परां शांतिमुपैति साक्षात्॥४३॥ राजोवाच॥ अथ भागवतं ब्रूत यद्धर्मो यादृशो नृणां॥ यथाचरति यद्ब्रूते यैर्लिंगैर्भगवत्प्रियः॥४४॥ एम· श्रीरामोजयति

प्रतिसिक्थमपि यथा स्युः तद्वत् एवमेकैकस्मिन् भजने किंचित्प्रेमादित्रिके जायमाने तु बहु भजतः परमप्रेमादि जायते बहुग्राससमो जिनं परमतुष्ट्यादि ४२ ततश्च भगवत्प्रसादेन कृतार्थो भवतीत्याह इत्यच्युतांघ्रिं ४३ भागवतस्य भवंतीत्युक्ते तस्य लक्षणं पृच्छति अथेति यद्धर्मः यस्मिन् धर्मे परनि

भा०ए०
८

याद्दशमेरित्यस्योत्तरमाह सर्वभूतेष्विति आत्मनः स्वस्य सर्वभूतेषु ब्रह्मभावेन समन्वयं यः पश्येत् तथा ब्रह्मात्मकं आत्मन्यधिष्ठाने भूतानि च यः पश्येत् । यद्वा । आत्मत्वाच्च मातृत्वात् हृत्स्थ हि परमो हरिरिति तत्रोक्तेः आत्मनो हरेरैश्वर्यं भूतेषु मशकादिष्वपि नियन्तृत्वेन वर्त्तमानस्य भगवद्भावं निरतिशयैश्वर्यमेव यः । पश्येत् । न तु तस्य तारतम्यं तथा आत्मनि हरावेव भूतानि च पश्येत् कथं भूतेषु गतिरूप्र भूतैश्वर्यादिरूपे न पुनर्जडमलिनभूताश्रयत्वेन जाड्यादिरूपसत्ता ऐश्वर्यादिरूपच्युतं पश्येत् स सर्वत्रापरिच्छिन्नभगवत्तत्त्वं प्रपन्नो भागवतोत्तम इत्यर्थः । ४५ प्रेम च मैत्री च कृपा च उपेक्षा च ता ईश्वरादिषु

हरिरुवाच ॥ सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ॥ भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥ ४५ ॥ ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ॥ प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥ ४६ ॥ अर्चायामेव हरये पूजां यः श्रद्धयेहते ॥ न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥ ४७ ॥ गृहीत्वापीन्द्रियैरर्थान्यो न द्वेष्टि न हृष्यति ॥ विष्णोर्मायामिदं पश्यन्स वै भागवतोत्तमः ॥ ४८ ॥

चतुर्विधं करोति स मध्यमो भागवतः ॥ एवंभूतस्य भेदस्य दर्शनात् ॥ ४६ ॥ अर्चायां प्रतिमायां पूजामीहते करोति न तद्भक्तेषु अन्येषु च भूतेषु तरां न करोति ॥ प्रकृतिप्रारंभः अधुनैव प्रारब्धभक्तिः ॥ शनैः शनैरुत्तमो भविष्यतीत्यर्थः । ४७ पुनरपि त्रिभिः श्लोकैरुत्तमभागवतस्यैव लक्षणान्याह गृहीत्वेति श्रीवासुदेवाविष्टचित्तो न द्वेष्टि न हृष्यतीति तावद्विन्द्रियैरर्थान् गृहीत्वापीत्यपिशब्दार्थः । इदं विश्वं ४८

राम
८

किंच देहादीनां संसारधर्म्मैर्जन्माप्ययादिभिर्यो हरेः स्मृत्या विमुह्यमानः तत्र देहस्य जन्माप्ययौ । प्राण
स्य क्षुत् मनसो भयं बुद्धेस्तर्षः । तस्मादिन्द्रियाणां कृच्छ्रं श्रमः ते ॥४८॥ कामश्च कर्माणि च बीजानि च वासनाः
तेषां वासुदेव एको निलयः आश्रयो यस्य सः । एतेन गृहीत्वापि पापस्थानेन कर्मयोग्येन देहस्य मोहकामादि इह
तत्र करतीति यथा वर्तते स्मिन् सेन्न रमतेः ॥५०॥ ये लिंगैर्भगवति स्पृहयस्य सन्तं रमाह ॥ नयस्येति जन्मकुल
कर्म तपश्च आदिजातयः अनुलोम प्रतिलोमजाः ॥ मूर्द्धावसिक्ताद्यः ॥ अस्मिन् देहे अहंकाररहितः
स तु कुलकर्मादिलिंगैर्हरेः प्रियो भवतीत्यर्थः ॥५१॥ वित्ते स्वीयं परकीयमिति ॥५२॥ किंच त्रिभुवन

देहेन्द्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ॥ संसारधर्मैरविमुह्यमानः
स्मृत्या हरेर्भागवतप्रधानः ॥४८॥ न कामकर्मबीजानां यस्य चेतसि संभवः ॥ वासुदेवैक
निलयः स वै भागवतोत्तमः ॥५०॥ न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः सज्जते
स्मिन्नहंभावो देहे वै स हरेः प्रियः ॥५१॥ न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा ॥ सर्वभू
तसमः शान्तः स वै भागवतोत्तमः ॥५२॥ त्रिभुवनविभवहेतवेप्यकुंठस्मृतिरजितात्मसुरा
दिभिर्विमृग्यात् ॥ न चलति भगवत्पदारविंदाल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः ॥५३॥ प॰ १

त्रिभवहेतवे त्रैलोक्यराज्यार्थमपि लवार्द्धमपि भागवत्पदारविंदभजनाद्यो न चलति स वैष्णवाग्र्यः ।
न तु लवार्द्धमात्रं भजनोपरमो चेन्नाम कालो भवेत् । तत्कुतो न चलेत्तत्राह अकुंठस्मृतिः भगवत्पदतो
मत्तो रन्नास्तीत्येवं तत्पादपंकजं प्रपन्न प्रगतैः महर्षिर्यः स्पर्शः । भगवत्पादारविन्दत्सारं नास्तीति कुतः अत

अप्यपिचं विषयाभिसंधिनाचलनं कामेनेतिसंतापेसतिभवेत सतु भगवत्सेवनिर्वृत्तेसंभवतीत्याह भगवतइति उरुविक्रमोभ्रुवतोऽघ्रीवनयो: शाखाङ्गुलय: तासुनखानिचन्द्राणि मनयष्चतेषांचं द्रिका शीतलाहीति सायानिरस्त: कामादितापोयस्मिन् तस्मिन्नुपसीदतोभजतो हृदिकथपुन: सतापःप्रभवति चंद्रेउदितेसति अर्कस्यतापइवनयस्यस्व: ॥ परइत्यादिनाश्लोकत्रयेरणयाद्दशाख्यस्यान्तरमुक्तं वेदितव्यं ॥ यद्वृत्तेइत्यस्य हरिनामानीतिज्ञातव्यं ॥ प॰ ॥ उक्त: समस्तलक्षणसारमाह विसृजतीति

भगवत्उरुविक्रमांघ्रिशाखानखमरीचंद्रिकयानिरस्ततापे ॥ हृदिकथमुपसीदतां

पुन: संभवतिचंद्रइवोदितेऽर्कतापः ॥ ५४ ॥ विसृजति हृदयंनयस्यसाक्षाद्धरिरवशाभि हितोप्यघोघनाशः ॥ प्रणयरशनयाधृतांघ्रिपद्म: सभवतिभागवतप्रधानउक्त: ॥ ५५ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेनारदवसुदेवसंवादेद्वितीयोध्याय: २ राजो वाच ॥ परस्यविष्णोरीशस्यमायिनामपिमोहिनीं ॥ मायांवेदितुमिच्छामिभगवंतोब्रुवंतुन: १

हरिरेवस्वयंसाक्षाद्यस्यहृदयंनविसृजतिनमुंचति ॥ कथंभूत: अवशेनापिअभिहितोमात्रोपिअघौघं नाशयतियः सः ॥ तत्किंन्नापिविसृजतियत: प्रणयरशनयाधृतंहृदयेनिबद्धंअंघ्रिपद्मंयस्य सः भागवतप्रधानउक्तोभवति ॥ इतिएकादशेटीकायांद्वितीयः ॥ २ ॥ मयातत्तनरणब्रह्मकर्मप्र श्नचतुष्टयं ततीयेत्रन्तरंस्तमार्षभैर्निमिः ५ पर॥ १ विष्णोर्मायादिदंपश्यन्तिचतेप्रतोमायां पेक्षतिपरस्येति ॥ हेभगवंत: ॥ १ ॥

भवन्तः कृतार्थो भागवतो भवता कृतार्थः स्वामिन्नित्युक्ते प्रश्ने अतः प्राह ॥ नानुतृप्य इति संसारतापैर्नितरां तप्तो
हतस्य तत्तापस्य भेषजं हरिकथामृतरूपं युष्मद्वचो जुषमाणो नानुतृप्यामि ॥२॥ मायायाः स्वरूपतो निरूपणा
संभवात्स्वकार्यद्वारेण निरूपयितुमाह ॥ एभिरिति आद्यः पुरुषोयपाश्च भूतानां प्राणिनां आत्मकारण
भूतः एभिः स्वसृष्टैर्महाभूतैरुच्चावचानि भूतानि ससर्ज एषा माया भगवत इति चरमश्लोकपादस्य
प्रतिश्लोकमनुषंगः किमर्थं ससर्ज स्वमात्रात्मप्रसिद्धये । स्वं मिमीते । यउपास्ते सः स्वमा तात्मात्म

नानुतृप्ये जुषन्युष्मद्वचो हरिकथामृतं ॥ संसारतापनिस्तप्तो मर्त्यस्तत्तापभेषजं ॥२॥
अंतरिक्ष उवाच ॥ एभिर्भूतानि भूतात्मा महाभूतैर्महाभुज ॥ ससर्जोच्चावचान्याद्यः
स्वमात्रात्मप्रसिद्धये ॥३॥ एवं सृष्टानि भूतानि प्रविष्टः पंचधातुभिः ॥ एकधा दशधा
त्मानं विभजञ्जुषते गुणान् ॥४॥

नो जीवस्य प्रसृष्टाये सिद्धयो यद्वा स्वांशभूतानां जीवानां मात्राप्रसिद्धये विषयभोगाय आ
त्मप्रसिद्धये मोक्षाय च ससर्ज तदुक्तं वेदस्तुतौ बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः मात्रार्थं च
भवार्थं चात्मने कल्पनाय चेति ३ एवं जीवोपकरणार्थं पंचधातुभिर्महाभूतैः सृष्टानि भूतानि अंतर्या
मिरूपेण प्रविष्टः एकधा मनसा दशधा वा इंद्रियरूपेण आत्मानं विभजन्गुणान् तत्तद्विषयान्
जुषते प्रीयत इत्यर्थः ४

भा०द्वा० ११

सजीवः । आत्मनात्मप्रतर्कभिना प्रद्योतितैर्गुणैरिन्द्रियैर्गुणान्विषयान्भुंजान इदं सृष्टं शरीरमात्मानमहं एव इति मन्यमान इह शरीरे सज्जत एव संसरतीत्याह ५ कर्मभिः कर्मेन्द्रियैः सनिमित्तानि सवासनानि कर्माणि कुर्वन् सुखेतरं दुःखात्मकं कर्मफलं । ६ कियंतं कालं भ्रमतीत्याह बह्वभद्राणि वहंतीति तथा ताः सर्गप्रलयेषु पतितमरणं ७ इयं मायामयी सृष्टिर्भगवत्प्रलयं दर्शयितुमारभते । धातूनां नाम महाभूतानामपप्लवे नाशे

गुणैर्गुणान्स भुंजान आत्मप्रद्योतितैः प्रभुः ॥ मन्यमान इदं सृष्टमात्मानमिह सज्जते ॥ ५ ॥ कर्मणि कर्मभिः कुर्वन् सनिमित्तानि देहभृत् ॥ तत्तत्कर्मफलं गृह्णन्भ्रमतीह सुखेतरं ॥ ६ ॥ इत्थं कर्मगतीर्गच्छन्बह्वभद्रवहाः पुमान् ॥ आभूतसंप्लवात्सर्गप्रलयावश्नुते वशः ॥ ७ ॥ धातूपप्लव आसन्ने व्यक्तं द्रव्यगुणात्मकं ॥ अनादिनिधनः कालो ह्यव्यक्तायापकर्षति ॥ ८ ॥ शतवर्षा ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि ॥ तत्कालोपचितोष्णार्को लोकांस्त्रीन्प्रतपिष्यति ॥ ९ ॥ पातालतलमारभ्य संकर्षणमुखानलः ॥ दहन्नूर्ध्वशिखो विष्वग्वर्धते वायुनेरितः ॥ १० ॥ संवर्तको मेघगणो वर्षति स्म शतं समाः ॥ धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट् ॥ ११ ॥ श्रीरामो जयति ॥

राम० ८ ११

हेतावासन्ने सति तत्कार्यं । व्यक्तं स्थूलं गुणात्मकं तत्कारणमव्यक्तं प्रति तेन माकर्षति ८ नाशहेतूनाह शतवर्षेति तस्मिन्काले उपचिता आसाक्षात् यद्वा तेन कालेनोपचितमुष्णं तेष्य सपसः ९ पातालतलं उ ऊर्ध्वशिखः ऊर्ध्वज्वालः विश्वग्वायुनेरितः १० संवर्तकः प्रलयकर्त्ता धाराभिः । नतु बिंदुभिः । हस्तिहस्ताभिः स्थूलाभिः

ततउपाधिलयाद्वैराजः पुरुषो ब्रह्मांडं क्षुद्रं प्रविशतीति ॥ न तत्र स्मरणात्संहृते सर्वे ब्रह्म प्रति संचरे । परस्यांते कृता
त्मानः । प्रविशंति परं पदमिति स्मृतेर्येवैदधिकारमवस्थितिराधिकारिकाणामिति न्यायाच्च वैराजशब्दाभिधेयस्य
ब्रह्मणः । परमात्मावतत्वाम्मोक्ष एव संगच्छते नान्येषामिकारणमात्रः प्रवेशः सत्यं ॥ अथ मेधादिनाम ये लो
कगता नाम यथ भक्तानामाचतिश्रवणात्स्मृतत्वे ब्रह्मणे पि प्रकृतौ लयः ॥ पुनरुत्पत्तिश्रुतिर्माहात्म्ये लक्ष्मी
सूचनाय एवमुक्तमिति विरोधः । यद्वा । केनापि द्वारा मोक्षयत्नतत्स्वस्थानं ब्रह्मैव तत्प्रवेशेनमोक्ष एवोक्त इ
ति द्रष्टव्यं ॥ १२ ॥ एवं विराजो लयमुक्त्वा तत्कारणानां महदादीनां पृथिव्यंतानां प्रातिलोम्येन लयमाह वायु

ततो विराजमुत्सृज्य वैराजः पुरुषो नृप ॥ अण्डकोशं विशत्येतं सूक्ष्मं निरिंधन इवानलः । १२ ॥ वायुना
हृतगंधाम्भः सलिलत्वाय कल्पते ॥ सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते ॥ १३ ॥ हृतरूपं तु
तमसा वायौ ज्योतिः प्रलीयते ॥ हृतस्पर्शोवकाशेन वायुर्नभसि लीयते ॥ कालात्मना हृतगु
णं नभ आत्मनि लीयते ॥ १४ ॥ इंद्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप ॥ प्रविशंति ह्यहं
कारं स्वगुणैरहमात्मनि ॥ १५ ॥
नेति वायोर्गंधरसहारित्वं प्रसिद्धं सांवर्तकेन वायुना हृतगंधांशत एव गंधस्याव्यावर्तकस्य गतत्वात्सलिला
य कल्पते सलिले लीयत इत्यर्थः । तद्धृतसं तेन वायुना एव हृतो रसो यस्य तत् १३ तमसश्च रूपतिरस्का
रित्वं प्रसिद्धं सांवर्तकेन तमसा अवकाशेन प्रकाशेन स्वकारणेन कालात्मना शब्दस्य हि कालएव
नाशः प्रसिद्धः तद्रूपेण कालेनाईश्वरेणात्मनि तामसाहंकारेण १४ इंद्रियाणि बुद्धिश्च राजसाहं
कारं मनो वैकारिकैर्देवैः सह सात्विकं हंकारं । एवं त्रिविधः स्वगुणैः स्वकार्यैः सहितः अहमहंकारः

त्रिवर्णां त्रिगुणां मायां अवर्णाभीतं राजा न तन्निमित्तमुपायं च अवरते छुस्यति ॥ किं भूयइति ॥ १६ ॥ एवमनुकं पितस्तन्निवृत्त्युपायमेव पृच्छति यथैतामितियद्यपितन्मायया अन्नोऽपिभजेत्तमितिभाक्तिसंतारक तेनोक्तैनतथापि किमितिकेनचन्येनोपिवाततत्रोपायोऽस्तीतिज्ञातुं पुनः प्रश्नः अकृतात्मभिः अवशीकृतांतःकरणैः स्थूलधियः स्थूलेशरीरेऽहंधीर्येषां तेनानां ॥ ११ ॥ कर्मभिः साधितान्यपिविनाशयोनसुखहेतवइतिचपरस्यादित्साहनित्या ॥ नित्यान्निरिस्नेति ॥ आत्मनः स्वस्यमृत्युरूपरण ॥ चलैः अ

एषमायाभगवतः सर्गस्थित्यंतकारिणी ॥ त्रिवर्णावर्णितास्माभिः किंभूयःश्रोतुमिच्छसि ॥ १६ ॥ राजोवाच ॥ यथैतामैश्वरींमायांदुस्तरामकृतात्मभिः ॥ तरंत्यंजःस्थूलधियोमहर्षइदमुच्यतां ॥ १७ ॥ प्रबुद्धउवाच ॥ कर्माण्यारभमाणानांदुःखहत्यैसुखायच पश्येत्पाकविपर्यासंमिथुनीचारिणांनृणां ॥ १८ ॥ नित्यार्तिदेनवित्तेनदुर्लभेनात्ममृत्युना गृहापत्याप्तपशुभिःकाप्रीतिःसाधितैश्चलैः ॥ १९ ॥ एवंलोकंपरंविद्यान्नश्वरंकर्मनिर्मितं ॥ सतुल्यातिशयध्वंसंयथामंडलवर्तिनां ॥ २० ॥ श्रीरामोजयति०

नित्यैः अप्राप्यैरिभिश्च ॥ १९ ॥ एवंलोकंपरमितिकर्मभिर्निर्मितत्वान्नश्वरं ॥ तथाचश्रुतिः यथेहकर्मजितोलोकःक्षीयतएवमेवामुत्रपुण्यजितोलोकःक्षीयतइति किंचवर्तमानसमयेपिदुःखयुक्तंपश्यतइत्याह ॥ सतुल्येति सतुल्यातिशयध्वंसंसहतुल्येनअतिशयेनध्वंसेनचवर्तमानं अपितस्तुल्येस्पर्धा

अतिशयेऽसूयाध्वंसाल्लोचनेभयादिकंचपरिहार्यमित्यर्थः अल्पमंडलपतीनामिव स्पर्द्धादिवत् २०

उत्तमं श्रेयो ज्ञातुमिच्छुः । शाब्दे ब्रह्मणि वेदाख्ये न्यायतो निष्णातं तत्त्वज्ञं अन्यथा संशय निरासकत्वायोगा
त् । परे ब्रह्मण्यपरोक्षानुभवेन निष्णातं । अन्यथा शिष्ये संबोधसंचारायोगात् ॥ परब्रह्मनिष्णातत्व
द्योतकमाह उपशमाश्रयमिति ॥२१॥ गुरुर्देवात्मेति हीनेषु दयां । समेषु मैत्रीं उत्तमेषु प्रश्रयं च प्रसिद्ध्येदि
त्यर्थः ॥२३॥ शौचं बाह्यं मृज्जलादिभिः । अभ्यंतरं चाहंमामानादित्यागेन तपः स्वधर्म्माचरणं तिति

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं ॥ शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयं ॥२१॥ तत्र
भागवतान्धर्म्मान्शिक्षेद्गुर्वात्मदैवतः । अमाययानुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥२२॥
सर्वतो मनसोसंगमादौ संगं च साधुषु ॥ दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितं ॥२३॥ शौ
चं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवं ॥ ब्रह्मचर्यमहिंसां च समत्वं द्वंद्वसंज्ञयोः ॥२४॥
सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेततां ॥ विविक्तचीरवसनं संतोषं येन केनचित् ॥२५॥

क्षां । मौनं वृथावाचामनुच्चारणं । स्वाध्यायो धिकारानुरूपं वेदपाठादिकं । आर्जवं स्वच्छता । ब्रह्मच
र्यं यस्य यादृशमुचितं स्वदारनियमादि । अहिंसा भूतेष्वद्रोहः । द्वंद्वसंज्ञयोः शीतोष्णसुखदुःखादि
रूपयोः ॥ समत्वं हर्षविषादराहित्यं ॥२४॥ आत्मेश्वरान्वीक्षां सर्वत्र चिद्रूपेणात्मनो नियंतृरूपेणेश्वरस्यान्वी
क्षां । कैवल्यमेकांतशीलत्वं । अनिकेततां गृहाद्यभिमानराहित्यं । विविक्तचीरवसनं विजनपति
तानां वस्त्रखंडानां धानं वा वल्कानां तैः परिधानं ॥२५॥ श्रीरामो जयति ॥

भा०ए० १३

भागवते भगवत्प्रतिपादके अन्यत्रशास्त्रान्तरेप्यनिंदां मनसः प्राणायामे वाचो मौनं न कर्मणो नी
हदंडं यथार्थभाषणं समदमौ स्पष्टौ करणबाह्येंद्रियनिग्रहौ ॥ २६ ॥ हरेरद्भुतकर्म्मणो गुणानां
श्रवणादि तदर्थे इत्युद्देशेन सर्व्वकर्म्म विशेषतस्त्वे यज्ञनाद्यि ततत् ॥ तदर्थं शिक्षेत ॥ २७ ॥ इष्टं स्तमि
त्याद्यानाचेमिष्टाः वृत्तं सदाचारः आत्मनः प्रियं गंधपुष्पादि दारादीनि पालक्षे ॥ परमेश्वराय
निवेदनं ॥ तासेव कृतया समर्पणं यत्तच्छिक्षेत ॥ २८ ॥ कृष्ण एवात्मनाथा येषां कृष्णस्यात्मनो

श्रद्धां भागवते शास्त्रे निंदामन्यत्र चापि हि ॥ मनोवाक्कर्म्मदंडं च सत्यं समदमावपि ॥ २६ ॥ श्र
वणं कीर्त्तनं ध्यानं हरेरद्भुतकर्म्मणः ॥ जन्मकर्मगुणानां च तदर्थेखिलचेष्टितं ॥ २७ ॥
इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियं ॥ दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनं ॥ २८ ॥
एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदं ॥ परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥ २९ ॥ परस्परा
नुकथनं पावनं भगवद्यशः ॥ मिथो रतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥ ३० ॥ स्मरंतः स्मा
रयंतश्च मिथोघौघहरं हरिं ॥ भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुं ॥ ३१ ॥ श्रीरामो जयति

जीवन्नाथो येषामिति वा तेषु उभयत्र स्थावरे जंगमे परिचर्यां ॥ विशेषतो नृषु ॥ तत्रापि साधुषु स्व
धर्म्मशीलेषु ॥ ततोपि महत्सु श्रीभागवतेषु ॥ २९ ॥ तेषां सत्संगमप्यस्ति पावनं भगवद्यशः ॥ तस्य परानुकथने
शिक्षेत यद्वा यशः प्रति तत्संसर्गादि निवृत्ति त्यागिनमिथो यरिति मस्तां च तुष्टिः सुखं ॥ यश्च निवृत्तिसम
संसारदुःखं तत्तच्च शिक्षेत ॥ ३० ॥ एवं च मानानां परमानंदं प्राप्नुमाह ॥ स्मरंत इति द्वयेन ॥ भक्त्या साधन

राम १३

ऋ्जांहसंश्च अनुशीलयंतितल्लीलां अभिनयंतिएवंपरमेतत्प्राप्य निर्वृताः॥ संतस्तूष्णींभवंति॥ उपसंसंहरतिइतीति

३३ भागवतधर्मान्स्वयाभक्त्या॥ नारायणपरोमायातरतीत्युक्ते पृच्छतिनारायणाभिधानस्येति निष्ठास्वरूपं

अयंभावं ब्रह्मणएतावन्नारायणइतिभाषितानीति परमात्मेतिचोच्यते॥ तदुक्तं॥ वदंतितत्तत्वविदस्तत्वंयत

ज्ञानमद्वयं ब्रह्मेतिपरमात्मेतिभगवानितिशब्द्यतइति॥ तथानारायणपरोभवतितदिदंतिष्ठमाहितं गृही

तमायारूगुणसंसर्गाद्दवगुणाः स्वतइत्यादिषु॥ तत्रकिंमेभिः शब्दैर्न्निविशेषतदेववस्त्वर्थ्यते अन्यैर्वाकोपिवि

कचिद्रुदंत्यच्युतचिंतयाकचिद्धसंतिनंदंतिवदंतिलौकिकाः॥ नृत्यंतिगायंत्यनुशीलयंत्यजंभवंति

तूष्णींपरमेत्यनिर्वृताः॥३२॥ इतिभागवतान्धर्मान्शिक्षन्भक्त्यातदुत्थया॥ नारायणपरोमाया

मंजस्तरतिदुस्तरां॥३३॥ राजोवाच॥ नारायणाभिधानस्यब्रह्मणःपरमात्मनः॥ निष्ठामर्हथनो

वक्तुंयूयंहिब्रह्मवित्तमाः॥३४॥ पिप्पलायनउवाच स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसु

षुप्तिषुसद्बहिश्च॥ देहेंद्रियासुहृदयानिचरंतियेनसंजीवितानितदवेहिपरंनरेंद्र॥३५॥

शेषांशइति॥ ३५॥ अन्नोत्तरंस्थित्युद्भवेति अयमर्थः अस्यविश्वस्यस्थित्युद्भवप्रलयानांस्वयंहेतुः रहितः

सनारायणइति परमेवततत्वमवेहि स्वप्नजागरसुषुप्तिषुसत् अनुवर्त्तमानयत्वेसतिचतुरीयंत्रिषुसं

ततमिति बहिश्चसमाध्यादौयत्सत्तद्ब्रह्मेतितत्वमवेहि देहेंद्रियप्राणमनांसियेनसंजीवितानिसंतिचरंति

प्रवर्त्तते॥ तत्परमात्मेतिपरमेवतत्वमवेहि॥ एवंलक्षणोनेदंनारायणेदंत्यादिनामभिसच्यमानमपिपरमे

भा०१०
१८

अद्वैते हीत्यनेन विषयपर्यंतप्राप्तं निषेधति नैतदिति । एतत्परं तत्त्वं मनो न विशति विषयीकरोति । वागुत वागपि च
क्षुश्च आत्मा बुद्धिश्च प्राणाश्च क्रियाशक्तिमान् प्राणोपि अन्यानि चेंद्रियाणि यथानलं स्वः । स्वांशभूताश्चा
र्चिषो विस्फुलिंगा इत्यः । न प्रकाशयंति न दहंति च । तथा जडास्सुमनः प्रादिवत्तिभिमित्युपमानसात्मा
प्रकाशस्य वर्तते इति प्रकाशकस्य न तत्प्रकाश्यविषयत्वं । प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रो
त्रं मनसो मनो मनसो जन्मनो विदुरिति । तथा । यतो वाचो निवर्तंते अप्राप्य मनसा सहेत्यादिश्रुते । ननु तेषां
वनिषेधं कुर्वन्नेव घटामीतिश्रुतेः शब्दगोचरत्वं प्रतीयते तत्राह । शब्दोपीति । शब्दोपि आत्मत्वं आत्मनि प्रमाणं

नैतन्मनो विशति वागुत चक्षुरात्मा प्राणेंद्रियाणि च यथानलमर्चिषः स्वाः ।
शब्दोऽपि बोधकनिषेधतयात्ममूलमर्थोक्तमाह यदृते न निषेधसिद्धिः ॥ ३९ ॥

सत् अर्थोक्तं प्रर्थोयत् तं यथा भगवतीतत्राह । न साक्षात्कुतः । बोधकनिषेधकतया स्वस्यैव बोधकस्य
त्वात् यतो वाचो निवर्तंते अप्राप्य मनसा सह । तदुक्त्वा नोत्सादितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि । यन्म
नो न मनुते ॥ न चक्षुषा पश्यति कश्चनेनेत्यादिश्रुतेः ॥ ननु तर्हि निवारकश्रुतिः ॥ किमर्थमुक्तं तत्र अर्थोक्तमाहेति
तत्राह यदृते इति ॥ अयात्म प्राप्तं दर्शनीति तिनेति स्थूलमनणु ॥ यतो वाचो निवर्तंते यद्वाचानभ्युदितमित्या
दि निषेधस्य यत् ॥ अवधिभूतं तत्र सत्यतोपि निषेधसिद्धिर्नास्ति सर्वस्य निषेधस्य सावधित्वात् ॥ ३९ ॥

राम
१८

ननु तर्हि प्रमाणविषयत्वान्नास्तित्वं ब्रह्मणे प्रसज्यते ॥ अत आह ॥ सत्त्वमिति सत्त्वस्य फलं कार्यं अप्रसतस्तत्त्वं कार
णं तत्सर्वं ब्रह्मैव भाति कुतः ॥ अत यस्मात् तयोः ॥ सदसतोः परं कारणं ॥ कार्यकारणाभ्यां भिन्नं नमस्विति वा चार
भरोप्यते ॥ ननु कथमेकं बहुविधस्य कारणं तत्राह ॥ उरुशक्तिः अनेकशक्तिमत् ॥ उरुम्महती मायाल
क्षणा शक्तिर्यस्य तदिति वा ॥ बहुधा भानमेव दर्शयति ॥ अथ घयदेकं ब्रह्म तदेव सत्त्वं रजस्तम इति त्रि

सत्त्वं रजस्तम इति त्रिवृदेकमासीत् सूत्रं महानहमिति प्रवदंति जीवम् ॥
ज्ञानक्रियार्थफलरूपतयोरुशक्ति ब्रह्मैव भाति सदसच्च तयोः परं यत् ॥३७॥

कप्रधानं प्रवदंति ॥ ततः क्रियाशक्त्याश्रलं ज्ञानशक्त्या महानिति तदेव प्रवदंति ॥ ततः अहमिति
जीवं जीवोपाधिमहंकारं च तदेव प्रवदंति ॥ ततश्च ज्ञानक्रियार्थफलरूपतया ज्ञानशब्देन देवताः
क्रिया इंद्रियाणि ॥ अर्था विषयाः ॥ फलं तत्प्रकाशः ॥ सुखादि वा तद्रूपतया ब्रह्मैव भाति ॥ नहि सर्वस्व
रूपेण स्वतो भासमानस्य ब्रह्मणः ॥ स्वसिद्धौ प्रमाणापेक्षेति भावः ॥ ३७ ॥ श्रीरामो जयति नमः

ननुसर्वात्मकंचेद्ब्रह्मतर्हिसर्वस्यकार्यस्यजन्मादिविकारवत्त्वाद्ब्रह्मणोपितत्प्रसंगःस्यादित्यत्आह॥ नात्मेति
अयमात्माब्रह्मनजजाननजातः॥ जन्माभावादेवतदुत्तरास्तित्वंब्रह्मणोपिविकारोनास्ति॥ नैधतेनवर्धते
वृद्ध्यभावादेवपरिणामोपिनिरस्तः॥ अतःक्षयस्मात्तद्व्यभिचारिणांमागमापायिनांबालयुवादिदेहा
नांसवनवित्॥ तत्तत्कालद्रष्टा॥ नह्यवस्थावतोद्रष्टातेष्ववस्थोभवतीत्यर्थः॥ निरवस्थःकोसावात्मा

नात्माजजाननमरिष्यतिनैधतेसौनक्षीयतेसवनविद्व्यभिचारिणांहि॥ सर्व
त्रशश्वदनपाय्युपलब्धिमात्रंप्राणोयथेंद्रियबलेनविकल्पितंसत्॥३८॥

अतआह॥ उपलब्धिमात्रमिति॥ तन्नाशात्तर्हिनास्तिरीकलं॥ नेत्याहसर्वत्रेति॥ सर्वत्रदेशो
शश्वत्सर्वदाप्यनपायिअनुवर्त्तमानं॥ ननुनीलज्ञानंजातंपीतज्ञानंनष्टमितिप्रतीतेर्न्नज्ञान
स्यापिनपायित्वंअतआह॥ इंद्रियबलेनेति॥ सदेवज्ञानंइंद्रियबलेनविविधंकल्पितं॥ नीलाद्या
काराकृतयएवजायंते॥ नश्यंतिच॥ नज्ञानमितिभावः॥ व्यभिचारिष्वव्यभिचारेदृष्टांतः॥ प्राणो
यथेति॥३८॥ राम

दृष्टांतं विवृण्वन्निंद्रियादिलयेन निर्विकारात्मोपलब्धिं दर्शयति ॥ अंडेष्विति ॥ अंडेष्विति अंडजेषु पेशिषु
जरायुजेषु ॥ तरुषु उद्भिजेषु अविनिश्चितेषु स्वेदजेषु उपधावति अनुवर्त्तते ॥ एवं दृष्टांते निर्विकार
त्वं प्रदर्श्य सिद्धांतेपि दर्शयति ॥ कथं तर्ह्यात्मा सविकार ॥ इव प्रतीयते यद्यहं जागरे इन्द्रियगणः
यदा च स्वप्ने तत्संस्कारं वा अहमहंकारः ॥ यदा तु प्रसुप्ते तदा तस्मिन् प्रसुप्ते इंद्रियगणे लीने अहंका
रे च सन्ने कूटस्थः ॥ निर्विकार एवात्मा ॥ कुतः आशयमृते लिंगशरीररूपाधिं विना अंकारहेतोरुपा

अंडेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र ॥
सन्ने यदिंद्रियगणेहमिव प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः ॥ ३९ ॥

धेरभावात् इत्यर्थः ॥ नन्वहंकारपर्यंतं तस्य सर्वस्य लये शून्यमेवावशिष्यते तत्कुतः कूटस्थ आत्मा
अत आह ॥ तदनुस्मृतिर्न तस्य विशेषज्ञानशून्यस्य स्वस्वरूपात्मनः ॥ सुषुप्तिसाक्षिणः ॥ स्मृतिर्नो
स्माकं भवति एतावंतं कालं सुखमहं सुप्तः ॥ न किंचिद्वेदिषमिति ॥ अतो ननुभूतस्य स्मरणाद
स्य सत्त्वं प्राक् आत्माभावश्च ॥ विषयसंबंधाभावात् न तु न स्यैवेति भावः ॥ तथाच श्रुतिः ॥ यद्वै तन्न पश्य

भा०१०

१६

ननु यस्त्विवृत्सो कूटस्थात्मा न्नु मवोभवेत ॥ कथं पुनरपि संसारः स्यात अविद्यातत्संस्काराणां विद्यमानत्वा दितिचेत ॥ तदा तर्हि निवर्त्तको ऽन्यु भवो भवेत ॥ अत्रे कोग्राह्यही तिचित्ते वारणा दितिहायकेवलमज्ञ नाभस्यैव च रणे छायायाऽ ऽभनि स्तयाभमान ॥ चेतसो मलानि रवेधमेत ॥ नाशयेत ॥ चेत एवावकर्त्तस्वगता निमला नितयामतयाप्रक्षालयेत ॥ तदा तस्मिन्निशुद्धचेतसि सति साक्षाद्विश्वव धाने नाना त्म त त्वम्य पलभ्यते ॥ अम लयोर्हृशोः ससोर्यपापद्वमेवसिद्धिः ॥ शाविल्वप्रकाशइति ॥ ८० ॥ ननुः कर्मयोगाधीनत्वा न्न ष्टेति कर्मयो गमिति नै कर्मैव कर्म निवृत्तिसाध्यं ज्ञानं ॥ ८१ ॥ प्रश्नांतरमाह ॥ एवमिति पश्चमप्रश्नमपि पितुरिक्ष्वाकोः

यद्वृत्त्वं ऽनाभवरणे वरणयोरमलाचेतो मलानि विधमेज्जगत्कर्म्मजानि ॥ तस्मिन्विशुद्ध उप लभ्यत आत्मतत्त्वसाक्षाद्दृया मलछ्योः सवितृ प्रकाशः ॥ ८० ॥ प्राजेवाच ॥ कर्मयोगं वद तज्जः ऽथ येन संस्कृतः ॥ विधयेहास्य कर्माणि नैष्कर्म्यं विंदते परं ॥ ८१ ॥ एवं प्रश्नमक्षीन्द्रवेर्यम प्रच्छ पितुरंतिके ॥ नाब्रुवन्ब्रह्मणः पुत्रास्तत्र कारणमुच्यतां ॥ ८२ ॥ आविर्होत्र उवाच ॥ कर्माकर्मविकर्मेति वेदवादो न लौकिकः ॥ वेदस्य चेश्वरात्मत्वात्तत्र मुह्यंति सूरयः ॥ ८३ ॥

ब्राह्मणः पुत्राः सनकाद्यः सर्वज्ञा अपि नाब्रुवन ॥ ८२ ॥ गहनताद्योतनाय प्रथमं द्वितीय प्रश्नोत्तरमाह कर्मेति ॥ कर्म्मविहितं ॥ अकर्म तद्विपरीतं निषिद्धं विकर्म्म विगलं कर्म विहिताकरणं ॥ एतत्त्रयं वेदगम्यं ईश्वरा त्मत्वात ॥ ईश्वराद्धूतात अपौरुषेयत्वात्ततस्तपसः पुत्रादोहितकुरभिप्रायतो ज्ञानं शक्यं अपौरुषेयत्व

दुर्ज्ञेयतां स्पष्टमाह। परोक्षवाद इति यत्रान्यथा स्थितोर्थः। संगोपयितुमन्यथा कथ्यते। यतः स परोक्षवा
दः तथा एतान्यनुष्ठितं संतं च तु हेतिसा च क्षते परोक्षेण परोक्षप्रिया इव हि देवा इति। परोक्षवादत्वमेवाह
कर्ममोक्षायेति ननु स्वर्गाद्यर्थं कर्माणि विधत्ते न कर्ममोक्षार्थं तत्राह। बालानामनुशासनं यथा
भवति तथा श्रुत्र दृष्टांतः अगदं धमौषधं यथा। पिता बालमगदं पाययन् खंडलड्डुकादिभिः प्र
लोभयन् पाययति। न हि तावता लेनैतावता गदपानस्य तल्लाभः प्रयोजनं अपितारोग्यं। तथा वेदोप्य

परोक्षवादो वेदोयं बालानामनुशासनं। कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा।
४४ नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोजितेंद्रियः। विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः। ४५

वांतरफलैः प्रलोभ्य न कर्ममोक्षायैव कर्माणि विधत्ते। ४४ ननु कर्ममोक्षश्चेत्पुरुषार्थस्तर्हि प्रथम
मेव कर्म त्यज्यतां अत आह। नाचरेदिति अजितेंद्रियत्वादज्ञः स्वयं जडः। नाचरेत्तर्हि विकर्मणा कर्म
नाचरणेनाधर्मेण मृत्योर्मृत्युं वा प्राप्नोति। तथा च श्रुतिः मृत्वा पुनर्मृत्युमापद्यतेऽर्द्यमानः स्वाः कर्मभि
रिति ४५

भा०ए० तस्माद्वेदोक्तमेव कुर्वाणो न तु विहितं न च कर्म्माणि क्रियमाणे तस्मिन्नाशक्तिः स्यात् फलं च स्यान्न तु नै
कर्म्यरूपा सिद्धिरत आह निःसंग इति ॥ फलाभिसन्धिरहितं ईश्वरार्पितं न तु फलोद्देशेन ॥ ननु फलश्रुतेः का
२७ त ॥ कर्मापि नासते फलं भवे ॥ द्वा कर्मणि रुच्युत्पादनार्थं प्राग्रूपानेखंडलड्डुकादिवत् ॥ ततश्च कर्मभिरत्या
वेदार्थं सम्यग्विचारयति ॥ तदुक्तं यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इत्यनात्म
तत्त्वस्वरूपरिज्ञानं चाह ॥ तमेवं वेदानुवचनेन ब्राह्मणा विविदिषंति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेना
ऽनाशकेन चेति ॥ यज्ञादीनां ज्ञानशेषत्वं चावधार्य निष्कामेष्वेव कर्मसु प्रवर्त्तते ततश्च स्वर्गकामो

४

वेदोक्तमेव कुर्वाणो निःसंगोर्पितमीश्वरे ॥ नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ॥ ४६ ॥
य आशु हृदयग्रंथिं निर्जिहीर्षुः परात्मनः ॥ विधिनोपचरेद्देवं तंत्रोक्तेन च केशवं ॥ ४७ ॥ लब्ध्वा
नुग्रह आचार्यात्तेन संदर्शितागमः ॥ महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्मनः ॥ ४८ ॥

यजेतेत्यादिभिः ॥ कामितस्यैव स्वर्गादेः फलत्वेनावगमादकामितस्य न भवतीति नैष्कर्म्यसिद्धिर्भव
तीति भावः ॥ ४६ ॥ वैदिकं कर्मयोगमुक्त्वा तांत्रिकमाह ॥ य आश्विति ॥ परमात्मनः परस्य वसतः ॥ जीवात्मनो जी
वस्य हृदयग्रंथिमहंकारवंधं निर्हर्त्तुमिच्छुः सत्तंत्रोक्तेन च विधिना प्रकारेण भजेत् ॥ तंत्रमागमं च रामः
कारद्वैदिकेन सह समुच्चयमाह ॥ ४७ ॥ तमेव विधिमाह लब्ध्वानुग्रह इत्यादिना ॥ तेन चार्येण संदर्शि २७
त आगमः ऽर्चनप्रकारो यस्य सः ॥ ४८ ॥

मनं संमुखमासीनं ॥ आदिशद्धेनमतश्चक्रांपिंडं देहविशोधय ॥ संन्यासैः सन्निर्न्यासैः कृताकूपायेन सः ॥ ४९ ॥ आदत्वे
वेवद्ध्वादिपुष्पादीनि जंतादिशोधनेनक्षितिसंमार्जनादिना ॥ आत्मानमवग्रतधाः ॥ लिंगमं त्रिष्वक्ले
पुष्पाल्लनादिना ॥ निष्पाद्यघयोग्यानि कृत्वा ॥ ५० ॥ पाद्यादिपात्राण्युपकल्प सन्निधाप्य हृदि संपूजितं श्रीम
त्तोर्ध्यात्वाहृदेभिः हृद्याशिरः ॥ शिखाकवचनेत्रास्त्रमंत्रैः ॥ मूलमंत्रेण च देवे कृत्वान्यासो मूलमंत्रेणार्च
येत ॥ ५१ ॥ चक्रं गारिनहस्त्यादीनि उपांगानि सुदर्शनादीनि तत्संज्ञितां ॥ सपार्षदास परिवारा ॥ केरपवारे

भुवि सन्मुखमासीनः प्राणसंयमनादिभिः ॥ पिंडं विशोधयन्न्यासकृतरक्षोऽर्चयेद्धरिं ॥ ४९ ॥ आ
र्द्रे हृत्स्थेनापि यथालब्धोपचारकैः ॥ द्रव्यात्मात्मलिंगानि निष्पाद्यप्रोक्षवासनं ॥ ५० ॥ पा
द्यादीनुपकल्प्याथ सन्निधाप्य समाहितः ॥ हृदादिभिः कृतन्यासो मूलमंत्रेणार्चयेत ॥ ५१ ॥ सां
गोपांगां सपार्षदां तां तां मूर्तिं स्वमंत्रतः ॥ पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः ॥ ५२ ॥ गंध
माल्याक्षतस्रग्भिर्धूपदीपोपहारकैः ॥ सांगं संपूज्य विधिवत्स्तवैः स्तुत्वा मनोहरिं ॥ ५३ ॥ आत्मानं
तन्मयं ध्यायन्मूर्तिं संपूजयेद्धरेः ॥ शेषामाधाय शिरसा स्वाधाम्न्युद्वास्य सत्कृतं ॥ ५४ ॥ एवम
ग्न्यर्कतोयादावतिथौ हृदये च यः ॥ यजतीश्वरमात्मानमचिरान्मुच्यते हि सः ॥ ५५ ॥ *इति श्रीभाग*
वते एकादशस्कंधे तृतीयोऽध्यायः ३

रर्चयेत तदाहपाद्येति आद्यशब्देन मधुपर्कमाचमनं च ॥ ५२ ॥ अक्षतास्तिलका अलंकारे न तु पूजायां ॥ नाहते सर्व
ये हि दुःखजनके तत्काम हेश्वरं इति निषेधात उपहारैर्नैवेद्यं ॥ ५३ ॥ शेषं निर्माल्यं स्वधाम्नि स्वस्थाने हृदि मूर्त्तिका
रं डकेड उद्वास्य स्थापयित्वा पूजा विधिसमाप्य योदितिर सत्कृतः ॥ ५४ ॥ तंत्रविधं कर्मयोगमुपसंहरति ॥ ५५ ॥ *इति का द*

भा०११० वतुर्यत्तवतारेह प्रश्नसोत्तरमुक्तवान् जयंतीनंदनोऽन्यग्रहुमिलोन्नवसनम्. १ मत्तोभि मतथा तानइत्यने
नात्मनः प्रियमवतारधर्जयेदित्युक्तेवतारस्तानमपेति तं ॥ तथास्तिवेत्तु तानमेभ्रीरेमित्युक्तोगुणकर्मज्ञानचा
पेक्षितं ग्रतः पश्यतियानीयानीतिकर्तृकोध्यति ॥ १ त्वयापृष्टानिकालत्रयसंबंधशक्तावतारगुणक
र्माणिकथयितुमशक्यमानि संक्षेपतस्तुकानिचित्कथयिष्यामित्याह ॥ योवाअनंतादिनोऽनंतक्रमिष्या
गणयितुमिच्छतियः सतुबलिानमिवृद्धियंस्यसमंदमतिः ॥ कालेनमहताकोपिमहेमतिरजांसिगणए

राजोवाच ॥ यानियानीहकर्माणियैर्यैः स्वच्छंदजन्मभिः चक्रेकरोतिकर्तावाहरिस्ता
निब्रुवंतुनः १ ॥ द्रुमिलउवाच ॥ योवाअनंतस्यगुणाननंतानन्नुक्रमिष्यन्सतुवा
लबुद्धिः ॥ रजांसिभूमेर्गणयेत्कथंचित्कालेननैवाखिलशक्तिधाम्नः ॥ २ ॥ भूतैर्यदापं
चभिरात्मसृष्टैःपुरंविराजंविरचय्यतस्मिन् ॥ स्वांशेनविष्टःपुरुषाभिधानमवापनारा
यणआदिदेवः ॥ ३ ॥

येत अपिश्वविलशक्तिधाम्नः शर्वशक्त्याश्रयस्यभगवतोगुणान्जुनैवगणयेत ॥ तथावक्ष्यतिः
नैतेन्तेननवीर्यगणिप्रचोचंयः ॥ पार्थिवानिविममेरजांसीत्यादि २ तत्रादौपुरुषावतारमाह
भूतैरितियदात्वसृष्टैर्विराजंब्रह्मांडपुरंनिर्मायतस्मिन्लीलयाप्रविष्टः ॥ जनुभौतिकेवनप्रभूत
पुरायस्यजीवस्यतत्रभोक्तृत्वात् ॥ ३ ॥

राम
१८

स्य सगुणान्कर्माण्याह द्वयेन यत्कायइति यस्याधिष्ठेयः कायइतिसप्तमीवा । तन्मंत्रांसमष्टिव्यष्टिजीवा
नांज्ञानकर्मेंद्रियाणि यस्यस्वतः स्वरूपभूतानि तानितन्मात्रंज्ञानंयस्यस्वतः । सिद्धज्ञानमितिवा यस्य
स्वशानतः । प्राणान्सकलदेहशक्तिं ॐजट्रूद्रपशक्तिः ईशानाक्रिया यच्छत्वादिभिर्विश्वस्थितिलयोद्भवप्रा
दिकर्त्ता । ७ प्राकृतिकर्तृत्वेननपर्वज्जैकर्तृतमापिस्तत्वितं तद्धर्षोपितुंतुंगुणावतारान्चरसख्याादिकर्त्तृत्वमाश्रा
हाविति यस्यैत्पनवंगः यस्यरजसाश्रयस्यजगतः शार्गकेर्यिशातध्यैतब्रह्माभूत् स्थितोश्चविष्णुः यस्यस
त्वेनेतिशेषः ऋतुपति तत्फलदाता द्विजातीनांतद्धर्माणांचसेतुःपालकाइत्यर्थः यस्यतमसाऽप्रसाप्या

यत्कायएषभुवनत्रयसन्निवेशोयस्येंद्रियैस्तनुभृतामुभयेंद्रियाणि ज्ञानंस्वतःश्वसन
तोबलमोजईहासत्वादिभिःस्थितिलयोद्भवआदिकर्त्ता ॥ ६ ॥ आद्यावभूच्छतधृतीरजसास्य
सर्गेविष्णुःस्थितौक्रतुपतिर्द्विजधर्मसेतुः । रुद्रोऽप्ययायतमसापुरुषःसआद्यः इत्युद्भवस्थिति
लयाः सततंप्रजासु ॥ ७ ॥ धर्मस्यदक्षदुहितर्यजनिष्टमूर्त्यांनारायणोनरऋषिप्रवरःप्रशांतः
नैष्कर्म्यलक्षणमुवाचचचारकर्मयोद्यापिचास्तऋषिवर्यनिषेवितांघ्रिः ॥ ८ ॥ श्रीरामः

यायरुद्रोऽभूत्इति एतैर्ब्रह्मादिभिर्निमित्तभूतैः ॥ प्रजासुउद्भवास्थितिश्चभवंतियतःसआद्यःपुरुषइत्यन्व
यः ॥ ५ ॥ नरनारायणावतारमाह ॥ धर्मस्यभार्यायांदक्षदुहितरिमूर्त्तिसंज्ञायांनारायणोनरइतिमूर्ति
द्वयेनऋषिर्जनिष्टजातः तच्चरितमाह नैष्कर्म्यमात्मस्वरूपंलक्ष्यतेयेनतत्कर्मनिर्हीरूपंवाउवाच
नारदादिभ्यः स्वयंचचारवितानंघ्रीयस्यसः ऋषिवर्यैर्निषेवितावंघ्रीयस्यसः ॥ ८ ॥ श्रीरामोजयति॥

भगवद्देव तावत्त्वघोतकं परमो हरी ोयितुमिति हास्य परमाह। इन्द्र इति हरभिः धामस्थानं तपसा ग्रहीतुमिच्छ
तीति॥ विशंकमानतयेनाशाय कापसरपरिवारमेवं प्रेषयामास। सः कामः वैस्त्रीभितुयार ख्यायते यः। ततस्याप्सम
प्सरोगणादिभिः सहगत्वा स्त्रीरत्नाप्रेक्षणात्मेव दुष्ट वो वरणात्तैः॥ नतस्यमहिमानं जानातीति अतत्महि
म्नः १ अक्रमं अपराधे। अहो अहो धीर इति विस्मयो गर्वः। तद्भुहितः प्रजमानान्त्रशाय मिया कंपमानानां

इन्द्रो विशं कामममधाम जिघृक्षतीति कामं मयुक्त सगणांस वर्द्युपार्खं। गत्वाप्सरोगणा वसं
तसुमंदवाते स्त्रीप्रेक्षणो भूमिर विध्यतन्महिम्नः॥ १॥ विज्ञाय शक्तिकृतमक्रम मादिदेवः प्राहप्र
हस्यगतिविस्मयजमानान्॥ माभैष्ट मो मदन मारुत देववध्वो गृह्णीत नो बलिमशून्यमिमं
कुरुध्वं॥ च॥ इत्थं ब्रुवत्यभयदे नरदेवदेवाः सव्रीडनम्रशिरसः सघृणांत मध्वुः॥ नैतद्विभोत्व
यि परे विकृते विचित्रं स्वाराम धीर निकरानत पादपद्मे॥ ८॥ श्रीगणेशाय नमः

मोवि मोसमर्थः हे देववधः। माभैष्ट बलिमातिथ्यं। तां प्रार्थयते इमम स्माकमाश्रमं। अतिथ्याभवेत्स्य
प्रायसा दित्यर्थः। च हे नरदेव अभय दे श्रीनारायणो इत्थं ब्रुवति सति देवाः। कामादयः सव्रीडानिन
म्राणिशिरांशिरांशिये षां ते तज्जाभरेणोवाव चनेताशिरस्कार इत्यर्थः। सघृणां यथा भवति कृपां जनयं
त इत्यर्थः। कृपाभुक्तं तमिति वामायातः। परेऽविकृते। स्वाराम आत्मते धीरा आत्मतेषां निकरेणानतेपादप
द्मं यस्य तस्मिन्॥ ८॥

राम

त्वयि एतद्दृश्यमानं कं पादिन विकं अस्माकं चापराधात्स्वरगोस्वभाव तान्न खिन्नमित्याऊ: स्वामिति॥ त्वां सेवतां सेव
मानानां सुरैरिंद्रादिभिः कृतास्वंतरायाविघ्ना भवंति। कस्मादित्यत आऊ:॥ स्वौकः इति स्व स्थानं स्वर्गमतिक्रम्यप
रमं तव स्थानं व्रजतां। नान्यस्य तामसेवमानस्य कुतः॥ बर्हिषि यज्ञे स्वभागान् करं उपाशादीन्स्वपिकः इव राजन् इन्द्र
मेरितेन: प्रयच्छत तर्हि किं भक्तो विघ्नैर्भग्नः पतिनेत्याऊ: धत्त इति। यदीति निश्चये। यत स्त्वं सुराधीश्वरोऽवितारि
क्षकः अतो सो विघ्नानां मूर्द्धं पदं निघ्रधत्ते कुतः स्वापि विघ्नशंके तिभावः॥१०॥ त्वद्भक्तानां तु केवलं तप श्चरतां दपी
गतिः अस्माकं वा वशं याति॥ क्रोधस्यैव तेत्रास्म दृशां कामोपभोगमपितावद्धत्र भवंति॥ क्रोधस्य वशाः

त्वां सेवतां सुरकृता बहवोंतरायाः स्वौको विलंघ्य परमं व्रजतां पदं ते॥ नान्यस्य बर्हिषि बली
न्ददतः स्वभागान्धत्ते पदं त्वमविता यदि विघ्नमूर्द्ध्नि॥१०॥ क्षुत्तृट्त्रिकालगुणमारुतजैह्वशै
श्नानस्मानपारजलधीनतितीर्य केचि॥ क्रोधस्य यांति विफलस्य वशं पदे गोर्मज्जं
ति दुश्चरतपश्च वृथोत्सृजंति॥११॥

पुनर तिमंहा इत्याऊ: क्षुत्तृडिति॥ क्षुच्च तृट् च॥ त्रिकालगुणाश्च शीतोष्णवर्षा मारुतश्च प्राणो वायो वा जै
ह्या: जिह्वाभोगश्च शैश्ना: गृह्योपभोगश्च॥ एतानस्मान् अपारजलधिरूपानतितीर्य विलंघ्य
घोष्पदे मज्जंति॥ कुतः यतः क्रोधस्य विफलस्य वशं च यांति गच्छंति॥ किंच जले मज्जंतो॥ यथापि विवशाः
संतो मस्तकारोपितं भारमुत्सृजंति॥ तथा वयमेव नमो स्नायनं च भोगापशापादिना दुश्चरं तप उत्सृजंति॥

स्त्रियः योगनिर्मिताः स्त्रीभ्रूभंगं कुर्वतीः स्वर्चिता सुकुम्पलंकृताः तेषां स्वलावण्यादिदर्पोपशमाय दर्शयामास ॥१२॥ स्वरूपिणीम् ऊर्तिमतीः ॥ श्रीरिव ताः स्त्रीः दृष्ट्वा तासामनुरूपसौरभेण महत्वेन्याहृताः श्रीकांतिर्येषां ते १३ वध्वे वरणीध्वके वयं वरकाः ॥ क्वेचेमा इति ॥ तत्रा हसवर्णासमा न रूपा नैका अप्यस्मदनुरूपेति चेतसा भवतु तथापि स्वर्गस्य भूषणां त्वं ॥१४॥ सुरवंदिनः देवभृत्याः १५ इत्यायस्य प्रति नारायणावलम्बः शाक्रः तत्रासत्रासं

इति प्रगदरणतां ते यां स्त्रियो मस्कृतदर्शनाः ॥ दर्शयामास भ्रूभंगं स्वर्चिताः कुर्वतीर्विभुः ॥१३॥
ते देवानुचरा दृष्ट्वा स्त्रियः श्रीरिव रूपिणीः ॥ गंधेन मुमुहुस्तासां रूपौदार्यहतश्रियः ॥१४॥
तानाह देवदेवेशः प्रणतान्प्रहसन्निव ॥ आसामेकतरां वृंध्वं सवर्णां स्वर्गभूषणां ॥१५॥
ॐ मित्यादेशमादाय नत्वा तं सुरवंदिनः ॥ उर्वशीमप्सरः श्रेष्ठां पुरस्कृत्य दिवं ययुः ॥१५ इंद्राया
नम्य सदसि शृण्वतां त्रिदिवौकसां ॥ ऊचुर्नारायणबलं शक्रस्तत्र सविस्मितः ॥१६ हंसस्वरू
पवदच्युत आत्मयोगं दत्तः कुमार ऋषभो भगवान्पिता नः ॥ विष्णुः शिवाय जगतां कल
यावतीर्णस्तेनाहृता मधुभिदा श्रुतयो हयास्ये ॥१७॥

प्राप्तः विस्मितश्च तत्र विस्मितश्च आसेति वा ॥१६॥ अस्मान्प्रत्यवतारांस्तच्चरितानि चाह ॥ हंसस्वरूपीति दत्तः दत्तात्रेयः कुमाराः शानकादिः नः पिता ऋषभश्च विष्णुरेव कलापावतीर्णः ॥ सन्नात्मयोगमवदत् तेन विष्णुनाहयास्ये हयग्रीवावतारे मधुभिदा सहृताः ॥ सनातनाश्च श्रुतयः अप्रहृताः ॥१७॥

राम

इत्याप्यच्छी ठपधयश्चगप्ता॥ क्रोडेवरो ह्यवतारो दितिजः हिरण्याक्षः ग्राहाद्गजेंद्रमुमुंचत् मोचयामास एवमा
दौ यत्रावतारनामनास्ति तत्र विष्णुः॥ शिवाय जगतां कलायवतीर्णा इत्युन्न वर्त्तनीयं॥१८॥ संस्तुन्वतः उपकुर्वा
णान्मुरुषीन् वालखिल्यान् कश्यपपार्श्वसमिद्धाहरे गोगो॥ पदे निमग्नानिन्द्रोरणोपहसितान्नुद्धृत्यापदे
मोचयत्॥ तमसि ब्रह्महत्यायां प्रविष्टमोचयामास॥ असुरगृहे पिहिता निरुद्धा या देवस्त्रियस्ता अमुंच

गुप्ताप्यये मनुरिलौषधयश्चमात्से क्रोडे हतो दितिज उद्धरतांभसः क्ष्मां॥ कौर्मे धृतोऽद्रिरमृतो
न्मथने स्वपद्योग्राहात्प्रपन्नमिभराजममुंचदार्त्तः॥१८॥ संस्तुन्ववोऽब्धिपतितांश्चमणान्नृ
षीन्शक्रांश्च वृत्रवधतस्तमसि प्रविष्टं॥ देवस्त्रियोसुरगृहे पिहितास्त्रनापाजघ्नुसुरेंद्रमभयाय
स तां नृसिंह॥१९॥ देवासुरे युधि च दैत्यपतीन्सुरार्थो हत्वांतरेषु भवनान्यदधात्कलाभिः॥ भूत्वाथ
वामन इमामहरद्बलेः क्ष्मां याञ्चाच्छलेन समदाददितेः सुतेभ्यः॥२०॥ निःक्षत्रियामकृत गांच
त्रिसप्तकृत्वो रामस्तु हैहयकुलाप्ययभार्गवाग्निः॥ सोब्धिं बबंध दशवक्त्रमहत्सलंकं सीता
पतिर्जयति लोकमलघ्नकीर्त्तिः॥२१॥

दनेकावतारैः॥१९॥ अंतरेषु सर्वमन्वंतरेषु॥ कलाभिर्मूर्त्तिभिरवतारैर्भवनानि अदधात्॥ अपालयत् इमां क्ष्मां
समादात् हरेः॥२०॥ हैहयानां कुलस्याप्ययाय भार्गवरूपोग्निः स रामो दाशरथिः सन् सलंकं लंकायां स्थितं
सचजयति वर्त्तमानकालीनोऽवतार इत्यर्थः॥२१॥

मा तिनं रामकृसावतारमाह भूमेति बुद्धावतारमाह वादैरिति अतर्हीनयज्ञाहीनदैत्यान्विमोहयिष्यतीति कल्क्यवतारमाह शूद्रानिति नृपहनिष्यत्निहनिष्यति २२ ॥ इत्येकादशे चतुर्थे पंचमे भक्तिहीनानां कोनिष्ठा को भोगो विष्णोः पूजाविधिः प्रश्नद्वयस्योत्तरमुच्यते १ त्वां सेवतामसुरकृता बहवोंतरायाः स्वनेन श्रीहरिभक्ताः विघ्नमूर्ध्निपदं दत्वा परंगतिं यांतीति अभक्तानां न विघ्ना भवंतीमुक्ते तर्हि तेषां का गतिर्भवतीतिते पृच्छतीति भगवंतमिति हे आत्मवित्तमाः अविजितात्मनां अतएवाशांतकामानां का निष्ठा किं प्राप्यमित्यर्थः १ स्वजनकस्य ग

भूमेर्भारावतारणाय यदुष्वजन्मजातः करिष्यति सुरैरपि दुष्कराणि ॥ वादैर्विमोहति यज्ञकृतोऽतदर्हान् शूद्रान्कलौ क्षितिभुजो न्यहनिष्य दन्ते ॥ २२ ॥ एवंविधानि कर्माणि जन्मानि च जगत्पते ॥ भूरीणि भूरियशसो वर्णितानि महाभुज ॥ २३ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे चतुर्थोध्यायः ४ राजोवाच ॥ भगवंतं हरिं प्रायो न भजंत्यात्मवित्तमाः ॥ तेषामशांतकामानां का निष्ठाविजितात्मनां १ ॥ चमस उवाच ॥ मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् २ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरं न भजंत्यवजानंति स्थानाद्भ्रष्टाः पतंत्यधः ३

रोर्भगवतोन्नारदाद्गुरोर्द्रोहेण दुर्गतिं यांतीति वक्तुं भगवताप्रवृत्तः शकोशाद्वर्णाश्रमाणामुत्पत्तिमाह मुखेतिगुणैः सत्वेन विप्राः सत्वरजोभ्यां क्षत्रियाः रजस्तमोभ्यां वैश्याः तमसा शूद्र इति २ एवं विप्रादीनां मध्ये ये ज्ञात्वा नि भजंति ये च ज्ञात्वाप्यवज्ञात्वाप्यवजानंति आत्मनः प्रभवो जन्म जस्मात्तं तदभजने हेतुं प्रतामप्याह दूरे

तत्र येऽन्यास्ते भवद्विधानामनुग्राह्या इत्याह ॥ दूर इति ॥ दूरे हरिकथाश्रवणं येषां ते अत एव दूरे च अच्युतकीर्तनं येषां ते दूरे च अच्युतकीर्तना अथवा ॥ ४ ॥ यानेव तवाद्भवदीयास्ते चिकित्स्यतया पृच्छ तत्र येषां येनाह विप्र इति ॥ श्रौतेन उपनयनाख्येन जन्मना लब्धेन अधिकारेणापि हरेः ॥ पदान्तिकं तज्जन्मना मध्यकारं प्राप्ता अपि मुह्यन्ति कर्मत्वे प्रसज्जन्ते कुतः आम्नायवादिनः अर्थवादरताः तन्मोहकतया विघ्नं ये कुर्वन्ते ॥ तदुक्तं गीतासु ॥ यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ॥ वेदवादरताः पार्थ नान्यदस्तीति वादिन इति ॥ ५ ॥ भक्तिमार्गं विरोधं ये न्वयितेषां मोहं प्रपंचयति

दूरे हरिः कथा दूरे चाच्युतकीर्तनाः ॥ स्त्रियः शूद्रादयश्चैव ते नुकंप्या भवादृशां ॥ ४ ॥ विप्रो राजन्यवैश्यौ च हरेः प्राप्ताः पदान्तिकं श्रौतेन जन्मनाथापि मुह्यन्त्याम्नायवादिनः ॥ ५ ॥ कर्मण्यकोविदाः स्तब्धा मूर्खाः पण्डितमानिनः ॥ वदन्ति चाटुकान्मूढा यया माध्व्या गिरोत्सुकाः ॥ ६ ॥

इति ॥ कर्मण्यतीत्यादिना ॥ अकोविदाः ॥ यथावंधकं न भवति तथा कर्तुमज्ञानं च ॥ अभिज्ञा न पृच्छन्ति यतस्तब्धा अनम्राः स्तब्धत्वे हेतुः यतो मूर्खा अपि पण्डिता वयमिति मानवंतः अतः अपामसोमममृता अभूम ॥ अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति ॥ यत्र नोष्णं न च शीतं स्यान्न ग्लानिर्नाप्यरातयः इत्यादिकपुष्पितया या माध्व्या गिरोत्सुकाः ॥ संतोमूढास्तथा चाटुकान् अपसरोभिः सह विचरिष्याम इत्यादिप्रियान्छन्दान्वदंति ॥ ६ ॥

भा०७०
२२

किंच तेषां कर्म्माभिनिवेशात्कामक्रोधदंभाद्यो वर्द्धितः स्पाह त्रयेरा रजसेति ॥ घोर अभिचारादिसंकल्पाये
षां ते प्रहिवन्मन्वर्यवांते ९ कामकात्पप्रपंचयति वदंतीति उपासिताः स्त्रियो यैः न तु वृद्धाः तेभ्यो मैथुनं तेभ्य एव सु
खमेव परं मत्वा मिथ्याशिषो गृहेषु तेषु आशिषो वदंति इदमघमयाल्लब्धं मन इदं प्राप्स्ये मनोरथं इदमस्तीति
इदमपि मे भविष्यतीत्यन्नधनमित्यादिप्रकाराः एतमेव कर्त्ता प्रपंचयति अस्तन्नविधानदक्षिणानसृष्टनेसंपादि
ता अन्नविधानदक्षिणाय पात यजयंति । तत् एवं च तस्य जीविकार्थं परं केवलं पशून्घ्नंति अन्नतद्विदः हिंसादेः

रजसा घोरसंकल्पाः कामुका अहिमन्यवः । दांभिका मानिनः पापा विहसंत्यच्युतप्रियान् ॥
८ वदंतीति तेन्योन्यमुपासितस्त्रियो गृहेषु मैथुन्यपरेषु चाशिषः । जवंतस्पष्टान्नविधान
दक्षिणं वृत्त्यै परघ्नंति पशूनतद्विदः ॥ ९ श्रिया विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन
कर्म्मणा । जातस्मयेनांधधियः सहेश्वरान्सतोवमन्यंति हरिप्रियान्खलाः ॥ ९ सर्वेषु शश्वत्तनु
भृत्स्ववस्थितं यथा खमात्मानमभीष्टमीश्वरं । वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां
प्रवदंति वार्त्तया ॥ १० ॥

बोनभिज्ञाः ९ ॥ मानिनं प्रपंचयति श्रियेति श्रिया धनादिसंपदा विभूत्या ऐश्वर्येण श्रियादिभिर्जातो
यः स्मयो गर्वस्तेनांधा धीर्येषां ते ईश्वरसहितान्सतो अवमन्यंते ९ किंच एवं वर्त्तमाना आसेवेदंतत्त्वमपि
स्फुटमपि जानंतीत्याह सर्वेष्विति केन रूपेणावस्थितं तत्राह आत्मानमीश्वरं आत्मतया ईश्वरतया वावस्थि
तं एवं मध्यसंगतामाह यथा खं पुरुषार्थतामाह अभीष्टं सुखं मतावेदोपगीतं चेति न शृण्वतः यतो म

राम
२२

ननु व्यवायादीनामपि ऋतौ भार्य्यामुपेयात्। हुतशेषं भक्षयेत् इत्यादिना विहितत्वात्कथमेवं निन्द्यते अत आह लोक इति व्य
वायः स्त्रीसंगः नित्याः रागत एव नित्यप्राप्ताः जंतोः प्राणिमात्रस्य अतस्तत्र तासु चोदना विधिर्नास्ति ननु ऋतावु
पेयादित्यादिविधिर्दृष्टः सत्यं। न त्वयमपूर्वविधिः। रागतः प्राप्तत्वात्। किंतु नियमविधिरूपेण परिसंख्याम
नुज्ञामात्रं क्रियते तदाह व्यवस्थितिरिति तेषु व्यवायादिषु कैः विवाहयज्ञसुराग्रहैः विवाहविषय एव व्यवा

लोके व्यवायामिषमद्यसेवा नित्यास्तु जंतोर्न हि तत्र चोदना॥ व्यवस्थिति
स्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा॥११॥ श्रीरामो जयति श्री०

यः॥ कार्य्यो यज्ञ एव मेधासेवा। सौत्रामण्यां सुराग्रहान् गृह्णातीति श्रुतिस्तत्रैव मद्यसेवेति॥ नियमः क्रियते
ननु च नियमपक्षे आवश्यकत्वान्निन्दायुक्ता। अत आह। आसु निवृत्तिरिष्टेति। अयं भावः। नायं नि
यमविधिरपि नित्यप्राप्तत्वात्। अतो निवृत्तिः। परिसंख्यैव आसु व्यवायामिषमद्यसेवासु विधिरिष्टः
कथं तर्हि व्यवस्थिति। ११।

भा०ए०
२२

त्युक्तं ॥ उच्यते ॥ न तावत्परिसंख्याविधिनाऽऽश्रयानिवृत्तिरुच्यते ॥ तथा सति स्वार्थत्यागः ॥ परार्थकल्पना
प्राप्तबाधश्चेति दोषत्रयं स्यात् ॥ अतः अविद्याप्राप्तोऽप्यर्थस्य प्रापणमनर्थकमित्यपूर्वविधिद्वाराऽस्य
निवृत्तिः फलतो भवति ॥ तद्यथा ॥ इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र रशनालिंगतो
गर्दभाश्वाभिधानीरशनाद्विये प्राप्यते मंत्रस्यापूर्वविधिद्वारा परिसंख्योच्यते ॥ यथोक्तं तंत्रवार्तिके ॥ अ
प्राप्तविधिरेवायमतो मंत्रश्च नियम्यतः ॥ परिसंख्याफलेनोक्ता न विशेषः पुनः श्रुतेरिति ॥ क्वचित्तु रागा
तो नित्यप्राप्तस्याऽप्राप्तांशपूरणस्य नियमफलस्याऽभावान्नियमविधिद्वारा फलतः ॥ परिसंख्या
भवति यथा पंच पंचनखा भक्ष्या राघव शशकः ॥ शल्लकी गोधा कूर्मः खड्गी च पंचमः ॥ भक्ष्या इति तथा सति पं
चनखीभक्षणरूपस्य स्वार्थस्य त्यागः ॥ तथान्यनिवृत्तिरूपस्य परार्थस्य कल्पनं ॥ ततश्च प्राप्तस्य पंचनखी
भक्षणरूपस्य बाधश्च स्यात् ॥ तथा रागतो नित्यवत्प्राप्तस्याप्यवयादेर्विवाहादिनियमेनाभ्यनुज्ञाद्वारा
परिसंख्यैवेति ॥ ननु यद्यभ्यनुज्ञामात्रमेव तद्भवेत् ॥ तर्हि स्मृत्युक्तस्नातानां तु यो भार्यासन्निधौ नोपगच्छति
घोरायां भ्रूणहत्यायां पच्यते नात्र संशयः ॥ इत्यादिदोषश्रवणं न स्यात् ॥ नैष दोषः मनसि कामे
न सत्यपि तस्या मरणाक्षेपादिनाऽनागमनेऽयं दोषश्रवणोपपत्तेरिति सर्वमनवद्यं ॥ ११ ॥ राम

राम
२२

तदेवं मवायादिमनोरपाकुलितत्वाद्मोषमात्मानं नष्टमेवंवतीत्युक्तं ॥ इदानीं धनस्यापि धर्मे द्वारा परमात्मा प्रापकस्य दृष्टोपभोगार्थे विनियोगान्नात्मज्ञानांगं धोऽपीत्याह धनं चेति ॥ धर्म एवैकं ॥ फलं यस्य तत्कृतः यतो धर्मात् ॥ स विज्ञानं अपरोक्षज्ञानसहितं दृढं परोक्षज्ञानं भवति कथंभूतं अनन्तरमेव प्रकृष्टशांतिः ॥ निर्वाणलक्षणाय स्मात् ॥ तत् एवंभूतं धनं गृहेषु देहाद्यर्थं युंजंति ॥ १७ ॥ व्यवस्थायापि व्यवायाद्याभ्यनुज्ञानयपेक्षा अपितत्वमथैवेत्याह ॥ यदिति ॥ यद्घस्मात्सुरायाः पारंभस्य

धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशांति ॥ गृहेषु युंजंति कलेवरस्य मृत्युं न पश्यंति दुरंतवीर्यः ॥ १७ ॥ यत् घ्राणभक्षो विहितः सुराया स्तथा पशोरालभनं न हिंसा ॥ एवं व्यवायः प्रजया न रत्या इमं विशुद्धं न विदुः स्वधर्मं ॥ १३ ॥

आघ्राणं स एवं विहितः न पानं ॥ तथा पशोर्यालंभनमेव विहितं न हिंसा ॥ अपमर्षः देवतोद्देशेन यस्य हननं तत्रालंभे वायव्यं श्वेतमालभेत इत्यादिश्रुतेः ॥ न तु हिंसा ॥ या वेद विहिता हिंसा सा न हिंसेति कौ हृते इति वचनात् ॥ भक्षणोद्देशेन क्रियमाणालौकिक हननेयद्विसैव अत्रतालभनमेव विहितं न तु हिंसा ॥ अतो न यथा विलम्भक्षणाभ्यनुज्ञोत्सर्पः ॥ व्यवायो विप्रजया निमित्तभूतया न तु रत्या ॥ अतो मनोरथ वादिन इम

मा॰ १०

एवं भगवत्पराङ्मुखानां वक्ष्यमाणदोषवत्तां प्रपंचयतन्निषेधं प्रपंचयति पंचभिः ॥ येत्विति अन्ये तु ये बहवः न एवं धर्मविदः

इति ये ॥ विश्वव्याः ॥ निःशंकं अननमनोरथो भवितुमप्यतीतिविश्वास्तवात इति तनयो परो नवेति ॥ पंचभिर्विश्व

२८

स्ताः तेवयशाव प्रेत्य अमुत्र तान्खादति मांसमभक्षयिता इमुत्र यस्य मांसमिहाद्म्यहं ॥ एतन्मांसस्य मांसत्वं प्रव

तिमनीषिणः इति वचनात् ॥ १३ ॥ अभिवारहि ॥ न द्विषंतः मृतके देहसानवं धेप्रत्यादिसहिते ॥ १५ अज्ञास्तत

नैरन्तर्येण पितास्मरंति ॥ तत्सज्ञो सुस्वतः येतु नात्यंतमत्ता ॥ नचैतत्त्वज्ञा ॥ तेतरालवर्त्तिनः पततीत्याह ॥ य इति

येत्वनेवं स्वदेहसंतताः स्वधाः सदभिमानिनः ॥ पश्यन्त्यहंतिविश्वस्वधाः प्रेत्य खादेतितेच तान् ॥ १४ ॥

द्विषंतः परकायेषु स्वात्मानं हरिमीश्वरं ॥ मृतके शानवंधेस्मि न वद्धस्नेहाः पतत्यधः ॥ १५ ॥ ये

कैवल्यस्तसंप्राप्तायेचातीतात्रवमूढतां ॥ त्रैवर्गिकाह्यसरिकाअप्रात्मानं घातयंति ते ॥ १६ ॥ एतेअप्रा

स्मिह नेशातादज्ञानेज्ञानमानिनः ॥ सौदस्यकृतकृत्याश्चैव कालध्वस्तमनोरथा ॥ १७ ॥ हितात्म

या सरस्विनाग्रहायतस्पृहाधियः ॥ तमो विशंत्यनिच्छंतो वासुदेव पराङ्मुखाः ॥ १८ ॥ श्री०

कैवल्यंतत्त्वज्ञानमसंप्राप्ताः अत्र हेतुः ॥ त्रिवर्गप्रधानाः अप्रक्षिरिकाः ॥ उपशांतिस्मरणरहिताः देहादिस्वै

र्यबुद्धयो वा ॥ स्वयमेवात्मानं घातयंति ॥ १ ॥ तदाह एत इति आत्महनः अप्रमापङ्कवकर्तारः अज्ञानेन कर्म

णि ॥ तथा च श्रुतिः ॥ असुर्या नाम ते लोका अंधेन तमसावृता ॥ तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जना इति ७

राम

२८

तदेवं भक्तिरेव कर्त्तव्येति स्थिते। तत्र विशेषं पृच्छति कस्मिन्काल इति॥ किं वर्णः कीदृग्वर्णवान् कीदृशाकृतिः कीदृगाकारः केन वा नाम्ना केन वा विधिना॥१९॥ कृतादिकालेषु नानाप्रकारेण वर्णाभिधाकारायस्य स नानैव विधिना विविधेन मार्गेण॥२०॥ तदेव वर्णादिचतुष्टयमाह कृतमित्यादिना कृष्णाजिनादीन् बिभ्रदिति ब्रह्मचारिवेषो दर्शितः॥२१॥ तपसा ध्यानेन॥२२॥ त्रिगुणात्मकमेखलाय(?)स्य सः यज्ञमूर्तिः पिशंगकेशः॥२३॥ त्रय्या विद्यया वेदत्रयोक्तकर्मभिः॥२४॥२५॥ पृश्निगर्भः तस्याः पुत्रः वृषाकपिः स्मृतः सन्न वर्ष

राजोवाच॥ कस्मिन्काले स भगवान्किंवर्णः कीदृशो नृभिः॥ नाम्ना वा केन विधिना पूज्यते तदिहोच्यताम्॥१९॥ करभाजन उवाच॥ कृतं त्रेता द्वापरं च कलिरित्येषु केशवः॥ नानावर्णाभिधाकारो नानैव विधिनेज्यते॥२०॥ कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलाम्बरः॥ कृष्णाजिनोपवीताक्षान्बिभ्रद्दण्डकमण्डलू॥२१॥ मनुष्यास्तु तदा शान्ता निर्वैराः सुहृदः समाः॥ यजन्ति तपसा देवं शमेन च दमेन च॥२२॥ हंसः सुपर्णो वैकुण्ठो धर्मो योगेश्वरोऽमलः॥ ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते॥२३॥ त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः॥ हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः॥२४॥ तं तदा मनुजा देवं सर्वदेवमयं हरिम्॥ यजन्ति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः॥२५॥ विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः॥ वृषाकपिर्जयन्तश्च उरुगाय इतीर्यते॥२६॥ द्वापरे भगवाञ्श्यामः पीतवासा निजायुधः॥ श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः॥२७॥

तिकामान्कल्पयति क्लेशानि तितपाज(?)यन्त्येव सर्वदेवतिजयन्तः॥२६॥ श्यामः अतसीपुष्पसंकाशः निजानि चक्रादी

भा॰११० महाराजोपलक्षणं छत्रचामरादियुक्तं ॥ वेदतंत्राभ्यां वैदिकेनागमिकेन च मार्गेणेत्याय यजंतीति पूजयंतीति ॥ परमीश्वरं ज्ञा
२५ तुमिच्छवः ॥२८॥ नामान्याह ॥ नमस्त इति ॥२९॥३०॥ नानातंत्रविधानेनेति कलौ तंत्रमार्गस्य प्रधान्यं दर्शयति
३१ ॥ कृष्णं तं वर्णयति त्विषा कांत्या अकृष्णं इंद्रनीलमणिवदुज्ज्वलं ॥ त्विषान्येन कृष्णावतारं ॥ अनेन क

तंतदापुरुषंमर्त्यामहाराजोपलक्षणं ॥ यजंतिवेदतंत्राभ्यांपरंजिज्ञासवोन्टप ॥२८॥ नम
स्तेवासुदेवायनमःसंकर्षणायच ॥ प्रद्युम्नायानिरुद्धायतुभ्यंभगवतेनमः ॥२९॥ नारा
यणायऋषयेपुरुषायमहात्मने ॥ विश्वेश्वरायविश्वायसर्वभूतात्मनेनमः ॥३०॥ इति
द्वापरउर्वीशस्तुवंतिजगदीश्वरं ॥ नानातंत्रविधानेनकलावपियथाशृणु ॥३१॥ कृष्ण
वर्णंत्विषाकृष्णंसांगोपांगास्त्रपार्षदं ॥ यज्ञैःसंकीर्तनप्रायैर्यजंतिहिसुमेधसः ॥३२॥

लौ कृष्णावतारस्य प्रधान्यं ॥ दर्शिता अंगानि हृदयादीनि ॥ उपांगानि कौस्तुभादीनि अस्त्राणि सुदर्श राम
नादीनि ॥ पार्षदाः सुनंदादयः सैः तत्सहितं यज्ञैः ॥ अर्चनैः संकीर्तनैः नामोच्चारणं स्तुतिश्च तत्प्रधानैः ॥ २५
सुमेधसो विवेकिनः ॥३२॥

मुनिमाह ध्येयमिति हे प्रणतपाल हे महापुरुष ते चरणारविंदं वंदे । कथंभूतं ध्येयं ध्यानयोग्यं सदेति सर्वत्र संब
ध्यते । ध्येयत्वे हेतुः इंद्रियकुटुंबादिभिर्यः परिभवस्तिरस्कारः तं हंतीति तथा ततः किंच अभीष्टदोहं मनोरथपूरकं
किंच तीर्थास्पदं गंगाद्याश्रयत्वेन परमपावनं । शिवविरंचिभ्यां नुतं स्तुतं महत्तमं । ननु तौ स्तुतौ एवैव किमर्थं ता
भ्यां नुतं तत्राह शरण्यं आश्रययोग्यं सुखात्मकमित्यर्थः तर्हि तस्यादिस्तुसंप्राकृतस्य कथं गोचरः स्यात् भृत्या
र्तिहं । यस्य कस्यापि भक्तस्य मनोव्यथार्तिहं । न केवलं मार्गमनुकार्तिमात्रं हंति । किंतु भवाब्धिपोतं संसारार्णवतारकं
च इत्यत्रोस्वयमाप्तकामत्वान्नैरपेक्ष्यं भक्तार्थे च सापेक्षतां दर्शयन् । श्रीरामचंद्रलीलां स्तौति त्यक्तेति ॥३३॥ अन्वयः

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरंचिनुतं शरण्यं ॥ भृत्यार्तिहं प्रणतपाल भवा
ब्धिपोतं वंदे महापुरुष ते चरणारविंदम् ॥३३॥ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आ
र्यवचसा यदगादरण्यं ॥ मायामृगं दयितयेप्सितमन्वधावद्वंदे महापुरुष ते चरणारविंदं ॥३४॥

सुदुस्त्यजाममरेप्सितां राज्यलक्ष्मीं त्यक्त्वा यदिति पदस्यार्थः य अरण्यमगात् । किं राज्यैकत्वदर्शनेन
न धर्मिष्ठः कुतः आर्यस्य गुरोः दशरथस्य वचसा । किंच एवं राज्यस्य त्यागेपि भक्तवात्सल्येन दयिता ईप्सितं मा
यामृगं स्वर्णाकारं यो अन्वधावत् । तस्य भगवतश्चरणारविंदं वंदे । यद्वा हे धर्मिष्ठ इति संबोधनं । तथाप्यतिव
क्षितत्वात् यदर्थपदेन संधिर्न भवति । तथा यदगादिति चरणारविंदमेवोच्यते । यच्च मायामृगमन्वधावत्
तत्पदारविंदं वंदे इत्यन्वयः । अन्यत्समानं ॥३४॥ श्रीरामो जयति ॥ ॥ ॥ ॥

भा०ए०
२६

युगानुरूपाभ्यां नामरूपाभ्यां ॥ ३५ ॥ एतेषु चतुर्युगेषु कलिरेव श्रेष्ठ इत्याह ॥ कलिमिति गुणज्ञाः कलेर्गुणं जानंतियेते ॥ ननु दोषाकरं वरुत्वा कथं सभाजयंति तत्राह सारभागिनः ॥ गुणांशग्राहिणः कोसौगुणः तमाह यत्रेति ॥ यदुक्तं ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेर्चयन्य यदाप्नोति तदाप्नोति कलौसंकीर्त्य केशवमिति ३६ तस्मात् लोकतः अस्मात्संकीर्त्तनात् परमोलाभो नास्ति यतः संकीर्त्तनात् ॥ ३७ ॥ किंच कृतादिष्विति ॥ ३८ ॥ अमलाशयाः संतः प्रायः प्रायशो भवति भक्ताभवंति ४० भक्तस्य विधिनिषेधनिवृत्तेः एतत्कृतस्तामाह देवर्षीः आप्तस्य

एवं युगानुरूपाभ्यां भगवान् युगवर्तिभिः ॥ मनुजैरिज्यते राजन्श्रेयसामीश्वरोहरिः ॥ ३५ ॥ कलिं सभाजयंत्यार्याः गुणज्ञाः सारभागिनः ॥ यत्र संकीर्तनेनैव सर्वः स्वार्थोभिलभ्यते ॥ ३६ ॥ नह्यतः परमोलाभो देहिनां भ्राम्यतामिह ॥ यतो विंदेत परमां शांतिं नश्यति संसृतिः ३७ ॥ कृतादिषु प्रजा राजन् कलाविच्छंति संभवं ॥ कलौ खलु भविष्यंति नारायणपरायणाः ॥ ३८ ॥ क्वचित्क्वचिन्महाराज द्रविडेषु च भूरिशः ॥ ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ॥ ३९ ॥ कावेरी च महापुण्या प्रतीची च महानदी ॥ ये पिबंति जलं तासां मनुजा मनुजेश्वर ॥ प्रायो भक्ता भगवति वासुदेवेमलाशयाः ॥ ४० ॥ देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन् ॥ सर्वात्मना यः शरणं शरण्यं गतो मुकुंदं परिहृत्य कर्त्तं ॥ ४१ ॥

तन इतरे स्वाद्यः पंचयज्ञदेवता । एते वायपकृष्णभिक्ताः ऋणी एव तेषां किंकरः । तस्यनित्यं पंचयज्ञा न्याच स्मृतिः हीनजातिषु रिक्तीरामरणार्थं कर्मकारयेतदिति अयं तु न तथा ॥ कोसौयः सर्वभावेन शरणं गतः । कर्त्तं कृत्यं परिहृत्य ॥ यद्वा कर्त्तं भेदं परिहृत्य कृतोऽप्ये हनइत्यस्मात् । वासुदेवः सर्वमिति

राम
२६

ममत्वमपि तस्मिन्नयुक्तमित्याह पित्रोः किं स्वं कायः जनकत्वात् नु वितर्के भार्याया वा भोगप्रदत्वात् स्व
त्वापन्नत्वात् ... स्वामिनो वा अधीनत्वात् अग्नेर्वा अंते दाहकत्वात् श्वगृध्रयो
र्वा भक्ष्यत्वात् किं च आत्मनः सुखदुःखभागित्वात् सुहृदां वा उपकारित्वात् एवं यो न निश्चीयते १९ तुच्छा कृमि
विड्भस्मत्वं चरमा निष्ठा यस्य तस्मिन् काये कलेवरे प्रियत्वेन गृहीते विसंगमेवाह अहो इति सुनसं शोभनना
सिकं २० त्वगादिसंहतौ ... रमणं रमयन्त्यः स्त्रियः कृमिसाम्यमित्याह त्वगादिसंहतौ तस्यां सं... विण्मूत्रादिसंहतौ रमतां कृमी

> पित्रोः किं स्वं नु भार्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः किमात्मनः किं सुहृदामिति यो नावसीयते १९
> तस्मिन् कलेवरेऽमेध्ये तुच्छनिष्ठे विषज्जते अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियाः २०
> त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ विण्मूत्रपूये रमतां कृमीणां कियदन्तरं २१ अथा
> पि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवित् विषयेन्द्रियसंयोगान्मनः क्षुभ्यति नान्यथा २२ अ
> दृष्टादश्रुताद्भावान्न भाव उपजायते असंप्रयुञ्जतः प्राणान् शाम्यति स्तिमितं मनः २३

णां २१ यद्यप्येवं वीभत्सितास्ताः स्त्रियः अथापि नोपसज्जेत स्त्रैणेषु लोकेष्वपि संगं न कुर्यात् अर्थवित् विवेकी अ
त्र हेतुः विषयेति २२ ननु कांचिन्निमीलिताक्षस्यापि मनःक्षोभो दृश्यते तत्संसर्गमपि पूर्वदर्शनादिकं विना
न भवतीत्याह अदृष्टादिति भावात् पदार्थात् भावो मनःक्षोभः अतः प्राणान् इन्द्रियाणि असंप्रयुञ्जतः निश्च
तस्तिमितं निश्चलं सत् २३

भा० ए०

२६

इंद्रियैः कृतान्स्त्रीविषयेष्वविश्वसनीयः मादृशांस्त्वविवेकिनां २४ फलितमाह द्वाभ्यां एवमिति नृपेषु देवेषु वदी
व्यतीतितया २५ उक्तिभिर्हितोपदेशैरिति २६ तीर्थत्वात्सिंगादपि सत्संगः श्रेयानिति दर्शयति संतां लक्ष
णमाह संत इति विशेषणाष्टकस्य यथैकं हेतुहेतुमद्भावः २७ न चैतेषां मदेशापेक्षा अपि तु केवलं तत्सं
निधिरेव तारयतीत्याह तेष्विति सप्तभिः २८ श्रवणादिभिरेव मत्पराः श्रद्दधानाश्च संतो भक्तिं विंदंतीति

तस्मात्संगो न कर्तव्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः विदुषां चाप्यविश्रब्धः षड्वर्गः किमु मादृशां २४ श्रीभग
वानुवाच एवं प्रगायन्नृपदेवदेवः स उर्वशीलोकमथो विहाय आत्मानमात्मन्यवगम्य मां वै
उपारमत् ज्ञानविधूतमोहः २५ ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान् संत एतस्य छिंदंति
मनोव्यासंगमुक्तिभिः २६ संतोऽनपेक्षा मच्चित्ताः प्रशांताः समदर्शिनः निर्ममा निरहंकारा नि
र्द्वंद्वा निष्परिग्रहाः २७ तेषु नित्यं महाभाग महाभागेषु मत्कथाः संभवंति हिता नृणां जुषतां प्र
पुनंत्यघं २८ ता ये शृण्वंति गायंति ह्यनुमोदंति चादृताः मत्पराः श्रद्दधानाश्च भक्तिं विंदंति ते
मयि २९ भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते मय्यनंतगुणे ब्रह्मण्यानंदानुभवात्मनि
३० यथोपश्रयमाणस्य भगवंतं विभावसुं शीतं भयं तमोऽप्येति साधून्संसेवतस्तथा ३१ निमज्यो
न्मज्जतां घोरे भवाब्धौ परमायणं संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जतां ३२

२९ ३० विभावसुमग्निं सेवमानस्य अप्येति नश्यति तथा कर्मादिजाड्यं आगामिसंसारभयं तन्मूलम
ज्ञानं च नश्यतीत्यर्थः ३१ निमज्योन्मज्जतां उच्चावचा योनीर्गच्छतां परमायणं परमाश्रयः ३२ श्रीरामायनमः

राम

२६

...कर्मी नक्तं ... निषेधनिमित्तप्रायश्चित्तनिवृत्तिमाह ॥ स्वपादमूलमिति ॥ सततोऽन्यस्मिन्देहादौ देवतां
...वा... न अत एव तस्य विकर्म्मणि प्रवृत्तिर्न्न संभवति यच्च कथंचित्प्रमादादिना उत्पत्तिसंभवेत् तदपि हरि
...नोति ॥ नन्वयं तत्र मन्येत तत्राह परेशः ॥ ननु च श्रुतिस्मृती ममैवाज्ञे इति भगवद्वचनात् आज्ञाभंगकृपस्य
हेतुः ... प्रियस्य ॥ ननु नायं पापक्षयार्थं भजते तत्राह हृदि संनिविष्टः ॥ न हि वस्तुशक्तिभिरर्थितमपेक्षत
इत्यर्थः ॥ ४२ ॥ जायन्तेयान् जयन्त्याः पुत्रान् ॥ ४३ ॥ उपातिष्ठन् अन्वतिष्ठन् ॥ ४४ ॥ निःसंगो भूत्वा ॥ ४५ ॥ सा स्वप्रकृति

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ॥ विकर्म्म यच्चोत्पतितं कथंचिद्धुनो
ति सर्वं हृदि संनिविष्टः ॥ ४२ ॥ नारद उवाच ॥ धर्मान् भागवतानित्थं श्रुत्वाथ मिथिलेश्वरः ॥
जायन्तेयान्मुनीन्प्रीतः सोपाध्यायो ह्यपूजयत् ॥ ४३ ॥ ततोऽन्तर्दधिरे सिद्धाः सर्वलोकस्य पश्य
तः ॥ राजा धर्म्मानुपातिष्ठन्नवाप परमां गतिं ॥ ४४ ॥ त्वमप्येतान्महाभाग धर्मान्भागव
तान् श्रुतान् ॥ आस्थितः श्रद्धया युक्तो निःसंगो यास्यसे परं ॥ ४५ ॥ युवयोः खलु दंपत्योर्यशसा पू
रितं जगत् ॥ पुत्रतामगमद्यद्वां भगवानीश्वरो हरिः ॥ ४६ ॥ दर्शनालिंगनालापैः शयनासन
भोजनैः ॥ आत्मा वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्वतोः ॥ ४७ ॥

येन तु वां तत्प्रसंगत एव कृतार्थावित्याह युवयोरिति द्वाभ्यां ॥ ४६ ॥ न च सर्वकर्म्मपराणां भागवता
धर्मानुष्ठानमिव युवयोः सत्वशुद्धिरापादनीया ॥ पुत्रोपलालनेनैव भागवतधर्मसेवा सुनिष्पन्नेत्याह ॥ दर्श
नेति कृष्णे पुत्र इति स्नेहं प्रकुर्वतोर्वीत तस्य दर्शनादिभिरात्मा पावितः शोधितः ॥ ४७ ॥ श्रीरामो जयति ॥ श्री ॥

भा॰११॰ एतेस्त्वकैसुसम्भावेन स्मृध्यायिनोऽपि सिध्यन्तीति॥ यं शयनादौ वैरेणापि ध्यायेतस्तस्य गतिविलासाद्यैः आकृतधियः ते
नृहाकरा धीर्येषां ते तत्सारूप्यमापुः किं पुनर्वक्तव्यमनुरक्तधियां तत्साम्यं भवतीति॥४८॥ ननु पुत्रस्नेहभ्रमोस्ति
२१ तस्मात्किं सर्वं मन्येरन् तत्राह मापत्यबुद्धिमिति॥ अपत्यमिति बुद्धिमाकृथाः अडागमः॥ छांदसः॥४९॥ ननु केयमास्त्व
त्रमाः नेयस्मात् कृष्णवादस्य विश्वस्य सृष्ट्यादिकर्तु॥ एतनाशेबरतादिकर्मैश्वर्यमिव निरूप्यते तत्राह भूभाररूपाश्च

वैरेणयं नृपतयः शिशुपालपौंड्रशाल्वाद्योगतिविलासविलोकनाद्यैः॥ ध्यायंतआकृतधियः शयनाश
नादौ तत्साम्यमापुरनुरक्तधियो पुनः किं॥४८॥ मापत्यबुद्धिमकृथाः कृष्णेसर्वात्मनीश्वरे मायामनुष्यभावेन
गूढैश्वर्ये परेव्यये॥४९॥ भूभारासुरराजन्यहंतवे गुप्तये सतां॥ अवतीर्णस्य निर्वृत्यै यशो लोके वितन्य
ते॥५०॥ श्रीशुक उवाच॥ एतच्छ्रुत्वा महाभागो वसुदेवोतिविस्मितः॥ देवकी च महाभागा जहतुर्मो
हमात्मनः॥५१॥ इतिहासमिमं पुण्यं धारयेद्यः समाहितः सविधूयेह शमलं ब्रह्मभूयाय कल्पते
५२॥ इति श्रीभागवते महापुराणे एकादशस्कंधे वसुदेवनारदसंवादे जायंतेयोपाख्याने
नाम पंचमोध्याय ५ अथब्रह्मात्मजैर्देवैः प्रजेशैरावृतोभ्यगात्॥ भवश्च भूतभव्येशो ययौ भू

२१ ये राजन्यास्तेषां हंतवे तान् हंतुं॥ निर्वृत्यै मोक्षाय॥५१॥ इह अस्मिन्नेव देहे मोहमलं विधूय ब्रह्मत्वाय कल्प
ते॥५२॥ इति एकादशे टीकायां पंचमोध्यायः॥५॥ षष्ठे ब्रह्मादिभिः स्तुत्वा गंतुं विज्ञापितं हरिं॥ उद्धवः प्रार्थयो — राम
मास स्वधाम ८ नयमामिति १० अतः परमविस्तरेणात्मविद्यां निरूपयितुं तत्प्रस्तावमाह अथेति — २१
ब्रह्मात्मजैः सनकादिभिः अभ्यगात् द्वारकामिति चतुर्णामन्वयः॥१॥ श्रीरामो जयति॥ श्रीगणेशा॰

नत्वं तेषां स्वरूपं प्राकृतरूपं भगवंतं नित्यं परमरूपतां केयमतिदृष्टि ख्यातः ब्रह्मा ह वपुषेति । येन वपुषा नरलो-
कमनोरमः सन् सर्वलोके स्वयशो वितेनात् इति संबंधः । कृष्णदिदृक्षवः । व्यचक्षत अपश्यन् । स्वर्गोद्यान
[illegible] मोलैः । चित्राणि [illegible] वंधप्रायाणि पदानि [illegible] यासु ताभिर्गीर्भिः । बुद्धींद्रियादिभिः [illegible]
[illegible] ना [illegible] न च [illegible] हेतुना [illegible] तेन नता वयं नमस्कृतवंतः । स्मेति विस्मये

॥ रुद्रो मरुद्भिर्भगवानादित्या वसवोऽश्विनौ ॥ ऋभवोंऽगिरसो रुद्रा विश्वे साध्याश्च देवताः ॥
॥ गंधर्वाप्सरसो नागाः सिद्धचारणगुह्यकाः ॥ ऋषयः पितरश्चैव सविद्याधरकिंनराः ॥
॥ द्वारकामुपसंजग्मुः सर्वे कृष्णदिदृक्षवः । वपुषा येन भगवान्नरलोकमनोरमः ॥ य-
शो वितेने लोकेषु सर्वलोकमलापहम् ॥ तस्यां विभ्राजमानायां समृद्धायां महर्द्धि-
भिः ॥ व्यचक्षतावितृप्ताक्षाः कृष्णमद्भुतदर्शनम् ॥ स्वर्गोद्यानोपगैर्माल्यैश्छादयंतो य-
दूत्तमम् ॥ गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरम् ॥ देवा ऊचुः ॥ नताः स्म ते नाथ
पदारविंदं बुद्धींद्रियप्राणमनोवचोभिः ॥ यच्चिंत्यतेंतर्हृदि भावयुक्तैर्मुमुक्षुभिः कर्मम-
योरुपाशात् ॥ ६ ॥

[illegible] नाथ पादाम्बुजं [illegible] मनसा [illegible] वेति प्राणमोहसंगे [illegible] इति । स्म
शब्दो [illegible] विस्मयाय विशेषणं ॥ कर्ममयादुरुपाशात् मुमुक्षुभिर्ध्यायते [illegible] रपि यत्केवलमंतर्हृदि चिं-

॥ भा० ए० ॥

॥ २५ ॥

ननु मम पि इच्छा इहकर्म्मकरणान्न कुतो मत्सद्भावं हृद्विन्तनं कर्म्मपाशान्मुमुक्षुभिः क्रियते तत्राहुः । त्वमिति । हे अजित आत्मनि स्वाधिष्ठाने तन्नमितेस्मिन् स्थितमेकं व्यक्तं महदादिप्रपंचं सृजसि पालयसि संहरसि च । तद्व्यात्मन्येव न पदार्थवदुर्विभाव्यं मनसाप्यवितर्क्यं तद्गुणस्थः तस्या मायया गुणेष्वनुनियंता त्वं न लिप्यतः । अथ च एतैः कर्म्मभिः भवान्नाप्यते नालिप्यते कुतः । यो भवान्स्वे नवद्यः रागादिरहितः यतः स्वे स्वात्मरूपे सुखे अव्यवहिते अनावृते अभिरतः । अतः स्वं कर्म्म

॥ त्वं मायया त्रिगुणयात्मनि दुर्विभाव्यं व्यक्तं सृजस्यवसि लुंपसि तद्गुणस्थः ॥ नैतैर्भवानजित कर्म्मभिरज्यते वै यत्स्वे सुखे व्यवहितेभिरतो नवद्यः ॥ शुद्धिर्नृणां न तु तथेड्य दुराशयानां विद्याश्रुताध्ययनदानतपः क्रियाभिः ॥ सत्वात्मनामृषभ ते यशसि प्रवृद्धसच्छ्रद्धया श्रवणसंभृतया यथा स्यात् ॥

…आत्माराम परमेश्वर इति गम्यते इति भावः । न त्वात्मारामस्य किं कर्म्मकरणेन तत्र आहुः शुद्धिरिति । हे इड्य हे स्तुत्य दुराशयानां रागिणां विद्या उपासना विद्यादिभिः तथा शुद्धिर्न भवति सत्वात्मनां सतां ते यशसि श्रवणेन संभृतया परिपुष्टया अभिवृद्धया सच्छ्रद्धया यथा स्यात् परमपावनस्पर्शा सेविता नायतव कर्म्माचरणमिति भावः ॥ ९

॥ राम ॥

॥ २५ ॥

तदेवं तथ यशः श्रद्धे … नुद्धि हेतुः स्वास्मामिस्तत्तत्वं वा घ्रिर्दृष्ट्वा तस्य तत्वं वा घ्रिर्न्नोऽस्मा … प्रभामाशायानां
… वासनानां धूमकेतुः तद्दाहकः स्यात् ॥ कथं भूतः यः क्षेमाय मोक्षाय मुनिभिः मुमुक्षुभिः
… मोलि … दृह्यमान श्रियत्स मानः ॥ यश्च सात्वतैर्भक्तैः समविभूतये समानैश्वर्याय वा शुद्ध
… दृह्यमान … श्चित्कलम वह्निवीरैः श्वरतिक्रमाय श्वर्गापतिक्रमं वैकुंठ प्रा
… र्व्यूहेर्चितः ॥ … किंच प्रयत पाणिभिः संयत हस्तैर्हविर्गृहीत्वा ॥ अध्यात्म
प्तये सेवनशास्त्रिकालं अर्चितः ॥

॥ स्यान्नस्तदंघ्रिरशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः ॥ यः ॥
सात्वतैः समविभूतय आत्मवद्भिर्व्यूहेऽर्चितः सवनशः स्वरतिक्रमाय ॥ यश्चिं ॥
त्यते प्रयतपाणिभिरध्वराग्नौ त्रय्या निरुक्तविधिनेश हविर्गृहीत्वा ॥ अध्यात्म ॥
योग उत योगिभिरात्ममायां जिज्ञासुभिः ॥ परमभागवतैः परीष्टः ॥

न्नो अध्यात्मनीयाद्ये याज्ञिकैर्यश्चिंत्यते तेन न्नु यस्मै देवताये हविर्गृहीतं तस्यात्तां ध्यायेद्वषट्
रिष्यन्निति वचनात् नान्न देवता श्चिंत्यते गत ज्वराः ॥ त्रय्या निरुक्तेन विधिना इन्द्रादिरूपेणैव
यज्ञ पुरुष श्चिंत्यत इत्यर्थः ॥ उत किंच ॥ अध्यात्म योगे आत्माधिकारे योगे योगिभिरपि क्रियां
मन स्तव मायां प्रपंच मादि सांगं जिज्ञासुभिस्त्वत्कामैर्यश्चिंत्यते ॥ परमभागवतैस्तन्मत्कैर्यः परी

॥भा०१०

॥२८॥

एतेषां च मुनिसात्वतादीनां परं शासेवकानां मध्ये परमभागवतेषु लक्ष्म्या व्यापितवप्रीतिर

धिकेति श्रुत्वं वेति ॥ पर्युष्टयेति ॥ हे विभो वः पांसुः अहं यत्र वसामि तत्रैवेक्षासि पर्युषित ऽपीयं

वसतीति प्रीति पत्नि वसपत्नीवत् श्रीः संस्पर्द्धमाना भवति । तथापि तेः स्पर्द्धमाना श्रियम

त्सयो भवान् पर्युषितया ॥ किं च सुष्ठु या वनमाला भक्तैः स्थितया मिति प्रीत्या सुष्ठु प्रणीतं सुष्ठु सं

पादितं यथा भवति तत्पार्हणं ता पूजा माददत्स्वीकृतवान् ॥ सुप्रणीत मित्यर्हणा विशेषणं वा ॥

तस्य सतवांघ्रिर्नो अशुभाशयधूमकेतुर्भूयात् ॥ यद्वा यो घ्रिरमुया सुप्रणीतमर्हणमाददत्तस

॥पर्युष्टया तव विभो वनमालयेयं संस्पर्द्धिनी भगवती प्रतिपत्निवच्छ्रीः ॥ यः सुप्र॥

॥णीतममुयार्हणमाददन्नो भूयात्सदांघ्रिरशुभाशयधूमकेतुः ॥ ॥ ॥ ॥

[illegible] अशुभाशयधूमकेतुर्भूयादिति न्वयः । अथ वेवं संबंधः । एतेभ्यो ध्यानार्चनादिनिषेभ्यो

[illegible] सि प्र [illegible] घ्रुव्रावं तएव कृता र्थीभगवतोयं प्रियत्वादित्याह ॥ पर्युष्टया वृक्ष

[illegible] सस्मास्पर्द्धिनीः सर्वांगेषु या कांतया शोभितया वनमालया वक्षसि एकदेशवर्तमा

यायपा [illegible] संस्पर्द्धमाना भवति । तथाप्यमुयाय मभुविवौर्वदृधावेरीतया कीर्तिमध्यावृजय

[illegible] मालयैव यो [illegible] प्रणीतमर्हणामाददत्स्वीकृतवान् ॥ १२ श्रीरामकृष्णजो

॥राम॥

२८

सभक्तपक्षपा ... सिद्ध एवेति स्तवतः प्रार्थयस्ते॥ केतुरिति॥ वलिवंधने त्रिविक्रमे भूते तः त
तदेवं ततः ... विक्रमे तस्य लोके गतस्तव पादः केतुः ... तो विजयध्वज इव॥ तत्तस्य पाद इति॥
... ताकः स्त्रिधा पतंती त्रिषु लोकेषु वा पतंती गंगा पताका यस्य सः॥ तथाच भुमुर्देववत्ताः र
... नयो भयाभयकराः॥ साधु भुसुरेषु स्वर्गीय॥ खलेषु असुरेषु इतराय ... योगमनाय॥
यः एवं केतुः स यस्ते पादः॥ सभजतां नः ... पुनातु शोधयतु॥ च घादि पा हे भजतां नः इतिकर्म्मी॥
रिणा ष ... घा ... जतो ऽस्मान् पुनातितितथा च श्रुतिः॥ चरणं पवित्रं विततं पुराणं येन पूतस्त

केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते भयाभयकरोसुरदेवचम्वोः॥ ११॥ स्वर्गाय साधुषु खलेष्वितराय भूमन् पादः पुनातु भगवन् भजतामघं नः॥ १२॥ नस्योतगाव इव यस्य वशे भवंति ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः॥ १३॥ कालस्य ते प्रकृतिपूरुषयोः परस्य शं नस्तनोतु चरणः पुरुषोत्तमस्य॥ १४॥

रति ... ता नि॥ तेन पवित्रेण ... नयता ... तिं पाप्मानं मरातिं तरेम॥ लोकस्य द्वारमर्चिमत्प
वित्रं ज्योयस्मात्॥ तरं ... वर्गं ... तिक्रांतो हं नित्यमकलात् ... ध्वरा चेतन वर्गा तेजी वा ... म
प्रतियं तत्त्वा त॥ ... ते लोके वेस्व पुरुषोत्तमप्रति प्राप्य ... चातिम ... ज मानं महस्वन॥ ... स्या
रावज्ञ धा ... हमानं च रणा लोके सूचितं ... धा विनि॥ ... वा सुरादयः परस्परं ... यंतिजीयें
तेवा किमहं तत्रेत तच्चाह॥ नसीति॥ मिथुः॥ मिथ॥ ... र्धमानाः ... दिभिः पीड्यमानाः ब्रह्मस्योऽपि यस्य

॥ अस्येति ॥

॥ भा० ए० ॥ प्रकृतिपुरुषाभ्यां परत्वमुपपादयंतः ॥ कालत्वेन पुरुषोत्तमत्वमाहुः ॥ अस्य जगतस्तु स्थित्यादि हेतुर
सि कुतः अप्रव्यक्तं प्रकृतिः ॥ जीवः पुरुषः महान्महत्तत्वं तेषां कालं नियंतारं त्वामाहुः ॥ अक्षरात्परत
रः परः महतः ॥ परमव्यक्तम् अव्यक्तमव्यक्तात्पुरुषः परः ॥ पुरुषान्न परं किंचित्सा काष्ठा परा गतिरि ॥ ३० ॥
त्याद्याः श्रुतयः किंच अयं संवेशमेकोयः कालः त्रिणाभिः नीडाचा तुर्मास्या निनाय योयस्य सरा
सोऽपि त्वमेक अतस्त्वमुत्तमपुरुष इति ॥ तथा च गीतासु ॥ यस्मात्क्षरमतीतोहमक्षरादपि चो

॥ अस्यासि हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि कालमाहुः ॥ सोयं त्रिणा॥
॥ भिरखिलापचये प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वं ॥ १७ ॥ त्वत्तः पुमान्सम॥
॥ धिगम्य ययास्य वीर्यं धत्ते महांतमिव गर्भममोघवीर्यः ॥ सोयं तयानुगत आत्मन॥
॥ आंडकोशं हैमं ससर्ज बहिरावरणैरुपेतम् ॥ १८ ॥

अतोऽस्मिल्लोके वेदे च प्रथितः पुरुषोत्तम इति ॥ त्वमेव प्रकृत्यादिद्वारा जगत्स्रष्टा देहे
तं तेन प्रकारेणाहुः त्वत्त इति ॥ त्वत्तः पुमान् जीवो [illegible] यं शक्तिं समधिकृत्य प्राप्य
अत्र यास्य सह महांतं धत्ते ॥ किमिव अस्य विश्वस्य गर्भमिव ॥ सोऽयं महान् तयैव मायया ॥ राम ॥
शुद्धि पश्च आत्मनः सकाशादंडकोशं ससर्ज तयानुगत इति पाठेऽपि स मायया अव ॥ ३० ॥
यायपि ॥ याऽधिष्ठितः सन्निति ॥ १८ ॥

ऽस्मरत्वं मम कुतोऽवगतं ततऽ उक्तं दिति ॥ तत्तस्मात् तस्थुषः स्थावरस्य च जगतो जंगमस्य
तदेवं ततश्च धीशः यद्यस्मात् मायया तु स्वाय तु जृंभिता या गुणविक्रिया इंद्रियवृत्तिः तयोपनीतान्
विषया न्जुषन्जुषन्जुषमाणोऽपिहे ह्रषीकपते न लिप्तश्च ये त्वन्ये जीवा योगिनो
…तः परिहृता दपि …विद्यमानान् ऽस्पष्टा विषयजो व्याक्षिप्तिवासनामात्रेण
न इत्यर्थः न्व लिप्तत्व माह ॥ स्मायेति ॥ स्मायाव लोक …र स्मितविलसितोऽवलोकः तस्य
ते वकवाः तेन दर्शितो यो भावोऽभिप्रायः तेन मनोहारिय भ्रूमंडलं तेन प्रहिताय सौरतामंत्रा तैः शौंडैः प्र

॥ तत्त्वस्थुषश्च जगतश्च भवानधीशो यन्माययोत्थगुणविक्रिययोपनीतान् १७ अर्थान् जु ॥
॥ षन्नपि हृषीकपते न लिप्तो येऽन्ये स्वतः परिहृतादपि बिभ्यति स्म १८ स्मायावलोकलव द ॥ क
॥ र्शितभावहारि भ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ पत्न्यस्तु षोडशसहस्रमनंगबाणैर्य ॥
॥ स्येंद्रियं विमथितुं करणैर्न विभ्व्यः १९ विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः पादावने ॥
॥ जसरितः शमलानि हंतुम् ॥ आनुश्रवं श्रुतिभिरंघ्रिजमंगसंगैस्तीर्थद्वयं शुचिषदस्त उप ॥
स्पृशंति २० ॥
॥ रैः कंदर्पबाणैः करणैः कामकलाभिः षोडशसहस्रपत्न्यः यस्येंद्रियं म
नः विमथितुं क्षोभयितुं न विभ्व्यः न समर्थाः स भवान् न लिप्त इति पूर्वेणान्वयः । तस्मात्तवामृतरूपा या क
था ॥ तदेव उदं उदकं वहंतीति तथा कीर्तिनद्यः ॥ तथा पादावनेजसरितो गंगाद्याः त्रिलोक्याः शमला
नि हंतुं विभ्व्यः ॥ केन प्रकारेण ॥ आनुश्रवं गुरोरुच्चारणमनुश्रूयत इत्यनुश्रवो वेदः ॥ तत्र भ … कीर्ति

॥ भा० ए० ॥ विबुधैः सहैं ॥ विविक्ता विलक्षिताः ॥ २१ ॥ २२ ॥ उद्यमा निवृत्तानि विविक्ता मायेषु तानि वर्त्मानि ॥ २३ ॥ २४

॥ ३१ ॥

॥ श्रीबादरायणिरुवाच ॥ इत्यभिष्टूय विबुधैः सेशः शतधृतिर्हरिं ॥ अभ्यभाषत गोविंदं ॥ प्रणम्यांबरमाश्रितः ॥ २० ॥ ब्रह्मोवाच ॥ भूमेर्भारावतारायपुरा विज्ञापितः प्रभो ॥ त्वम स्माभिरशेषात्मंस्तत्तथैवोपपादितं ॥ २१ ॥ धर्मश्च स्थापितः सत्सु सत्यसंधेषु वै त्वया ॥ कीर्त्तिश्च दिक्षु विक्षिप्ता सर्वलोकमलापहा ॥ २२ ॥ अवतीर्य यदोर्वंशे बिभ्रद्रूप मनुत्तमं ॥ कर्माण्युद्दामवृत्तानि हिताय जगतोकृथाः ॥ २३ ॥ यानि ते चरितानीश मनु ष्याः साधवः कलौ ॥ शृण्वंतः कीर्त्तयंतश्च तरिष्यंत्यंजसा तमः ॥ २४ ॥ यदुवंशेवतीर्ण स्य भवतः पुरुषोत्तम ॥ शरच्छतं व्यतीयाय पंचविंशाधिकं प्रभो ॥ २५ ॥ नाधुना तेखि लाधार देवकार्यावशेषितं ॥ कुलंच विप्रशापेन नष्टप्रायमभूदिदं ॥ २६ ॥ ततः स्वधाम प रं विशस्व यदि मन्यसे ॥ सलोकांल्लोकपालान्नः पाहि वैकुंठकिंकरान् ॥ २७ ॥ श्रीभगवा नुवाच ॥ अवधारितमेतन्मे यदात्थ विबुधेश्वर ॥ कृतं वः कार्यमखिलं भूमेर्भारोवतारितः ॥ तदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतं ॥ लोकं जिघृक्षद्रुद्धं मे वेलयेव महार्णवः ॥ २८ ॥

तो ब्रह्म...
इतः ८२

...वीर्यशौर्यश्रियोद्धतं ... २८ ॥ श्रीरामो जयति ॥ श्रीरामचंद्र स्वामिने नमः श्री

॥ राम ॥
॥ ३१ ॥

रचितमयस्मिन् २० नैकुंठं यास्यन् तव भवनं गृहस्यामि २१ ॥ २२ ॥ २३ ॥ २४ ॥ प्रभासं यास्याम इति
यमभिप्राय ॥ एते दुर्वासाः स्वाधिकाराने वार्हति ॥ बबुः स घोमो सं वार ववस्यां मता श्रुतर न ॥ तेमा
व मत्वे प्रभासे ने ष्या मेति २५ ॥ स्त्रशापा प्रमरणा २६ हीत श्र ५ ६ २ ३ स्नानमत्र कृता किल्विषोत्तमा
यघ २ं सं हृस दन्त नायसूनां विपुलं कुले ॥ गंतास्यने नलोके यमदवेले नविनस्पति २८
स्तांनीना शान्धार ध्व: कुल स द्विजशापत: ॥ यास्यामि भवनं ब्रह्मन्नेतदन्तेन वान घ २९
श्रीशुक उवाच ॥ इत्युक्तो लोकनाथेन स्वयंभू: प्रणिपत्य तं ॥ सह देवगणैर्देव: स्वधाम सम
पद्यत ॥ ३० ॥ अथ तस्यां महोत्पातान् द्वारवत्यां समुत्थितान् ॥ विलोक्य भगवानाह यदु
वृद्धान् समागतान् ३२ श्रीभगवानुवाच ॥ एते वै सुमहोत्पाता व्युत्तिष्ठंतीह सर्वत: ॥ शा
पश्च न: कुलस्यासीद्ब्राह्मणेभ्यो दुरत्यय: ३३ नवस्तव्यमिहास्माभिर्जिजीविषुभिरार्यका
॥ प्रभासं सुमहत्पुण्यं यास्यामोद्यैव मा चिरं ३४ यत्र स्नात्वा दक्षशापाद्गृहीतो यक्ष्मणोडुरा
ट् विमुक्त: किल्विषात्सद्यो भेजे भूय: कलोदयं ॥ ३५ वयं च तस्मिन्नाप्लुत्य तर्पयित्वा पितॄन्
सुरान् ॥ भोजयित्वोशिजो विप्रान्नानागुणवतांधसा ॥ ३६ तेषु दत्त्वा निपात्रेषु श्रद्धयोप्त्वा म
हांति वै ॥ वृजिनानि तरिष्यामो दानैर्नौभिरिवार्णवं ॥ ३७ ॥ श्रीशुक उवाच ॥ एवं भगवता
दिष्टा यादवा: कुरुनंदन ॥ गंतुं कृतधियस्तीर्थं स्यंदनान् समयूयुजन् ३८ ॥ तन्निरीक्ष्योद्धवो राजन्
श्रुत्वा भगवतोदितं ॥ दृष्ट्वारिष्टानि घोराणि नित्यं कृष्णमनुव्रत: ६० ॥
ड्गडु: स्वात्स घोचिमत्क: सत्कलाव द्विं भेजे: ३५

॥भा०ए०॥ लोकं मर्त्यलोकं न प्रसहन्न प्रतिहतवान् ॥४२॥४३॥४४ शय्यादिषु तां महतां नित्यं सेवितत्वं तेन वयं कथं त्यजेम
॥ त्यक्तुम शक्नुवन्तः प्रार्थये न माया भयास्ति हि ॥ जयेति ॥ चर्चिताः प्रलंकृताः ॥ हि निश्चितं जयेम ॥४६॥ संन्यासि

॥३२॥

विवित्क्त उपसंगम्य जगतामीश्वरेश्वरं ॥ प्रणम्य शिरसा पादौ प्रांजलिस्तमभाषत ॥४१॥ उद्धव उवाच ॥
देव देवेश योगेश पुण्यश्रवणकीर्तन ॥ संहृत्यैतत्कुलं नूनं लोकं संत्यक्ष्यते भवान् ॥४२॥ विप्र
शापं समर्थोपि प्रत्यहन्न यदीश्वरः ॥ नाहं तवांघ्रिकमलं क्षणार्द्धमपि केशव ॥४३॥ त्यक्तुं समुत्सहे
नाथ स्वधाम नय मामपि ॥४४॥ तव विक्रीडितं कृष्ण नृणां परममंगलं ॥ कर्णपीयूषमास्वाद्य
त्यजंत्यन्यस्पृहं जनाः ॥४४॥ शय्यासनाटनस्थानस्नानक्रीडाशनादिषु ॥ कथं त्वां प्रियमात्मा
नं वयं भक्तास्त्यजेमहि ॥४५॥ त्वयोपभुक्तस्रग्गंधवासोलंकारचर्चिताः ॥ उच्छिष्टभोजिनो दा
सास्तव मायां जयेमहि ॥४६॥ वातरशना ये ऋषयः श्रमणा ऊर्द्ध्वमंथिनः ॥ ब्रह्माख्यं धाम ते यांति
शांताः संन्यासिनोमलाः ॥४७॥ वयं त्विह महायोगिन् भ्रमंतः कर्मवर्त्मसु ॥ त्वद्वार्त्तया तरिष्या
मस्तावकैर्दुस्तरं तमः ॥४८॥ स्मरंतः कीर्तयंतस्ते कृतानि गदितानि च ॥ गत्युत्स्मितेक्षणक्ष्वेलि य
न्नृलोकविडंबनं ॥४९॥ श्रीशुक उवाच ॥ एवं विज्ञापितो राजन् भगवान्देवकीसुतः ॥ एकांति
नं प्रियं भृत्यमुद्धवं समभाषत ॥५०॥ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्ध
वसंवादे षष्ठोध्यायः ६

नो ब्रह्म ... रेतसः ॥४७॥ ... हि ... शैः कथं वित्तरंति वयं त्वन्नापासेनैव तरिष्याम इत्याह ॥ वातरशना इति ऊर्द्ध्वमंथिनः ऊर्द्ध्व
... भक्तैः सह वार्त्तया ॥४८॥ क्ष्वेली परिहासः चंदेकत्वं ॥४९॥ एकांतिनमित्यादि त्वायं वचने हेतुः

॥राम॥

॥३२॥

भिप्रा

सहै [illegible] मज्ञानसिध्यै हरिः स्वयं प्रभासेन ... स्वर्गायेत १ यदात्थेति तत्कुलमिति सर्वांशे
वैकुं ... संप्रति २ तं चकर्तव्यत्वेनाह निष्पादितं ... कुत्रमाह कुलमिति त्रिभिः ३ तदेवायं नष्टमंगलो भविष्यति
४ ... त्वया ५ ... ननु गुणदोषाभ्यां विषमत्वात्कथं समदृष्टित्वं ... प्राह यदिदमिति ... दिभि

श्रीभगवानुवाच ॥ यदात्थ पा महाभाग तच्चिकीर्षितमेव मे ॥ ब्रह्मा भवो लोकपालाः स्वर्वासं मेऽभि-
कांक्षिणः ॥ १ मया निष्पादितं ह्यत्र देवकार्यमशेषतः ॥ यदर्थमवतीर्णोऽहमंशेन ब्रह्मणार्थितः ॥
कुलं वै शापनिर्दग्धं नंक्ष्यत्यन्योन्यविग्रहात् ॥ समुद्रः सप्तमे ह्येतां पुरीं च प्लावयिष्यति ॥ ३ यर्ह्ये-
वायं मया त्यक्तो लोकोऽयं नष्टमंगलः ॥ भविष्यत्यचिरात्साधो कलिनापि निराकृतः ॥ ४ न व-
स्तव्यं त्वयैवेह मया त्यक्ते महीतले ॥ जनोऽधर्मरुचिर्भद्र भविष्यति कलौ युगे ॥ ५ ॥ त्वं तु सर्वं परित्य-
ज्य स्नेहं स्वजनबंधुषु ॥ मय्यावेश्य मनः सम्यक् समदृग्विचरस्व गां ॥ ६ यदिदं मनसा वाचा
चक्षुर्भ्यां श्रवणादिभिः ॥ नश्वरं गृह्यमाणं च विद्धि मायामनोमयं ॥ ७ ॥ पुंसोऽयुक्तस्य नानार्थो भ्रमः
सगुणदोषभाक् ॥ कर्माकर्मविकर्मेति गुणदोषधियो भिदा ॥ ८ ॥ श्रीरामो जयति ०

गृह्यमाणं मनोमयं तन्मायेति विद्धि तदपि नश्वरं किं तु नश्वरं च विद्धि ७ मनोमयत्वे हेतुः पुंस इति अयुक्त-
स्य विक्षिप्तमनसः नानार्थो भेदविषयो भ्रमः स भ्रमश्च गुणदोषभाक् ननु वेदेनैव विधिनिषेधाभ्यां भेदस्य
सत्यतोक्ता मैवं भ्रम इत्युक्तमेव गुणदोषबुद्धेः पुंसः कर्म विहितं अकर्म नित्यलोपः विकर्म निषिद्धमिति भेदः [illegible]

[illegible]

कथमात्मनि पादच्छिन्ने वितंतं जगदीक्षणीयं तत्राह आत्मानमिति मयि ब्रह्मणि तद्रूपेणेक्षस्व ९ नन्वेवं युक्तचित्तत्वेन कर्म्माकरणे देवा स्यो विघ्नं करिष्यंति तत्राह ज्ञानेति ज्ञानं वेदतात्पर्यनिश्चयः विज्ञानं तदर्थानुभवः ताभ्यां सम्प्रयुक्तः ततश्च आत्मानुभवेनैव तुष्टचित्तः अतः शारीरिणां देवादीनां आत्मभूतः अंतरायैर्न प्रतिहन्यसे यावद्धनुभवं यथासंभवं वर्णाश्रमकर्माणि कुर्यादेव तदनंतरं सर्वेषामात्मभूतत्वात्तत्कारणेपि विघ्नाचरतीति तथा च श्रुतिः यस्य हन्ते स्वां अनाभूत्याईशाते आत्माह्येषां स भवतीति १० मचोत्पन्नस्य विज्ञान

तस्माद्युक्तेंद्रियग्रामो युक्तचित्त इदं जगत॥ आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरे॥९॥ ज्ञानविज्ञानसंयुक्त आत्मभूतः शरीरिणां॥ आत्मानुभवतुष्टात्मा नांतरायैर्विहन्यसे॥१०॥ दोषबुद्ध्योभयातीतो निषेधान्न निवर्त्तते॥ गुणबुद्ध्या च विहितं न करोति यथार्भकः॥११॥ सर्वभूतसुहृच्छांतो ज्ञानविज्ञाननिश्चयः॥ पश्यन्मदात्मकं विश्वं न विपद्येत वै पुनः॥१२॥ श्रीशुक उवाच॥ इत्यादिष्टो भगवता महाभागवतो नृप॥ उद्धवः प्रणिपत्याह तत्त्वं जिज्ञासुरच्युतं॥१३॥ श्रीराम

स्यापि यथोक्ताचरणप्रसंगइत्याह दोषबुद्ध्येति गुणदोषबुद्ध्यातीतोपि प्राक्तनसंस्कारान्निषेधान्निवर्त्तत एव किंतु न दोषबुद्ध्या विहितं च प्रायशः॥ करोति न गुणबुद्ध्या॥ यथार्भकः संकल्पविकल्परहितः किंचित्करोति कुतश्चिन्निवर्त्तते तद्वत्॥ ११॥ १२॥ एवंभूतस्य न पुनः॥ संसार इत्याह सर्वभूतेति विपद्येत न पुनः संसरन्

राम

त्वेनु सर्वं परित्यज्य उपदेशमात्मनो ऽयोग्यं मन्वानः पृच्छति योगेशेति योगफलदायिन् योगविन्यासेन
आतिगोप्यो निक्षेपविशेषः यद्वा योगो विन्यस्यते क्रियते तस्मिन् योगे प्राप्तः प्रकटो भवति यस्य योः स्वरूपे ति
वा योगस्य संभवो यस्मात् चतुर्भिरेतत्संबोधनैः स्वमहिम्ना केवलं त्वयोपदिष्टं नतु मदधिकारं पर्यालोच्ये
ति नश्राह निःश्रेयसायेति नचायं रागप्राप्त्यर्थं सर्वस्वदानादिवित्यागः किंतु संन्यासलक्षणः अप्रस्ता
पतिरूपः १४ १५ यं प्रतित्यागाद्युपदिष्टः सोहं मम मूढमतिः कुतः ममेति अहमिति च सानुबंधे पुत्रादिस

उद्धव उवाच॥ योगेश योगविन्यास योगात्मन्योगसंभव॥ निःश्रेयसाय मे प्रोक्तस्त्या
गः सन्न्यासलक्षणः॥१४॥ त्यागोयं दुष्करो भूमन्कामानां विषयात्मभिः॥ सुतरां त्वयि सर्वा
त्मन्नभक्तैरिति मे मतिः॥१५॥ सोहं ममाहमिति मूढमतिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबं
धे॥ तत्त्वंजसा निगदितं भवता यथाहं संसाधयामि भगवन्ननुशाधि भृत्यं॥१६॥ सत्यस्य ते स्वदृश
आत्मन आत्मनोन्यं वक्तारमीश विबुधेष्वपि नानुचक्षे॥ सर्वे विमोहितधियस्तव माययेमे ब्रह्मा
द्यस्तनुभृतो बहिरर्थभावाः॥१७॥ श्री॰

क्षिते त्वन्मायया विरचिते आत्मनि देहे तिविगाढो ऽतिमग्नः अतः नु भवति गदितं यथाहमंजसा संसाधयामित
थाभृत्यं मामनुशाधि शाधि शिक्षय १६ मया संक्षेपतः उक्तं विस्तरतस्त्वन्यं पृच्छेति चेत् अत आह सत्यस्येति
त्वदृशः प्रकाशस्य सत्यस्य आत्मनः आत्मनो मां प्रति वक्तारं ते लक्ष्म अन्यं नानुपश्यामि स्वसदृशः स्वतः सिद्ध
ज्ञानात् ततोन्यमितिवा कुत इत्यत आह सर्व इति बहिरर्थभाव विषये यथेष्टश्च यः १७ श्रीराम रामो राम

किंचिद्दुःशीला भवंतीति किं तस्यैव तापः फलकाले किं न स्पृशतीति केचिज्ज्ञाः केचिद्दुःखेऽसमर्थाः केचिन्नु स्थानभ्रष्टाः तस्मात्त्व
वनवद्यमनवद्यमित्यादीनि पंच विशेषणानि अनंतः कालतः पारं देशतश्च यस्य न कालादिभिरकुंठो लोकधिष्ण्यं
स्थानं यस्य न उ हे भगवन् अहमुत्कटनिर्वेदहेतुः वृजिनैर्दुःखैरभितप्तः हकारमगोरेवाय अकारोऽसंयुक्त इव पठनीयः न
नवद्यत्वादीनि कुतो मम तदाह नारायणमिति अर्जुनं कपित माह नरपते संशिष्यते भूतसृजत इंद्रियैरितिनरो जीवः
तं स्वशाखायं तं भवंतं शरणं प्रपद्ये १८ तदेवमसंभावनां विपरीतभावनां अपाभ्यां परिहृतत्वमन्नवगाहमानं प्रति

तस्मात्त्वंतमनवद्यमनंतपारंसर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यं॥ निर्विण्णधीरहमुहेवृजनाभि
तप्तोनारायणंनरसखंशरणंप्रपद्ये॥१८॥श्रीभगवानुवाच॥ प्रायेणमनुजालोके लोकतत्व
विचक्षणाः समुद्धरंतिह्यात्मानमात्मनैवाशुभाशयात् १९ आत्मनोगुरुरात्मैवपुरुषस्यवि
शेषतः यत्प्रत्यक्षानुमानाभ्यांश्रेयोऽसावनुविंदते २० पुरुषत्वेचमांधीराःसांख्ययोगविशार
दाः आविस्तरांप्रपश्यंतिसर्वशक्त्युपबृंहितं २१

तन्निवृत्तये गुरूपदेशं विनापि स्वान्वयव्यतिरेकाभ्यामेव तत्त्वप्रतिपत्तिर्भवतीति दर्शयितुमाह प्रायेणेति
लोकतत्त्वस्य विचक्षणाः परीक्षकाः अशुभाशयात् विषयवासनातः १९ तदुपपादयति आत्मन इति पश्वादिरपि तावत्
पश्वादिरिवात्मनो हिताहितज्ञानाद्गुरुः २० तत्र प्रत्यक्षं दर्शयति पुरुषत्वे चेति तत्राप्याह पुरुषत्वेवाविस्तरं
रमाहीत्मासहि प्रज्ञानेन संपन्ना उत्तमो विज्ञातं पश्यतीत्यस्य सत्त्वं वे श्लोकालोकेऽमर्त्येनाभ्यनमीप्सते

अत पुरुषत्वं सेतीति एकेति २२ अनुमानमाह अत्रेति अत्र पौरुषं योनिग्रहणं प्रमाणाः अग्राह्यं ग्राह्येष्वाह कारादिभ्यो व्यतिरिक्तं मां अद्धा साक्षात् मार्गयंति मार्गणप्रकारद्वयमाह गृह्यमाणैर्गुणैर्बुद्ध्यादिभिर्गुणैर्हेतुभिः ज्ञानं प्रकाशः स्वकार्यमेनं विना न घटत इति अनुपपत्तिमुखेन लक्षके तथा तैरेव लिंगैः व्याप्तमुखेनानु मानत ईश्वरं वर्त्तकं मार्गयंते बुद्ध्यादिकारणानि कर्त्तृप्रयोजानि करणत्वाद्वास्यादिवदिति तदुक्तं भगवा

एकद्वित्रिचतुःपादैर्बहुपादैस्तथापदैः ॥ बह्व्यः संति पुरः सृष्टास्तासां मे पौरुषी प्रिया ॥ २२ ॥ अत्र मां मार्गयंत्यद्धा युक्ता हेतुभिरीश्वरं ॥ गृह्यमाणैर्गुणैर्लिंगैरग्राह्यमनुमानतः ॥ २३ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ अवधूतस्य संवादं यदोरमिततेजसः ॥ २४ ॥ अवधूतं द्विजं किंचिच्चरंतमकुतोभयं ॥ कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित् ॥ २५ ॥ यदुरुवाच ॥ कुतो बुद्धिरियं ब्रह्मन्नकर्त्तुः सुविशारदा ॥ यामासाद्य भवान् लोकं विद्वांश्चरति बालवत् ॥ २६ ॥ प्रायो धर्मार्थकामेषु विवित्सायां च मानवः ॥ हेतुनैव समीहंते आयुषो यशसः श्रियं ॥ २७ ॥

न्सर्वभूतेषु लक्षितः ॥ स्वात्मना हीरः ॥ इष्टेर्बुध्यादिभिर्द्दृश्यैर्लक्षणैरेन मापकैरिति ॥ नचैतावता अन्य मनिकं अत्रत्वेतिमंतव्यं देहादिव्यतिरिक्तात्वं पदार्थम् बुद्धिमात्रस्यैवानुमानेन विवक्षितत्वा ॥ २३ ॥ अयोन्व यव्यतिरेकाभ्यां संभावनादिनिवृत्ता वितिहासमाह ॥ अत्रापीति ॥ २४ ॥ २५ ॥ सुविशारदः प्रतिनिपुणा ॥ २६ ॥ सर्वलोकवेलक्षण्यमेवाह प्राय इति धर्मादिषु ॥ विवित्सया आत्मतत्त्वदेशाभिमानवाः ॥ समीहंते प्रवर्त्तंते

भा० ९० तं तु न कस्य चित्कर्म्मणः कर्त्ता भवसि न च किं चिदीहसे इच्छसि न च शक्तात्वा अन्यज्ञानेन च प्रश्ने परापेक्ष
३५ वा विरूपत्वेन च प्रवाग्मितया वा जडवत् आसीनं घटत एवं निर्वक्त कल्पतदुत्तरादिना २८ महानानंदश्च तेनके
तइति पृच्छतीतुजनेष्विति सर्वाविषहीन स्वविषयभोगरहितो स्य च्छेत्रे हेतुः केवलात्मनः कलत्रादिश्च त्वं स्व
३० औत्सुक्येवोपाश्रिताः स्वीकृताः तन्न पदेशोक्त प्रथमिपर्यं राणि ३२ श्रु अन्नमेरूपंकी दृश्यकरोतीति तत्र

त्वं तु कल्पः कविर्दक्षः सुभगोमृतभाषणः ॥ न कर्त्ता नेहसे किंचिज्जडोन्मत्तपिशाचवत् ॥ २८ ॥
जनेषु दह्यमानेषु कामलोभदवाग्निना ॥ न तप्यसे ग्निना मुक्तो गंगांभःस्थ इव द्विपः ॥ २९ ॥
त्वं हि नः पृच्छतां ब्रह्मन्नात्मन्यानन्दकारणं ॥ ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ॥ ३० ॥
श्रीभगवानुवाच ॥ यदुनैवं महाभागो ब्राह्मणेन सुमेधसा ॥ पृष्टः सभाजितः प्राह प्रश्रयावनतं द्विजः ॥ ३१ ॥ ब्राह्मण उवाच ॥ संति मे गुरवो राजन्बहवो बुद्ध्युपाश्रिताः ॥ यतो बुद्धिमुपादाय मुक्तो टामीह तान्शृणु ॥ ३२ ॥ पृथिवी वायुराकाशमापो ग्निश्चंद्रमा रविः ॥ कपोतो जगरः सिंधुः पतंगो मधुकृद्गजः ॥ ३३ ॥ मधुहा हरिणो मीनः पिंगला कुररोऽर्भकः ॥ कुमारी शरकृत्सर्प ऊर्णनाभिः सुपेशकृत् ॥ ३४ ॥ एते मे गुरवो राजन्चतुर्विंशतिराश्रिताः ॥ शिक्षावृत्तिभिरेतेषामन्वशिक्षमिहात्मनः ॥ ३५ ॥ यतो यदनुशिक्षामि यथा वा नाहुषात्मज ॥ तत्तथा पुरुषव्याघ्र निबोध कथयामि ते ॥ ३६ ॥ भूतैराक्रम्यमाणोपि धीरो दैववशानुगैः ॥ तद्विद्वान्न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतम् ॥ ३७ ॥
पेशकृत् ३४ मेमया आश्रिता सन्ति एते षां वृत्तिभिः आत्मनः शिक्षा शिक्षणीयानर्थो हेयोपादेयादीन

क्षिति शिक्षां स्पष्टं शिक्षितवानस्मि ३५ नहुषो ययातिः ३६
३५ क्षितेः समांसि शिक्षितवानिति भूतैराक्रम्यमाणः पीड्यमानः
तद्विद्वान् भूतानां दैववशवर्त्तित्वं विद्वान् व्रतं नियमम् ३७

पर्वततरूपावनस्तरूपाचयाद्यचिनीतस्याः शिक्षितमाह सश्वदिति सर्वदा परार्थाः परोपकारार्थाः सर्वा ईहा
यस्य सः परार्थ एवैकांततः संभवो यस्य सः भूभृतः पर्वतान् तस्य शिक्षिन्न घतणनिर्झरप्रसवक्रियाः परार्था एव
यथा नगशिष्य वृक्षशिष्यः सन् परात्मतां पराधीनात्मतां वृक्षायेघोपरते स्वो स्वधोत्पाद्युवामयनमप्य
न्मन्यत तत घत ३८ वायुरपि द्विविधः प्राणो बाह्यस्तत्र प्राणस्य गुरुत्वमाह प्राणवृत्त्येति प्राणो ह्या
हारादिमात्रेण प्रवर्त्तते तत्परस्तानिंद्रियविषयैस्तु नेपद्येत तथा मुनिरपि भवेदित्यर्थः प्राणवृत्त्येकारणेम

।शश्वत्परार्थसर्वेहः परार्थैकांतसंभवः। साधुः शिक्षेत भूभृत्तो नगशिष्यः परात्मतां॥३८॥
।प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेंद्रियप्रियैः। ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः॥३९॥वि
।षयेष्वाविशन्योगी नानाधर्मेषु सर्वतः। गुणदोषव्यपेतात्मा न विषज्जेत वायुवत्॥४०॥
।पार्थिवेष्विह देहेषु प्रविष्टस्तद्गुणाश्रयः। गुणैर्न युज्यते योगी गंधैर्वायुरिवात्मदृक्॥४१॥

तोवैकल्येन ज्ञाननाशः स्यात् अतो देहानुर्बाह कर्त्तव्यः गुणलिप्सयं तु वाक्मनश्चविक्षिप्येत अतो
नाधिकं लिप्सेताह ज्ञानमिति नावकीर्येत न विक्षिप्येत ३९ विषयान्नसेवमाने पि तेष्वनासक्ता
बाह्यवायोः शिक्षेदित्याह विषयेष्विति नानाधर्मेषु शीतोष्णादिधर्मकेषु नहि वायुर्वने दहने वास
ज्जते तद्वत ४० यथा वायुर्गंधादिधर्मयोगेन प्रतीयमानोपि वस्तुतो न तद्योगी एवं देहादिधर्मयोगेनाहेतु
तया प्रतीयमानोप्यात्मा न तद्धर्मवानिति संभवति वायोरेव शिक्षितमित्याह पार्थिवेतिद्वितीति ४१ एम

आकाशदृष्टिशिक्षितं संभावनद्धियमाह अंतर्हितश्चेति द्वयेन अंतर्हितश्च देहांतर्गतोपि मुनिरात्मनो देहाद्यसं
गमतएवाव्यवछेदं भावयेत् कुतो स्थिरजंगमेषु समन्वयेन व्याप्तितया किं मरिण्यस्तत्रस्यैव व्याप्तिः न
विततेस्य सर्वगतस्य तत्कुतः ब्रह्मात्मभावेन ब्रह्मस्वरूपभावनया तत्त्वमसीतिश्रुतेः नन्वेतत्सर्वं कथं
संभवितिवाह नभस्तत्तत्तुल्यत्वं संभावयेत् यथा नभसः सर्वगतस्य न घटादिभिः संग परिछेदौ वा एव
मात्मनोपि संभवतीति ४२ किंच कूटस्थस्यात्मनो नागमापायादिदेहादिसंबंध इत्याह तेजोवन्नमयैः
तेजश्च आपश्च अन्नं च पृथिवी च तन्मयैः कालसृष्टैर्गुणैर्देहादिभिः पुमान्न संस्पृश्यत इति नभोवत्संभ

अंतर्हितश्च स्थिरजंगमेषु ब्रह्मात्मभावेन समन्वयेन॥ व्याप्त्याव्यवछेदमसंगमात्मनो मु
निर्नभस्त्वं विततस्य भावयेत्॥ ४२॥ तेजोवन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः॥ न स्पृश्यते न
भस्तद्वत्कालसृष्टैर्गुणैः पुमान्॥ ४३॥ स्वछः प्रकृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणां॥ मुनिः
पुनात्यपां मित्रमीक्षोपस्पर्शकीर्तनैः॥ ४४॥ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः॥ सर्वभक्षो
पि युक्तात्मा नादत्ते मलमग्निवत्॥ ४५॥

नतीति ४३ स्वछत्वादिभिर्गुणैः उदकं जगत्पुनातीति तद्गुणमयाशिक्षिताः इत्याह स्वछः निर्मलाः प्रकृतितः स्वभा
वतः स्निग्धः जने ष्वनुरागवान् माधुर्यः मधुरालापी तीर्थभूः स्थानं अपां मित्रं उदकतुल्यः अघेदिति पाठे सरवाया
पापात्पुनाति स्वच्छतादिगुणैरर्थादुदकशिक्षा दर्शिता ४४ अग्नेः शिक्षितमाह तेजस्वीति तेजस्वीति दुर्द्धानाति
शयाने विप्रावजपराहीनः दुर्धर्षः अक्षोभ्यः सर्वासावुदरभाजनश्च अपरिग्रहः युक्तात्मेति ४५ श्रीराम

अग्नेरेव शिखितांतरमाह क्वचिदिति यथाग्निः परेधयेव हपि गच्छति तथायाग्निरित्याह दान्दर्शाभिजि प्रा
गत्तराशुभं मतं मविष्यपोपं ५ आत्मनो देहोपाधिकमेवोद्भवनीचत्वाद्विस्वाभाविकोमितेप्यग्निवच्छं तेन सं
भावितमित्याह स्वमायेति स्वमायया स्वविषयास्वच्छंदसद्सल्लक्षणा दधीतियेगादिरूपं विप्रस्वक्षुद्रादिरूपं वा ६७
आत्मनो जन्मादि विविकाराभावश्चं द्रष्टांतेन संभावितइत्याह विशर्गेजन्म श्मसानं नाशः तत्रैवं ज्योतिः
शास्त्रप्रक्रिया आप्यमंडलं चंद्रः तेजोमयं मंडलमादित्यः तयोरेकत्र तत्रावस्थानिच्चंद्रो न दृश्यते चक्षुष
आदित्यमंडलेन समदेशस्थितेन व्यवधानात् सा अमावास्या अथ षष्ठिघटिकाभिश्चंद्रेन क्षत्रांतरग

क्वचि छन्नः क्वचित्स्पष्ट उपास्यः श्रेयइच्छतां ॥ अंते सर्वत्र दारीरणां दहन्प्रागत्तराशुभं ॥ ६६ ॥
स्वमायया सृष्टमिदं सदसल्लक्षणं विभुः ॥ प्रविष्ट ईयते तत्तत्स्वरूपोग्निरिवैधसि ॥ ६७ ॥
विशर्गाद्याः श्मशानांता भावा देहस्य नात्मनः ॥ कालनाम्निव चंद्रस्य कालेनाव्यक्तव
र्त्मना ॥ ६८ ॥

इति आदित्यस्तत्रयोदशभिरहोरात्रैः अतः प्रतिपद्मीत्य विषमास्थितस्य आदित्यमंडलस्य पंचदशः
पंचदशो भाग आप्यमंडले मातिविंबितो दृश्यते साकलेत्युच्यते एवं पंचदशभिस्त्रयोदशभिर्नत्रैरहोरा
त्रैरंतमिति राशिचक्रस्य पोशविंशतिनक्षत्रात्मकस्य मध्ये सन्मुखे चंद्रादित्यौ तिष्ठतः तदा सं पर्णप्रतिबिं
बच्छाया लांछितं दृश्यते सा पूर्णिमा तस्यां निषष्ट्यमावास्या प्रतिबिंबेन सह षोडशकला चंद्रः उपचीयते
ततः पुनः प्रतिपदमारभ्य मंडलयोर्विप्रकर्षाद्वा कलाह्रासः तत्र यथाकलानामेवोत्पत्तिस्यो नाप्यमंडल

भा०ए०
३१

सिद्धविलोकनेनाविनष्टांतो देहानां सर्गभंगुरतया वैराग्यं शिक्षितमित्याह कालेनेति ओघवद्वेगो जवो यस्य तेन अनात्मना संबंधिनां भूतानां देहानामित्यर्थः अर्चिषां ज्वालानां ४९ प्रादित्याच्छिक्षितमाह गुणैरिति गुणैरिंद्रियैर्गुणा न्विषयान् रसेन यथाकालं प्रार्थन्यासगते सति विमुंचति च न तेषु युज्यते लब्धमिति वाभिनिवेशं न करोति गोभिः रश्मिभिः गाः जलानि गोपतिः सूर्यो यथा ५० स्वतो भेदस्तत्परस्यात्मनो भेदप्रतीतिरुपाधिवशादिति दृष्टां

कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ ॥ नित्यावपि न दृश्येते आत्मनोग्नेर्यथार्चिषं ४९ ॥ गुणैर्गुणानुपादत्ते यथाकालं विमुंचति ॥ न तेषु युज्यते योगी गोभिर्गा इव गोपतिः ॥ ५० ॥ बुध्यते स्वे न भेदेन व्यक्तिस्थ इव तद्गतः ॥ लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोर्कवत् ॥ ५१ ॥ नातिस्नेहः प्रसंगो वा कर्त्तव्यः क्वापि केनचित् ॥ कुर्वन्विंदेत संतापं कपोत इव दीनधीः ॥ ५२ ॥ कपोतः कश्चनारण्ये कृतनीडो वनस्पतौ ॥ कपोत्या भार्यया सार्द्धमुवास कतिचित्समाः ॥ ५३ ॥ श्रीराम०

तेनैव संभावितमित्याह बुध्यत इति स्वे स्वस्वरूपे अवस्थित आत्मा भेदेन न बुध्यते अभिव्यक्तिर्व्यक्तीति रूपाधिः व्यक्तिस्थः उपाधौ प्रतिबिंबितः तद्गतस्तद्गत इव उपाधिभेदेन स्थूलमतिभिर्लक्ष्यते अर्कवदित्यन्वयः ५१ कपोताच्छिक्षितमाह नातिस्नेह इति स्नेहः प्रीतिः प्रसंग उपलालनाद्यासक्तिः ५२ दृ
ष्टांतं प्रपंचयति कपोतः कश्चनेति ५३

राम
३१

तयोर्मिथस्नेहप्रसंगो दर्शयति। कपोताविति त्रयेण। स्नेहेन गुणितं निबद्धं हृदयं ययोस्तौ। ५४। विश्रब्धौ निःशंकौ। ५५। सा कपोती तर्पयंती सरलस्वीसतालापादिभिः प्रीणयंती। अत एव तेनानुकंपिता सती यं यं वांछति कामं समनयत्। संपादयामास राजन्निति। तं प्रयेतिस्त्विते। ५६। ५७। ते अज न लभरिते सृष्टे हरेः स्वभावकर्मादिशक्तिभिः

कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ। दृष्टिं दृष्ट्यांगमंगेन बुद्धिं बुद्ध्या बबंधतुः॥ ५३॥ शय्यासनाटनस्थानवार्ताक्रीडाशनादिकं। मिथुनीभूय विश्रब्धौ चेरतुर्वनराजिषु॥ ५४॥ यं यं वांछति सा राजंस्तर्पयंत्यनुकंपिता। तं तं समनयत्कामं कृच्छ्रेणाप्यजितेंद्रियः॥ ५५॥ कपोती प्रथमं गर्भं गृह्णंती काल आगते। अंडानि सुषुवे नीडे स्वपत्युः सन्निधौ सती॥ ५६॥ तेषु काले व्यजायंत रचितावयवा हरेः। शक्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरुहाः॥ ५७॥ प्रजाः पुपुषतुः प्रीतौ दंपती पुत्रवत्सलौ। शृण्वंतौ कूजितं तासां निर्वृतौ कलभाषितैः॥ ५८॥ तासां पतत्रैः सुस्पर्शैः कूजितैर्मुग्धचेष्टितैः। प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः॥ ५९॥ स्नेहानुबद्धहृदयावन्योन्यं विष्णुमायया। विमोहितौ दीनधियौ शिशून्पुपुषतुः प्रजाः॥ ६०॥ एकदा जग्मतुस्तासामन्नार्थं तौ कुटुंबिनौ। परितः कानने तस्मिन्नर्थिनौ चेरतुश्चिरं॥ ६१॥ दृष्ट्वा तान् लुब्धकः कश्चिद्यदृच्छातो वनेचरः। जगृहे जालमातत्य चरतः स्वालयां

रचितावयवाः पक्षिरूपाः। कोमलान्यंगानि तनूरुहाश्च येषां ते। ५८। ५९। पतत्रैः पक्षैः। अदीनानां हृष्टानां। ६०। शिशूनानां प्रजाः पुत्रान्। ६१। ६२। स्वालयांतिके चरतः क्रीडतः। तान् कपोतपुत्रान्। आतत्य प्रसार्य। ६३। श्री०

उत्सुकौ ताबुद्वेव तत्पोषणार्थं गतौ सन्तौ पोषणं भक्ष्यं ६४ ६५ शिचाजालेन ६६ आत्मानुरूपां भार्यां विललाप भृशोच ६७ विलापमाह त्रिभिर्हो इति अतृप्तस्य स्वसुखे अकृतार्थस्य अदृष्टमसं पादद्युत. ६८ ६९ ७० तांस्तथावृतान्स्पृ

कपोतश्च कपोती च प्रजापोषे सदोत्सुकौ ॥ गतौ पोषणमादाय स्वनीडमुपजग्मतुः ॥ ६४ ॥ कपोती चात्मजान्वीक्ष्य बालकान्जालसंवृतान् ॥ तानभ्यधावत्क्रोशन्ती क्रोशतो भृशदुःखिता ॥ ६५ ॥ सासकृत्स्नेहगुणिता दीनचित्ताजमायया ॥ स्वयं चाबध्यत शिचा बद्धान्पश्यंत्यपस्मृतिः ॥ ६६ ॥ कपोतश्चात्मजान्बद्धानात्मनो प्यधिकान्प्रियान् ॥ भार्यां चात्मसमां दीनो विललापातिदुःखितः ॥ ६७ ॥ अहो मे पश्यतापायमल्पपुण्यस्य दुर्मतेः ॥ अतृप्तस्याकृतार्थस्य गृहस्त्रैवर्गिको हतः ॥ ६८ ॥ अनुरूपानुकूला च यस्य मे पतिदेवता ॥ शून्ये गृहे मां संत्यज्य पुत्रैः स्वर्याति साधुभिः ॥ ६९ ॥ सोहं शून्ये गृहे दीनो मृतदारो मृतप्रजः ॥ जिजीविषे किमर्थं वा विधुरो दुःखजीवितः ॥ ७० ॥ तांस्तथैवावृतान्शिग्भिर्मृत्युग्रस्तान्विचेष्टितः ॥ स्वयं च कृपणः शिक्षु पश्यन्नप्यबुधो पतत् ॥ ७१ ॥ तं लब्ध्वा लुब्धकः क्रूरः कपोतं गृहमेधिनं ॥ कपोतकान्कपोतीं च सिद्धार्थः प्रययौ गृहं ॥ ७२ ॥ एवं कुटुंब्यशांतात्मा द्वंद्वारामः पतत्रिवत् ॥ पुष्णन्कुटुंबं कृपणः सानुबंधो वसीदति ॥ ७३ ॥ यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतं ॥ गृहेषु खगवत्सक्तस्तमारूढच्युतं विदुः ॥ ७४ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे अवधूतसंवादे नाम सप्तमोध्यायः ॥ ७ ॥

न पिधि ॥ जालेषु ७१ ७२ दार्ष्टांतिकेजेजपीति एवमिति ७३ एवं गृहासक्तिः सर्वस्यामप्यनर्थहेतुः सर्वत्र ष्य

अथ भोजरादिभ्यो नवभ्यः शिक्षितं हरिः। अव धूत गिरा प्राह विवेकार्थे एवं प्रति १ प्रारब्ध कर्म्म भोग स्यापि स्वरूपं भा
सतान्तः धर्येषु धैर्यमेवं न्याय्यम् यो वधाकर्त्तव्य इति अजगराघिस्ति तिमित्याह सुखमित्या दिना यदैन्द्रियकं सुखं तत्स्व
र्गे नरके च भवत्येव यथा दुःखं तस्मात् बुधस्तन्नेच्छेत १ शरीर निर्वाह मात्रे स्वयथालब्धेन कर्त्तव्यमित्याह ग्रासमिति
अजगरः अजगरवृत्तिः अक्रियः उदासीनः यद्यन्नापत तितदा किं कर्त्तव्यं तत्र हि शायी तेति अनुपक्रमे इच्छिन्
दैवमेव प्रायकमिति धैर्यवा अ ननु सामर्थ्ये पीश्यपीतेवा किं उमित्याह ओज इति ओज इन्द्रियबलं सहो मनो बलं॥

ब्राह्मण उवाच॥ सुखमैन्द्रियकं राजन् स्वर्गे नरक एव च॥ देहिनां यद्यथा दुःखं तस्मान्नेच्छे
त तद्बुधः॥ १ ग्रासं सुमृष्टं विरसं महान्तं स्तोकमेव च॥ यदृच्छयैवापतितं ग्रसेदाजगरोऽक्रियः॥ श
यीत अहनि भूरीणि निराहारो नुपक्रमः॥ यदि नोपनमेद्ग्रासो महाहिरिव दिष्टभुक्॥ ओ
ॐ
जः सहो बलयुतं बिभ्रद्देहमकर्म्मकं॥ शयानो वीतनिद्रश्च नेहेतेन्द्रियवानपि॥ ८ मुनिः
प्रसन्नगंभीरो दुर्विगाह्यो दुरत्ययः॥ अनन्तपारो ह्यक्षोभ्यः स्तिमितोद इवार्णवः॥ ५॥ श्लो० ॥

बलं शारीरमेव तद्युक्तमपि देहमकर्म्मकमेव बिभ्रत्। शयान एव भवेत्। वीतनिद्रः स्वार्थे तत्त्वविन्निद्रश्च न भवेत्। न पुन
रीहेत इन्द्रियवानपीति दर्शनादि व्यापारमपि निवार्य निवारयति ८ समुद्रात् शिक्षितमाह॥ मुनिरिति वहिः प्र
सन्नश्चासौ अन्तर्गंभीरश्च दुर्विगाह्यः एवंभूत इति परिकल्पितुमशक्यः॥ अलक्ष्याभिप्राय त्वात् दुरत्ययः। अ
नतिक्रमणीयः तेजस्वित्वात् अनन्तपारः कालतो देशाश्चापरिच्छिन्नः। स्वरूप विभावितात् अक्षोभः अकार्यः रागाद्य

भा०९०

३९

नवमासस्स सादेक्ति: सम्यक्भोगेपि रागरो यथाना तस्यर्थत गृहीनेन विहीनो पि न शुष्येत् तथासम्यक्कामस्त्यक्तिनो वाहरखेत
नवारोज्वे स्तिर्थ: प्रत्रहेतु: नारायणपरः ननु विषय पर इति ९ रूपगन्धरसस्पर्शशब्दरसं पंचभिर्विषयैर्मोहि
ताः पतंग मधुर गजहीररणमीना हताः प्रतेसेवना शक्तो पंचैतेग रवः तदुक्तं पतंगमातंगकुरंगभृंगमीना हताः
पंचभिरेव पेच एकः प्रमादी सकथं न हन्यते य: सेव्यता पंचभिरेव पेचे वेति तत्र रूपविलास मोहितो नरपतीति पतं
गाशिक्षितमाह दृष्ट्वेति तस्य भावैः प्रलोभितः ७ स्त्रियं मयलवाणी कृत्येत तस्य पेचयति ८ मधुकरात् शिक्षितमा

सम्यक्कामो हीनो वा नारायणपरो मुनिः ॥ नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः ॥ ६ ॥
दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेन्द्रियः ॥ प्रलोभितः पतत्यन्धे तमस्यग्नौ पतंगवत् ॥ ७ ॥ योषि
द्धिरण्याभरणांबरादिद्रव्येषु मायारचितेषु मूढः ॥ प्रलोभितात्मा ह्युपभोगबुद्ध्या पतंगवन्नश्य
ति नष्टदृष्टिः ॥ ८ ॥ स्तोकं स्तोकं ग्रसेद्ग्रासं देहो वर्तेत यावता ॥ गृहानहिंसन्नातिष्ठेद्वृत्तिं मा
धुकरीं मुनिः ॥ ९ ॥ अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः ॥ सर्वतः सारमादद्यात्पुष्पेभ्य इ
व षट्पदः ॥ १० ॥

हल्लोकमिति गृहानहिंसन्न अहिंसयन अपीडयन अप्रभाव: यथा मधुकरो विशिष्ट गंधलोभेन कस्मिन्नेव
व पद्मे वसन्न स्तमये मुकुलिते तस्मिन्नेव वध्यते एवं मुनिरपि गृहलोभेन गृहमाश्रितस्तन्मोहेन बध्यतेति ९
किंच अणुभ्यश्चेति १० द्विविधो मधुकृत तत्र पुष्पाद्गंधग्राही तम अधुकृत भ्रमरः मधुकरोति आधारस्तेनस्व
पंचात्मकेषु भूतेषु समानेषु च वस्तुतः को भवानिति वः प्रश्नो वाचारंभो ह्यनर्थकः २३
मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपीन्द्रियैः अहमेव न मत्तोऽन्यदिति बुध्यध्वमंजसा २४

ऽनर्थकः कुतः भूतेषु देवमनुष्यादिषु देहेषु पंचात्मकेषु अतः समानेषु अभिन्नेषु पुनश्च वस्तुतः पर
मकारणात्मनाऽभिन्नेषु वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुते २३ तत्र पंचात्म
कत्वमुत्पत्त्यादिसिद्धमेव तिपरमकारणाभेदं दर्शयति मनसेति मनआदिभिर्यद्यद्गृह्यते तत्तन्नाहमे
वेत्यर्थः अतः सातत्त्वविचारेणैतेनैव सर्वात्मकोऽहमित्यंजसा युष्माकं रमत्कं भवति २४ श्रीरामोजयन्नम

भा०११ एवं प्रश्नसंवादेन मिथ्यैव गौणात्मस्वरूपं सामान्यतो निरूप्य ब्रह्मणोऽपि दुष्परिहरं यत्पृष्टं तत्रोत्तरमाह गुणेषु
चित्तस्यादिनापावद्ध्यायसमात्निद्रपमतिप्रायश्र्यदि केवलं भोक्तृत्वादिरूपतया विषयैः संग्रथितं चित्तं बुध्यादि
६२ ग्राह्यवाच्यमेव जीवस्य स्वरूपं भवेत् ततर्हि योगेन घटेत तस्य तु स्वरूपं मत्तं ब्रह्मैव चित्ताध्यासेन तु तत्त्व
नावतया विषयैः संग्रथितं भूतः स्वस्य ब्रह्मत्वभावनया विषयाणां च मिथ्यात्वानुसंधानेन सर्वतो विनिवि
द्य भगवन्तं भजतो भवत्येव परिपूर्णस्वरूपावस्थानमिति हे प्रजाः पुत्रकाः सत्यं गुणेषु चेतः आविशति

गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभाः जीवस्य देह उभयं गुणाश्चेतो मदात्मनः २५
गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् २६
जाग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः २७

गुणाश्च चेतसि एवं गुणाश्चोभयं ग्रथितं मदात्मनो ब्रह्मस्वरूपस्य जीवस्य देहः उपाधिरत उपाधिः ननु स्वरू
पं २५ तस्मात् अभीक्ष्णं पुनः पुनर्गुणसेवया तत्संस्कारेण गुणेष्वाविशच्चित्तं ते च पुनर्वासनारूपेण चि
त्ते प्रकर्षेण भवन्तीति तथा ते गुणाश्चेतश्च एवं यदुभयं तन्मद्रूपः सन् त्यजेत् २६ तत्र जाग्रदाद्यवस्थावतः कू
टस्थत्वरूपतां तत्राह जाग्रत् जागरः स्वप्नः सुषुप्तं चेति भेदेनैता वृत्तयस्तत्त्वस्वाभाविकाः किंतु सत्त्वाज्जागरणं राम
रजसा स्वप्नमादिशेत् प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततमिति वक्ष्यमाणक्रमेण गुणत एव जी ६२
वस्तु विलक्षणः तदवस्थारहित एव निश्चितः कस्तासां साक्षित्वेन २७

ननु तर्हि कथमहं जागमार्त्यादिप्रतीतिस्तत्राह यर्हि यस्मात्सम्यक् संसृतिः सस्त्रामनयेति संसृतिर्बुद्धिः तया बंधो मात्मनो गुणवृत्तीर्ददातीति तस्मान्मयि तुर्ये स्थितः सन्निमं संसृतिबंधं जह्यात् तत्त्यागो गुणाचेतसा गुणाचेतसञ्चान्योन्यत्यागो भवति २८ कथं संसृत्यावंधः कथं च तं जह्यात् तदाह अहंकारेणाकृतं बंधमात्मनः अर्थविपर्ययं आनंदघावरणो वेतस्मागुणानां चेतसश्चान्योन्यत्यागो भवति नानर्थहेतुं विद्वान् जानन्सन् विनिर्घद् एतमेतदिति ज्ञात्वा तुर्ये स्थितो भक्त्वा संसारे बुद्धिस्तासिन चिंतां अभिमानं तत्कृतां भोगचिंतां च त्यजेदिति २९ यावदेवं नत्यजेत् तावन्नस्य कर्म्मज्ञानादि सर्वेष्यर्थमित्याह यावदिति

यर्हि संसृतिबंधोयमात्मनो गुणवृत्तिदः मयि तुर्ये स्थितो जह्यात् त्यागस्तद्गुणचेतसां २८

अहंकारकृतं बंधमात्मनोऽर्थविपर्ययं विद्वान्निर्विद्य संसारचिंतां तुर्ये स्थितस्त्यजेत् २९

यावन्नानार्थधीः पुंसो न निवर्त्तेत युक्तिभिः जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ३०

असत्त्वादात्मनोन्येषां भावानां तत्कृता भिदा गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ३१

यद्यपि जागर्त्ति कर्मादिषु तथापि स्वपन् स्वप्नान्पश्यतीति निवभवति यतोऽज्ञः असम्यग्दर्शी अज्ञजागरत्व स्वस्वप्नत्वे दृष्टांतः स्वप्ने इति ३० ननु कथं वेदप्रमितवर्णाश्रमकर्म्मादि नानार्थधीर्निवर्त्तेत तत्राह असत्त्वादिति भावानां देहादीनां तत्कृता भिदा वर्णाश्रमादिरूपा गतयः स्वर्गादिफलानि हेतवः कर्म्माणि चास्यात्मनो मृषा अविद्यावद्विषया वेद इति भावः अविद्यावतां विषयः ३१ ३१ ३१ ३१ ३१ ३१ ३१

युक्तिभिरित्युक्तं तदेव युक्त्याह य इति अर्थान्स्थूलान् देहादीन्समस्तकरणैश्चक्षुरादिभिर्भुंक्ते कथंभूतान्
अनुक्षणधर्मिणः क्षणिकत्वात्परिणामादिधर्मवतः यश्च स्वप्ने हृदि जाग्रद्वत्सदृक्षान् वासनामयान्भुं
क्ते यश्च सुषुप्ते तान् देहादीन्सर्वानुपसंहरति स एकः कुतः त्रिगुणवृत्तिदृक् अवस्थात्रयद्रष्टा न तु जा
ग्रदवस्थां सर्वेंद्रियाणां पतिः स्वप्ने मनः सुषुप्ते तत्संस्कारशेषा बुद्धिः कथं मात्मा तद्द्रष्टा तत्राह स्मृ

यो जागरे बहिरनुक्षणधर्मिणोर्थान्भुंक्ते समस्तकरणैर्हृदि तत्सदृक्षान् स्वप्ने सुषुप्त उ
पसंहरते स एकः स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिंद्रियेशः ३२ एवं विमृश्य गुणतो मनसस्त्र्य
वस्था मन्मायया मयि कृता इति निश्चितार्थाः संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना
भजत माखिलसंशयाधिं ३३

इंद्रियेशः नन्विंद्रियेशाः अपि विश्वतैजसप्राज्ञा भिन्नाः न कुतः स्मृत्या प्रतिसंधानेन सर्वावस्थास्वन्वयात्
यः स्वप्नमद्राक्षं यश्च तदनंतरं किंचिदवेदिषं स एव एतर्हि जागर्मीति उपाधिभेदेन विश्वादिव्यवहार इति भावः
एतेन बाल्यवार्धक्यावस्थास्वपि प्रतिसंधानेनात्मैक्यं द्रष्टव्यं ३२ ततः किमत आह एवमिति गुणतो या एता
मनसस्त्र्यवस्थाः मन्मायया मयि कृताः न तत्त्वतः संतीति निश्चितः आत्मरूपोर्थो यैस्ते यूयं अखिलसंश
यानामाधिं आधीयते अस्मिन्निति आधिरहंकारः तं संछिद्य हार्दं हृदि स्थितं मां भजत केन छित्त्वा तत्राह अ
नुमानैः सदुक्तिभिः सतामुपदेशैः च अतितीक्ष्णेन ज्ञानेन खड्गेन ३३ श्रीरामो जयति श्री॰

राम

ऽप्रञ्चमाना निदर्शयति ईक्षेतेति इदं जगत् विभ्रममीक्षेत तत्र हेतवः मनोविजृम्भितत्वात् दृष्टत्वात् विनाशि
त्वात् स्वप्नवत् प्रतीतिं च चलत्वाच्च अलातचक्रवत् ननु भ्रमोऽपि निर्विषयः कथं स्यात्तत्राह विज्ञानमि
ति निगमनं तस्मात्त्रिधायं गुणपरिणामतो विकल्पो भेदः समायेति ३४ तस्मात्ततो दृश्यात् दृष्टिं प्र
तिनिवर्त्य निजसुखानुभवो भवेत् तन्नैष्कल्पावार्थनिवृत्तः सन्स्तूष्णीं निरीहश्च भवेत् मनोवाक्कायव्या
पाररहित इत्यर्थः ननु देहवतः सर्वथा द्वैतदृष्टिप्रतिनिवर्त्तनायोगात्कुतः संसारस्पर्शो ऽस्वतत्राह संदृश्य

ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रं विज्ञानमेवमुरुधे
व विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ३४ दृष्टिं ततः प्रतिनिवर्त्य निवृत्त
तृष्णस्तूष्णीं भवेन्निजसुखानुभवो निरीहः संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय
न भवेत्स्मृतिरानिपातात् ३५ देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्य
गमत्स्वरूपं दैवादुपेतमत दैववशादपेतं वासो यथा परिकृतं मदिरामदान्धः ३६

तदिति क्वचित्तु वश्रपकाहारादिषु यद्यपीदं दृश्यते तथापि पूर्वमवस्तुबुद्ध्या यत्त्यक्तं तत्पुनर्मोहाय न भवेदेव किंतु दे
हपातपर्यन्तं स्मृतिरिव स्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः ३५ एतदेवोपपादयति देहमिति आस
नादौ स्थितं उत्थाय तत्रैव स्थितं ततः क्वचिद्रूपेतं निर्गतं पुनस्तत्रैवोपेतं वा देहमपि नानुसंधत्ते कुतोऽन्यत् यतो येन
देहेन स्वरूपमध्यगमत् ज्ञातवान् तद्देहं यतः कारणादिति वा परिकृतं परिहितं वासो गतं स्थितं वा यथा न

नन्वेवं पः परिपाल्यमानोपि मर्त्यतीति तं वैनभ्यप श्यति तर्हि पतेदेव नेत्याह देहोपीति दैववशगैनेनागम्यन
त्वारंभकं कर्म्म यावदस्ति तावत्सूर्यतं प्रतिसमीक्षमाणत एव जीवत्येव सासुः प्राणेंद्रियसहितः ननु तर्हि
स्मिन्नकस्माच्चित्प्रसज्जेतापिनेत्याह तमितिस्वाप्नंस्वप्नतुल्यं सप्रपंचं समारूढः प्राप्त समाधिपर्यंतोयोगोयेन
अतएव प्रतिबुद्धं ज्ञातं परमार्थवस्तु येन सः तथाश्रुतिः तस्य तावदेव चिरं यावन्न विमोक्षेत अथ सं
पत्स्यत इति ३७ उक्तार्थेतिं विश्वासार्थं स्वस्वरूपमाहयथेति सांख्यमात्मानात्मविवेकः योगोष्टांगः तयो

देहोपि दैववशगः खलु कर्म्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः तं सप्रपंचमधि
रूढसमाधियोगः स्वप्नं पुनर्नभजते प्रतिबुद्धवस्तुः ३७ मयैतदुक्तं वो विप्रा गुह्यं यत्सांख्य
योगयोः जानीत मागतं यज्ञं युष्मद्धर्मविवक्षया ३८ अहं योगस्य सांख्यस्य सत्यस्यर्त्तस्य
तेजसः परायणं द्विजश्रेष्ठाः श्रियः कीर्त्तेर्दमस्य च ३९ मां भजंति गुणाः सर्वे निर्गुणं नि
रपेक्षकं सुहृदं प्रियमात्मानं साम्यासंगादयो गुणाः ४० इति मे छिन्नसंदेहा मुनयः सन
कादयः सभाजयित्वा परया भक्त्यागृणत संस्तवैः ४१ तैरहं पूजितः सम्यक् संस्तुतः परम
र्षिभिः प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ४२ इति श्रीभागवते महापुराणे एकादश
स्कंधे त्रयोदशोध्यायः १३

गुह्यमहस्य यज्ञो विष्णुस्तं युष्मद्धर्मविवक्षये त्यनेन धर्मोपदेष्टुरुपदिष्टा इति ज्ञेयं ३८ अतएवं यत्तेन हंस
रूपेणावतरणो नाम ताग्रामाधवे... वाहे भविष्यति सप्तदशोऽध्याये अतं प्रतीयमानो धर्मः सत्यं यथार्थ
समानो धर्मः तेजः प्रभावः एतेषां परमायनं ३९ मामिति कथं भूताः गुणा गुणपरिणामात्मरूपा न भवंति

चतुर्दशे तु परं श्रेयो भक्तिरेव न चेतरत् इत्येतद्भगवत्प्रणिधानयोगश्च सह साधनैः १ एवं तावद्भगवता भक्तियोगो मुख्य त्वेन प्रोक्तः अन्यानि साधनानि वदंति तत्र विशेषानिर्धारणाय पृच्छति श्रेयांसि श्रेयःसाधनानि किं विकल्पेन प्राधान्यं उताहो वा एकस्यैव मुख्यता एकमुख्यता १ प्रश्नोत्थाने कारणं भवतीति साधनत्वे प्राधान्यमेव सर्वेषां उतांगांगित्वं प्राधान्ये विकिं विकल्पेन सर्वेषां तुल्यता फलं यद्वा कश्चिदस्ति विशेष इति २ तत्र

॥श्रीउद्धवउवाच॥ वदंति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः तेषां विकल्पप्राधान्यमुताहो एकमुख्यता १ भवतोदाहृतः स्वामिन्भक्तियोगोनपेक्षितः निरस्य सर्वतः संगं येन त्वय्याविशेन्मनः २ ॥श्रीभगवानुवाच॥ कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ३ तेन प्रोक्ता स्वपुत्राय मनवे पूर्वजाय सा ततो भृग्वादयोगृह्णन् सप्त ब्रह्ममहर्षयः ४ तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः मनुष्याः सिद्धगंधर्वाः सविद्याधर चारणाः ५

भक्तिरेव महाफलत्वेन मुख्या अन्यानि तु प्रस्वस्वप्रकृत्यानुसारेण पुष्पस्थानीयस्वर्गादिफलबुद्धिभिः प्राणिभिः प्राधान्येन परिकल्पितानि निश्चद्रकर्मफलानि। इति विवेकुं प्रकृत्यनुसारेणावृत्तधा वेदार्थप्रतिपत्तिमाह कालेनेति सप्तभिः मदात्मकः मय्येवासावित्यन्येन सः ३ भृग्वादयः भृगुश्च मरीचिरंगिराः सौ पुलस्त्यः पुलहः क्रतुर्वसिते च सप्त ब्राह्मणाः प्रजापतयः ते च ते महर्षयश्च ४ ५ श्रीरामराम

किंदेवाः क्लमस्वेदर्गंधाहिराहित्येन विदेवाः मनुष्यावेतिसंदेहास्पदत्वात् दीपांतरमनुष्याः एवं किन्नराः किन्न
राइवनरवतःशरीरतोवा किंपुरुषाः किंचित्पुरुषाश्चवानराद्युयः प्रकृतयोवासृजाः वष्यकुतःस्त्वःसत्वतमांसिगुणः
जन्मस्थानानियासांताः ६ भूतानिदेवासुरमनुष्यादीनि चित्राश्चवाः वेदपर्वाख्यानितिषयाः ७ एवमित्युक्तो
पसंहारः केचिचित्वंचिद्ध्ययनाद्विनाशानामुपदेशाश्चपारंपर्येण अपरेपाखंडमतयः वेदविरुद्धमतयः ८ तस्यक्त
तीनांमायागुणामलत्वात् मन्मायामोहितधियः अनेकांतंनानाविधं ९ तदेवाहधर्ममितिसार्द्धेनधर्म्मकर्ममी
मांसकाः तदुक्तंमोक्षार्थीनप्रवर्त्तेततत्रकाम्यनिषिद्धयोः नित्यनैमित्तिकंकुर्यात्प्रत्यवायजिहासयेत्यादि यशःकव्या

किंदेवाः किन्नरानागारक्षः किंपुरुषाद्यः वद्यस्तेषांप्रकृतयोरजःसत्वतमोभवः ६ याभिर्भूता
निभिद्यंतेभूतानांमतयस्तथा यथाप्रकृतितेसर्वेषांचित्रावाचःस्रवंतिहि ७ एवंप्रकृतिवैचित्र्यात्भि
द्यंतेमतयोन्यणां पारंपर्येणकेषांचित्पाखंडमतयोपरे ८ मन्मायामोहितधियःपुरुषाःपुरुष
र्षभ श्रेयोवदंत्यनेकांतंयथाकर्म्मयथारुचिः ९ धर्ममेकेयशश्चान्येकामंसत्यंदमंशमं अन्येवदं
तिस्वार्थंवैऐश्वर्यंत्यागभोजनंकेचित्यज्ञंतपोदानंव्रतानिनियमान्यमान् १० रामराम

लंकारस्तदुक्तं यथाह् यावत्कीर्तिर्मनुष्यस्यपुण्यापुण्यालोकेषुगीयते तावद्वर्षसहस्राणिस्वर्गलोकेमहीपते इतिका
मं वात्स्यायनादयः सत्यंशमंदमंच योगशास्त्रकृतः अन्येदध्यार्थवादिनोदंडनीतिकृतः वैप्रसिद्धैश्वर्यमेवस्वा
र्थंवदंति अन्ये त. सामघुपाया एवश्रेयःसाधनमितितेषांमतंतथैवत्यागंभोजनंचलोकायतिकाः वेदोक्तंयज्ञं
तपोदानंयज्ञोदेवतानांपूजनंचतपश्चदानं १० श्रीमतेरामानुजायनमः

तेषां तुच्छफलत्वमाह आद्यंतवंत इति एषां लोका एते साध्यानि फलानि ममोनिष्ठा मोहावीसान्तोगकालेप्यसत्त्वादिभिः शुचार्पिताः व्याप्ताः ११ भक्तानां सुखत्वमाह मयीति यावत्समाप्ति हे सभ्य मया परमानन्दरूपेण आत्मनास्वरूपत्वेन स्फुरता १२ किंच अन्येषां तत्तल्लोकार्थिभिः छिन्नं सुखं भक्तस्य तु परिपूर्णमित्याह अकिंचनस्येति १३ परिपूर्णतामेवाह न पारमेष्ठ्यमिति रसाधिपत्यं पातालादिस्वाम्यं अपु

आद्यंतवंत एवैषां लोकाः कर्म्मविनिर्मिताः दुःखोदर्कास्तमोनिष्ठाः क्षुद्रानंदाः शुचार्पिताः ११
मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः मयात्मना सुखं यत्तत्कुतः स्याद्विषयात्मनाम् १२
अकिंचनस्य दांतस्य शांतस्य समचेतसः मया संतुष्टमनसः सर्वाः सुखमया दिशः १३
न पारमेष्ठ्यं न महेंद्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यं न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत् १४ न तथा मे प्रियतम आत्मयोनिर्न शंकरः न च संकर्षणो न श्री-र्नैवात्मा च यथा भवान् १५ निरपेक्षं मुनिं शांतं निर्वैरं समदर्शनं अनुव्रजाम्यहं नित्यं पू-
येयेत्यंघ्रिरेणुभिः १६

नर्भवं मोक्षमपि मद्विना मां हित्वा अन्यन्नेच्छति किंतु मामेव तस्य प्रेष्ठ इत्यर्थः १४ ममापि स एव प्रेष्ठ इत्याह न तथेति द्वाभ्यां आत्मयोनिर्ब्रह्मा पुत्रोपि शंकरः मत्स्वरूपभूतोऽपि संकर्षणः भ्राता पि श्रीर्भार्यापि किं बहुना आत्मापि यथा भक्तः इति वक्तव्ये प्रीतिहर्षेणाह भवानिति १५ पूयेयमहं तदंघ्रिरेणुभिः लोकानि पावनी कुर्यामिति भावेनेत्यर्थः १६

८८५ यु ३ [illegible]

किंच मद्भक्तानां सुखं एतावदेवंभूतमिति वा को वक्तुं समर्थः यतस्तत्स्वसंवेद्यं निरुपाधिममित्याह निःकिंच
नाइति महांतः निरहंमानाः अनालब्धधियः अस्पष्टचित्ताः निष्किंचनात्वादीनां यथेष्टं हेतुहेतुमद्भावः
एवंभूता मममदीपाः यत्सुखं जुष्वंतिसे तेतत्सुखं तएवलभंते नविदुः नान्येकृतः नैरपेक्ष्यं नालिप्सापेक्षरी
यथेषां ते निरपेक्षाः तैरेवलभ्यं न तु मोक्षापेक्षरैपीत्यर्थः यद्वा एवंभूतास्संतो ये मामित्यर्थः जुषंते प्रीणं
ति त एव यन्नैरपेक्ष्यं सुखं तद्विदुर्नान्य इत्यन्वयः १७ अपि च आरब्धा तावदुत्तमभक्तकथायतः प्राकृ

निष्किंचना मय्यनुरक्तचेतसः शांता महांतोऽखिलजीववत्सलाः कामैरनालब्धधियो जुषंति
यत्तन्नैरपेक्ष्यं न विदुः सुखं मम १७ बाध्यमानोपि मद्भक्तो विषयैरजितेंद्रियः प्रायः प्रगल्भया भक्त्या
विषयैर्नाभिभूयते १८ यथाग्निः सुसमृद्धार्चिः करोत्येधांसि भस्मसात् तथा मद्विषया भक्तिरुद्धवै
नांसि कृत्स्नशः १९ न साधयति मां योगो न सांख्यं धर्म उद्धव न स्वाध्यायस्तपस्त्यागो यथा
भक्तिर्ममोर्जिता २० भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सतां भक्तिः पुनाति मन्निष्ठा श्वपा
कानपि संभवात् २१ धर्मः सत्यदयोपेतो विद्या वा तपसान्विता मद्भक्त्यापेतमात्मानं न सम्यक्
प्रपुनाति हि २२ श्री०

तेऽपि भक्ताः कृतार्था एवेत्याह बाध्यमान इति द्वाभ्यां विषयैराकृष्यमाणोपि प्रगल्भया समर्थया १८ पाकाधि
र्थं प्रज्वालितोऽग्निर्यथा काष्ठानि भस्मीकरोति तथा रागादिनाऽपि कृतं चिन्मद्विषया सती भक्तिः स
मस्तपापानीति १९ भगवानपि स्वभक्तिमहिमाश्चर्यपरास्संबोधयति अहो उद्धवेति स्वयं परिपुष्टित्यतः

रोमहर्षादिकं विना कथं भक्तिर्मिते भक्त्या च विना कथमाशयः शुध्येदिति २३ किंच भक्तिः स्वाश्रयं शोधयंतीति किंवा
च्यं यतो वाग्गद्गदेत्यादिलक्षणो मद्भक्तियुक्तो लोकं सर्वं पुनातीत्याह वागिति २४ अपि च भक्त्यैवात्मशुद्धिर्नान्येन इति
सदृष्टांतमाह यथेति यथाग्निना ध्मातं तापितमेव हेम सुवर्णं स्वंतर्मलं जहाति न क्षालनादिभिः स्वं निजं रूपं च भज
ते कर्मानुशयं कर्मवासनां मां भजते मद्रूपतामापद्यते २५ ननु ब्रह्मविदाप्नोति परं तमेव विदित्वाऽतिमृत्युमेतीत्यादि

नपुमौतिम

कथं विना रोमहर्षं द्रवता चेतसा विना विनानंदाश्रुकलया शुध्येद्भक्त्या विनाशयः २३ वाग्गद्गदा द्र
वते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुना
ति २४ यथाग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते च रूपं आत्मा च कर्मानुशयं विधूय मद्भक्तियो
गेन भजत्यथो मां २५ यथा यथाऽत्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः तथा तथा पश्यति
वस्तु सूक्ष्मं चक्षुर्यथैवांजनसंप्रयुक्तम् २६ विषयान्ध्यायतश्चित्तं विषयेषु विषज्जते मामनुस्म
रतश्चित्तं मय्येव प्रविलीयते २७

श्रुतिभ्यो ज्ञानादेवाविद्यानिवृत्त्यात्मप्राप्तिर्गम्यते कुतो भक्तियोगेनेत्युच्यते तत्राह यथा यथेति आत्मा चित्तं प
रिमृज्यते शोध्यते मत्पुण्यकथानां श्रवणैरभिधानैश्च भक्तेरेवांतरव्यापारो ज्ञानं न पृथगित्यर्थः २६ किंच ज्ञानं ना
म चित्तस्य मदाकारपरिणामः स च मां भजतः स्वभावत एव भवति न च यत्नांतरमपेक्षत इति सदृष्टांतमाह वि
षयानिति २७

यस्मादन्यत्साधनं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्तद्विहाय मय्येव मनः समाहितं कुर्वीति प्रकरणा
र्थमुपसंहरति तस्मादिति मद्भावभावितं मद्भावेन भजनेनैव शोधितं २८ विशेषतो वास्यापायनायुक्तं काममार्गपरित्य
ज्याह स्त्रीणामिति आत्मवान्धीरः सन् क्षेमे निर्भये देशे विविक्ते विजने २९ एतदुपपादयति न तथेति अस्य पुंसः
यथा तत्संगिसंगतः क्लेशो भवेत् यथा च बंधो योषित्संगतः तथान्यप्रसंगतो न भवेदिति ३० मां चिंतयेदित्युक्तं तत्र

तस्मादसदभिध्यानं यथा स्वप्नमनोरथं हित्वा मयि समाधत्स्व मनो मद्भावभावितं २८ स्त्रीणां
स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान् क्षेमे विविक्त आसीनश्चिंतयेन्मामतंद्रितः २९ न
तथास्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ३०
श्रीउद्धव उवाच॥ यथा त्वामरविंदाक्ष यादृशं वा यदात्मकं ध्यायेन्मुमुक्षुरेतन्मे ध्यानं मे व
क्तुमर्हसि ३१

कारं पृच्छति यथेति यथेति ध्यानांगप्रश्नः यादृशमिति ध्येयविशेषणप्रश्नः यदात्मकमिति यस्मिन्तानि विशे
षणानि तत्स्वरूपप्रश्नः एतन्मे ध्यानमेव वक्तुमर्हसीति पाठः तत्रायमर्थः ननु मुमुक्षुस्त्वां यथा ध्यायेत्तन्मेव क्तुमर्हसि जि
ज्ञासोः कथनाय मे एतत् तत्त्वदास्यमेव पुरुषार्थः ननु ध्यानेन कृतमस्तीति तदुक्तं त्वयोपमन्त्रणं घ्रुवं धेसा दित्वं
वक्तुमर्हसीति पाठस्तु सुगमः ३१

तत्रध्यानांगत्वेनासनप्राणायामप्रकारमाहसमइतिचतुर्भिः समेनात्ग्रुच्छ्रितेनात्तिनीचेन्यासंजेकंबलादेसम
काम: स्वस्वपासुखमासीन:इतिनास्तिस्वस्तिकादिनियमइत्युक्तं नासाग्रनिरीक्षणंचचित्तस्थैर्यायान्यत्रतल्ल
क्षोवाहिर्दृष्टी:स्थिरचित्त:सुसंयतइतियोगशास्त्रोक्ते: ३२ विपर्ययेणरेचकपूरककुंभकक्रमेणापि यथावामनासा
पूरितं दक्षिणयात्यज्येत्तत्पावापरितवामयेसेवंविपर्ययेणयथोक्तयोगे इडयापूरयेद्वायुंत्यजेत्पिंगलयात
तइति निर्जितेंद्रियइतिप्रत्याहारउक्त: ३२ प्राणोयामोद्विविधः सगर्भोऽगर्भश्चेतितत्रश्रेष्ठत्वात्प्राणवगर्भ

श्रीभगवानुवाच॥ समआसनआसीन:समकायोयथासुखं हस्तावुत्संगआधायस्वना
साग्रनिरीक्षण: ३२ प्राणस्यशोधयेन्मार्गंपूरकुंभकरेचकैः विपर्ययेणापिशनैरभ्यसेन्निर्जि
तेंद्रियः ३३ हृद्यविच्छिन्नमोंकारंघंटानादंविशोर्णवत् प्राणेनोदीर्यतत्राऽथपुन:संवेश
येत्स्वरं ३४ एवंप्रणवसंयुक्तंप्राणमेवसमभ्यसेत् दशकृत्वःत्रिषवणंमासादर्वाग्जिता

निल: ३५

माह हृदीतिद्वाभ्यां मूलाधारादारभ्याविच्छिन्नंसंततंघंटानादतुल्यमोंकारं-हृदिसंस्थितं प्राणेनउदीर्य
ऊर्ध्वंद्वादशांतपर्यंतंनीत्वा कथंविशोर्णवत्कमलनालतंतुवत् तत्रमात्रातीतंस्वरंपंचदशीविंदुसंवेशयेत्
अथपुनरित्यस्यसतंबोविंदुंशिरस्कंकुर्यादित्यर्थ. यद्वामूलाधारादारभ्यमस्तकांतपर्यंतंतुविशातंतुवत्सूक्ष्म
विच्छिन्नसंतंहृदिमनसिप्राणेनोदीर्याभिव्यज्यअथपुनस्तत्रोंकारेघंटनादतुल्यंस्वरंउदात्तनादंस्थिरीकुर्यादिति ३५

भा०ए० एवं प्राणेन शुद्धकायायासमित्यस्योत्तरं ततो ध्यायमित्याह हृत्पुंडरीकमिति सार्द्धेन अंतःस्थं देहांतर्वर्त्ति ऊर्ध्वनालमधोमुखं मुकुलितं च कदलीपुष्पसंकाशं यद्दिस्थितं तद्विपरीतं ध्यात्वेत्यर्थः न्यसेत् चिंतयेत् ३५ सितिष्ठो यदा ध्यानमाह वह्निमध्ये इति सार्द्धैः ध्यानमंगलं ध्यानस्य शुभं विषयं ३७ समं प्रसन्नं रूपावयवं दीर्घाश्चा

६८

हृत्पुंडरीकमंतःस्थमूर्ध्वनालमधोमुखं ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकं ३६
कर्णिकायां न्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरं वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलं ३७
समं प्रशांतं सुमुखं दीर्घचारुचतुर्भुजं सुचारुसुंदरग्रीवं सुकपोलं शुचिस्मितं ३८
समानकर्णविन्यस्तस्फुरन्मकरकुंडलं हेमांबरं घनश्यामं श्रीवत्सश्रीनिकेतनं ३९
शंखचक्रगदापद्मवनमालाविभूषितम् नूपुरैर्विलसत्पादं कौस्तुभप्रभया युतं
४० द्युमत्किरीटकटककटिसूत्रांगदायुतं सर्वांगसुंदरं हृद्यं प्रसादसुमुखेक्षणं ४१

चत्वारो भुजा यस्मिन् तत् सुचारुः प्रीतिरस्य ३८ समानयोः कर्णयोर्विन्यस्ते स्फुरंती मकराकारे कुंडले यस्मिन् तत् श्रीवत्सश्रियोर्निकेतनं वक्षसि दक्षिणवामतस्ताभ्यां युक्तमित्यर्थः ३८ ४० द्युमद्भिः किरीटादिभिः आ समंतत् युतं प्रलंकृतं प्रसादेन शोभनं सुमुखमीक्षणं च यस्मिन् तत् ४० ४१ ४१ ४१

श्राम

६८

सुकुमारं प्रतिकोमलं सविशेषणं ध्यातमुपसंहरति इंद्रियाणीति प्रकर्षेण नयेत् सर्वतः सर्वांगयुक्ते
४२ यादृशीमित्यस्सोन्नरत्वेन सविशेषणमुक्त्वा यद्वात्म कृमित्यसोन्नरतया शनैर्विशेषणत्यागेनमेव समाधि
पर्यंतमाह तदिति त्रिभिः एकत्रांगे अन्यान्यंगानि न चिंतयेत् एकत्रेति यदुक्तं तदंगं दर्शयति सुस्मि
तमिति ४३ व्योम्नि सर्वकारणात्मनि त्यक्त्वा मदारोहः मय्यारूढः ब्रह्मरूपापन्नः सन् न किंचित् ध्यातृध्येयविभा

सुकुमारमभिध्यायेत्सर्वांगेषु मनो दधत् इंद्रियाणींद्रियार्थेभ्यो मनसाकृष्य तन्मनः बुद्ध्या सा
रथिना धीरः प्रणयेन्मयि सर्वतः ४२ तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत् नान्या
नि चिंतयेद्भूयः सुस्मितं भावयेन्मुखं ४३ तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् तच्च त्यक्त्वा
मदारोहो न किंचिदपि चिंतयेत् ४४ एवं समाहितमतिर्मामेवात्मानमात्मनि विचष्टे मयि सर्वात्मन्
ज्योतिर्ज्योतिषि संयुतं ४५ ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः संयास्यत्याशु निर्वाणं द्र
व्यज्ञानक्रियाभ्रमः ४६ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे
नाम चतुर्दशोऽध्यायः १४

गमपि चिंतयेत् ४४ मामेवात्मनि विचष्टे आत्मानं च सर्वात्मनि मयि संयुक्तं विचष्टे ज्योतिर्ज्योतिषि संयुक्तमिवेत्य
न्वयः एवं तत्समाधिपर्यंतं ध्यानस्य फलमाह ४५ ध्यानेनेति मनो युंजतः समाहितमनः द्रव्यज्ञानक्रियाभ्रमः
अधिभूताधिदैवाध्यात्मरूपः द्रष्टृदृश्यदर्शनरूपो वा भ्रमः निर्वाणं शांततां सम्यग्यास्यतीति ४६ इत्येकाद
शे भागवतटीकायां भावार्थदीपिकायां भगवदुद्धवसंवादे ध्यानयोगो नाम चतुर्दशोऽध्यायः १४

ततः पंचदशे प्रोक्ताः सिद्धयो धारणानुगाः श्रीविष्णुपदसंप्राप्तावंतरायतया मताः १ एवं मनो
युंजतो योगिनोऽतरायाऽविभाविचार्ति: सिद्धयो ह्यंतरायप्राया एव अतस्ताः परिहृत्य परमेश्वरपर एव
भवेदितिवक्तुं सिद्धीराह जितेंद्रियस्येति युक्तस्य स्थिरचितस्य १ स्विदिति वितर्के का स्वित्कि नाम कथं
स्वित्की दृशी वा धारणोऽच्युत कतीति प्रसंगांतरे वा प्राहः त्वमेवैतज्जानासि नान्य इत्याशयेनाह योगि

श्रीभगवानुवाच॥ जितेंद्रियस्य युक्तस्य जितश्वासस्य योगिनः॥ मयि धारयतश्चेत
उपतिष्ठंति सिद्धयः॥१॥ श्रीउद्धव उवाच॥ कया धारणया का स्वित्कथं वा सिद्धि
रच्युत॥ कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवान्॥२॥ श्रीभगवानुवाच॥
सिद्धयोऽष्टादश प्रोक्ता धारणा योगपारगैः तासामष्टौ मत्प्रधाना दशैव गुणहेतवः ३

नामिति २ धारणाश्चाष्टादश इत्यनुषंगः योगपारगैरिति त्रिकालज्ञत्वादिक्षुद्रसिद्धयस्तेऽपि जानं
तीति भावः अहमेव प्रधानं स्वभावत: आश्रयो यासां ताः मत्साम्यं प्राप्तेषु किंचिन्मात्रा भवं
तीति भावः गुणहेतवः सत्वोत्कर्षहेतुकाः ३ श्रीरामो जयति श्रीराधाकृष्णाय नमः

ता: स्वरूपेणोपदिशति अणिमेति सार्द्धै: पंचभि: अणिमा महिमा लघिमा च मूर्त्तेर्देहस्येति तिस्र: सिद्धय: प्राप्ति
र्नाम सिद्धि: सर्वप्राणिनामिन्द्रियै: सह तत्तदधिष्ठातृदेवतारूपेण संबंध इत्यर्थ: श्रुतेष्वपारलौकिकेषु दृष्टे
षु दर्शनेषु योगेश्वापि सर्वभूतविवरादिविहितेष्वपि प्राकाम्यं भोगदर्शनसामर्थ्यं सिद्धि: शक्तीनां मायाया
तदंशभूतानां प्रेरणं तत्रेश्वरे मायाया अन्येषु तद्दशानां प्रेरणं ईशिता नाम सिद्धि: ४ विषयभोगेष्वसं

अणिमा महिमा मूर्त्तेर्लघिमा प्राप्तिरिन्द्रियै: प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ४
गुणेष्वसंगो वशिता यत्कामस्तदवस्यति एता मे सिद्धय: सौम्य अष्टावौत्पत्तिका मता:
५ अनूर्मिमत्त्वं देहेऽस्मिन्दूरश्रवणदर्शनम् मनोजव: कामरूपं परकायप्रवेशनम्
६ स्वच्छन्दमृत्युर्देवानां सहक्रीडानुदर्शनम् यथासंकल्पसंसिद्धिराज्ञाऽप्रतिहता गति: ७

गो वशिता सिद्धि: यत्कामं यद्यत्सुखं कामते तत्तदवस्यति तस्य तस्य सीमानं प्राप्नोतीति सिद्धि: औत्पत्ति
की: स्वभाविक्यो निरतिशया ऽष्टसंख्य: ५ गुणहेतु: सिद्धीराह अनूर्मिमत्त्वं क्षुत्पिपासादिराहित्यं दूर
श्रवणं दर्शनं चेति द्वे सिद्धी मनोवेगेन देहस्य गति: कामितरूपप्राप्ति: परकायेप्रवेश: ६ स्वेच्छामृ
त्यु: अप्सरोभि: सह देवानां या क्रीडा तासामनुदर्शनं प्राप्ति: अप्रतिहता आज्ञा समंतात् गतिर्यस्या: साज्ञा

भा०ए०
७०

क्षुद्रसिद्धयः पंचाह त्रिकालज्ञत्वमिति अद्वंद्वमितोस्माघनभिभवः अग्न्यादीनां संस्तंभनं ८ तत्र धारणा
भिः सह विशेषतो निरूपयति ययेतियावत्समाप्ति ९ भूतसूक्ष्मोपाधौ मयि तन्मात्रे भूतसूक्ष्माकारं उपासे
सः तन्मात्रोपासकः मम शरीरं अणिमानं १० ज्ञानशक्तिमहत्तत्त्वोपाधौ मयि यथासंस्थं महत्त्वाकारं भूतानां
चेति आकाशादिभूतोपाधौ च मयि मनोधारयन् तत्तद्भूतमहिमानं प्राप्नोतीत्यर्थः ११ वाय्वादिभूतानां ये

त्रिकालज्ञत्वमद्वंद्वं परचित्ताद्यभिज्ञता अग्न्यर्काम्बुविषादीनां प्रतिष्टंभोऽपराजयः ८ एता
श्चोद्देशतः प्रोक्ता योगधारणासिद्धय यया धारणया या स्याद्यथा वा स्यान्निबोध मे ९ भू
तसूक्ष्मात्मनि मयि तन्मात्रं धारयन्मनः अणिमानमवाप्नोति तन्मात्रोपासको मम १०
महत्यात्मन्मयि परे यथासंस्थं मनो दधत् महिमानमवाप्नोति भूतानां च पृथक् पृथक् ११
परमाणुमये चित्तं भूतानां मयि रंजयन् कालसूक्ष्मार्थतां योगी लघिमानमवाप्नुयात् १२
धारयन्मय्यहंतत्वे मनो वैकारिकेऽखिलं सर्वेंद्रियाणामात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः १३

परमाणुतः तन्मये तदुपाधौ चित्तं मयि रंजयन् योगी कालसूक्ष्मार्थकोल परमाणूपाधिरूपतामिति लघु
त्वादि [illegible]रणं तदुक्तं सकालः परमाणुर्वै यो भुंक्ते परमाणुतामिति १२ वैकारिकाहंकारोपाधौ मयि चित्तं खि
लं एकाग्र्यं आत्मत्वं प्रधिष्ठातृत्वं अत्र हेतुः मन्मनाः मयि मनोधारणाप्रभावादिव भवति नाज्ञाती
न हेतुरनुसंधेय इति भावः एवं धारणातु भावेन स योगबलमाश्रय इत्यादि[illegible]म् १३

राम
७०

क्रियाशक्तिप्रधानं महत्तत्वमेव सूत्रं तदुपाधौ मयि सा मे पारमेष्ठ्यं सर्वोत्कृष्टं प्राकाम्यं विंदते कथंभूतस्याव्यक्ताज्ज
न्म यस्य सूत्रस्य तदुपाधेर्ममेत्यर्थः १४ त्र्यधीश्वरे त्रिगुणमायानियंतरि अत एव कालविग्रहे आकलयित
त्वेप्रंतर्यामिनि ईशित्वं विशिनष्टि क्षेत्रज्ञानां जीवानां क्षेत्राणां तदुपाधीनां च चोदनां प्रेरणां न तु वि
श्वस्य सृष्ट्यादिकर्तृत्वलक्षणमित्यर्थः १५ तुरीयाख्ये विराड्हिरण्यगर्भकारणं चेत्युपाधय ईशस्य

महत्यात्मनि यः सूत्रे धारयेन्मयि मानसं ॥ प्राकाम्यं पारमेष्ठ्यं मे विंदतेऽव्यक्तजन्म
नः ॥१४॥ विष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे ॥ स ईशित्वमवाप्नोति क्षेत्रज्ञक्षेत्र
चोदनाम् ॥१५॥ नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते ॥ मनो मय्यादधद्योगी मद्धर्म्मा
वशितामियात् ॥१६॥ निर्गुणे ब्रह्मणि मयि धारयन्विशदं मनः ॥ परमानंदमाप्नो
ति यत्र कामोऽवसीयते ॥१७॥ श्वेतद्वीपपतौ चित्तं शुद्धे धर्म्ममये मयि ॥ धारयञ्छ्वेत
तां याति षडूर्मिरहितो नरः ॥१८॥

यत्रिभिर्हीनं तुरीयं स्वं तत्स्वं हि विराडादिरूपे वत्तल्लक्षणो ऐश्वर्यस्य समग्रस्य धर्म्मस्य यशसः श्रियः ज्ञानवैरा
ग्ययोश्चैव षण्णां भग इतीरितः १ तद्वति भगवच्छब्दशब्दिते षाड्गुण्यैश्वर्यसंपन्ने १६ यत्र परमानंदरू
पे सर्वोऽपि कामस्तद्दृश्या भूतोऽवसीयते समाप्यते तं १७ अतः परं गुणहेतुकाः शुद्धसत्वात्मके श्वेततां

भा० एकादश १८

भा०ए०

आकाशात्मायः प्राणः समष्टिरूपस्तद्रूपे मयि मनसा घोषं नादं चिंतयन् असौ हंसो जीवस्तत्र आकाशे उपल ब्धा ज्ञाता नानारूपा तत्रस्था विचित्रा वाचः शृणोति यद्वा तत्राकाशे उपलब्धा अभिव्यक्ता या भूतानां वाचस्ता दूरतः शृणोतीति १९ त्वष्टर्यादित्ये तस्मिन्नपरिच्छिन्ने चक्षुः संयोज्य तं च चक्षुषि संयोज्य तत्रोभयसं योगे मां ध्यायन् विश्वं दूरतः पश्यति २० मनो देहं च तदनुवर्तिना वायुना सह मयि सुसंयोज्य या मद्धा रणा क्रियते तस्याः प्रभावेन यत्र मनो याति तत्रात्मा देहो यातीत्यर्थः यद्वा मनः कर्तृ आत्मानं वायुना

.७१

मय्याकाशात्मनि प्राणे मनसा घोषमुद्वहन् ॥ तत्रोपलब्धा भूतानां हंसो वाचः शृणोत्य सौ ॥१९॥ चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि ॥ मां तत्र मनसा ध्यायन् विश्वं पश्यति सूक्ष्मदृक् ॥२०॥ मनो मयि सुसंयोज्य देहं तदनुवायुना ॥ मद्धारणानुभावेन तत्रात्मा यत्र वै मनः ॥२१॥ यदा मन उपादाय यद्यद्रूपं बुभूषति ॥ तत्तद्भवेन्मनोरूपं मद्योगबलमाश्रयः २२

सह देहं च मयि सुसंयोज्य यत्र याति तत्र तत्र देहो यातीति २१ मनः उपादाय उपादानकारणं कृत्वा यद्य द्देवादिरूपं भवितुमिच्छति तत्तन्मनोरूपं मनसोऽभीष्टं रूपं योगी भवेत् कुतः यतो मद्योगबलं योऽहमचिंत्यश क्तिर्नानाकारस्तस्मिन्मयि मनसो यो योगो धारणा तस्य बलं प्रभावः स एवाश्रयः कारणम् २२

राम

७६

यत्रप्रविविक्षतितत्रात्मानंचिंतयेत् ततःपिंडंदेहंहित्वाप्राणःप्राणप्रधानलिंगशरीरेणपार्थिवीयुभूतःवायु
नाकेभूतःप्रविष्यात्तेनमार्गेणेत्यर्थः षडंघ्रिवत् भृंगोयथापुष्पात्पुष्पांतरमानायासेनप्रविशतितद्वत् २३
पिंडंहित्वाइत्युक्तंतत्प्रकारंकथयत्स्वच्छंदमृत्युमाह पार्ष्ण्यापार्ष्णिनागुदंनिरुध्यप्राणंप्राणेणपाधिमात्मानंब्रह्मरं
ध्रेणमूर्द्धच्छिद्रेणब्रह्मोपलक्षणंब्रह्मलोकंप्रत्यक्षप्रदेशितंस्थानंमेमनसानीत्वा २४ मत्स्थंमन्मूर्तिरूपंशुद्धंस

परकायंविशन्सिद्धआत्मानंतत्रभावयेत् पिंडंहित्वाविशेत्प्राणोवायुभूतःषडंघ्रिवत् २३
पार्ष्ण्यापीड्यगुदंप्राणंहृदुरःकंठमूर्द्धसु आरोप्यब्रह्मरंध्रेणब्रह्मनीत्वोत्सृजेत्तनुं २४ वि
हरिष्यन्सुराक्रीडेमत्स्थंसत्त्वंविभावयेत् विमानेनोपतिष्ठंतिसत्त्ववृत्तीः सुरस्त्रियः २५ य
थासंकल्पयेद्बुद्ध्यायदावामत्परःपुमान् मयिसत्येमनोयुंजंस्तथातत्समुपाश्नुते २६ योवैम
द्भावमापन्नईशितुर्वशितुःपुमान् कुतश्चिन्नविहन्येततस्यचाज्ञायथामम २७ श्रीरामोजय

त्वंचिंतयेत् तदासत्त्ववृत्तयःसत्त्वांशभूताः २५ यद्वावाश्रकालेऽपियथाविनिपाठेपुयावायेनकेनापिप्रकारेणबु
द्ध्यासंकल्पयेत् तत्तथायथावत्प्राप्नोतीत्यर्थः यदा यथासंकल्पयेत् यथावामत्परःपिविश्वासवान्भवति तथा
तदेवरूपंसर्वंप्राप्नोतीत्यर्थः किंकुर्वन् सत्येसत्यसंकल्पेमयिमनोयुंजन् २६ मत्पितिपद्यवरूपदमेतस्यर्थः ईशितुःस
ईनियंतुःवशिताःस्वतंत्रस्यममभावंस्वभावंप्राप्तः २७ श्रीराम

भा० ए०

७२

एतागसाहेतव: अतः परं स्वज्ञक्त्वाह धारणाविदइति त्रिकालज्ञेश्वरधारणा सूचिता त्रैकालिकी त्रिकालवस्तुविषया
स्वजन्ममृत्युभ्यामुपबृंहिता तत्सहिता अनयैव पचिताद्यभिज्ञता ऽपि व्याख्याता २८ अग्न्यादिभिः सर्वोपघातश्चेन्मो
भगवानित्येवं मत्तयोगमयं तेनाभिहन्तयेत अत्र हेतुः मद्योगेति यादसाम् उदकं यथाभिनिघातकं न भवति तथात

मद्भक्त्या शुद्धसत्वस्य योगिनो धारणाविदः तस्य त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता २८ अ
ग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः मद्योगशान्तचित्तस्य यादसामुदकं यथा २९ मद्विभूती
रभिध्यायन् श्रीवत्सास्त्रविभूषिताः ध्वजातपत्रव्यजनैः स भवेदपराजितः ३० उपासकस्य
मामेवं योगधारणया मुनेः सिद्धयः पूर्वकथिता उपतिष्ठन्त्यशेषतः ३१ जितेन्द्रियस्य दान्तस्य
जितश्वासात्मनो मुनेः मद्धारणां धारयतः का सा सिद्धिः सुदुर्लभा ३२ अन्तरायान् वदन्त्येतान्
युञ्जतो योगमुत्तमम् मया संपद्यमानस्य कालक्षपणहेतवः ३३ श्रीरामो जयति

स्ववपुषोऽप्याप्यस्य: इत्यर्थः अनयैवाऽव्यवताऽपि व्याख्याता २९ मद्विभूतीः ममावतारान् ध्वजादिभिः सह ३०
उपसहीतउपासकस्येति एवं पृथक् धारणाभिः ३१ यद्वा किं नाना धारणाप्रयासेन एकयैव सर्वाः सिद्धयो भवंती
त्याह जितेन्द्रियस्येति मद्धारणां नारायणतुरीयाख्याम् इत्यत्रोक्तां पास दुर्लभा स्यात् सा का न काचिदित्यर्थः ३२

राम

७२

तस्माद्धेतुकीयमेव धारणा कार्या नान्या: कास्माद्दत्याह जन्मनैव काश्चित्सिद्धयो भवंति यथा देवानां यथा च पाद्दस्तमद्दकसंभ: पक्ष्यादीनां खेचरत्वादि तदुक्तं पातंजले जन्मौषधितपोमंत्रयोगजा: सिद्धय इति योगेन मद्धारणामित्युक्तेन योगगतिं मत्सालोक्यादिरूपां ३४ तत्कुत: इत्यत आह सर्वासामिति एकत्वेनं प्रभुत्वोपपा दनं हेतु: कारणं पति: पालयिता चेति किंच न केवलं सिद्धीनामेव प्रभु: अपितु मोक्षादीनामपीत्याह अहमिति योगो मोक्ष: सांख्यं तत्साधनं धर्मस्तदुपदेष्टॄणां ब्रह्मवादिनां च ३५ कुतस्तत्राह अहमिति सर्वदेहिनां

जन्मौषधितपोमंत्रैर्यावतीरिह सिद्धय: योगेनाप्नोति ता: सर्वा नान्यैर्योगगतिं व्रजेत् ३४ सर्वासामपि सिद्धीनां हेतु: पतिरहं प्रभु: अहं योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनाम् ३५ अहमात्मांतरो बाह्योऽनावृत: सर्वदेहिनां यथा भूतानि भूतेषु बहिरंत: स्वयं तथा ३६

इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे नाम पंचदशोऽध्याय: १५

जीवानामात्मा यत: अंतर: अंतर्यामी एवं तर्ह्यात्मांतर्याम्यमृत इति श्रुते: तर्हि किमंतर्वर्तित्वात्परिच्छिन्न: नेत्याह बाह्यं व्यापक इत्यर्थ: तत्र हेतु: अनावृत: एतस्य दृष्टांतमाह भूतेष्विति घटेषु महाभूतानि यथा बहिरंतश्च भवंति स्वयं अहमपि तथेत्यर्थ: ३६ इति भावार्थदीपिकायां टीकायां श्रीधरस्वामिविरचितायां एकादशस्कंधे

वोऽस्मात्तु हरेराविर्भावयुक्ता विभूतयः ज्ञानवीर्यप्रभावादिविशेषेणोपवर्णिता १ अंते श्रितेन यच्छ्रामसमस्ता
कृतात्मनां अत्र तस्यैवोपतापते विभूत्यादिनिरूपणं २ एवं तावन्नवाध्यायसमष्टिप्रश्नानि रूपिताः ब्रह्म
त्वसंभवे तावत्तत्तमादिचतुष्टये ३ बंधमुक्तौ भागवतनिर्णीतसंगते साधुततः परे षट्सु ज्ञानेतरं कर्म कीर्तित्याग
जवे स्थिता ४ हंसेतिहासतो योगनिष्ठायां च त्रयोदशे श्रेयःसाधनेनिर्धारेध्याने चैव चतुर्दशे ५ धा
रणासिद्धिभेदे च प्रसंगेन निरंतरे उद्धवप्रश्नातोऽनन्तरं हरिणोचितम् ६ इत्थं निरूपितोः षोडशे
भक्तिविस्तारे द्वयोर्वर्णाश्रमधर्मभाते ज्ञानादिनिर्णये वातोयमादीनां च निर्णये ७ योगत्रयाधिकारे तु वि
शेच तदनंतरे तत्त्वसंख्याभवादे च पंप्रकृत्योर्विविचने ८ जन्ममृत्युप्रकारे च द्वाविंशेऽस्तु मन्तरं परा

श्रीउद्धव उवाच॥ त्वं ब्रह्म परमं साक्षाद् अनाद्यंतमपावृतं
सर्वेषामपि भावानां त्राणस्थित्यप्ययोद्भवः १ श्रीराम

पराधसहने च नुर्भिक्षा त्वंतरे ९ सप्तविंशोतिक्रियायोगप्रश्नोत्तदुपवर्णितं अष्टाविंशे ततः प्रोक्तो ज्ञा
नयोगोपसंहृतिः १० संसारासंभवप्रश्नेतन्मध्ये द्वत्तमन्तरं तदशक्तावपन्नः प्रश्ने भक्तियोगोपसंहृतिः ११
एवं प्रश्नोत्तरैराद्यत्रक्रमेणैतानि निर्विंशतिः १२ प्रहमात्मां तरोगाद्यो ऽनाद्य ततः सर्वदेहिनां यथा भक्तानि भक्ते
ष्वाहिरंतः स्वयंत येनुक्तं तत्र भक्तानि यथा कश्चित्केन चिद्गुण तिशेषविशेषेणोद्दिष्टानि वर्तते कश्चित्सामान्य
रूपेणैव तथा त्वमपि कृप्य वर्त्तसे इति विभूतीः प्रष्टुं प्रथमं तावदृक्तमेव सर्वात्मकत्वमनुवदति त्वं ब्रह्मेति अप
पावृतं निरावरणं पवरणां त्वतंत्रं वा अतएव सर्वेषामपि त्राणां रक्षणां स्थितिर्जीवनं त्राणस्थितिसहितोऽप्ययो
द्भवो यस्मात् सतं त्वं उपादानकारणमित्यर्थः १

राम

ऽत्रसदृष्टान्तं प्रमाणमाह यथातथ्येन यथार्थत्वेन सर्वभूतात्मकत्वं त्वां ब्राह्मणा वेदतात्पर्यविदः २ एवं
प्रकारत्वेन सर्वात्मत्वमनन्यया विभूतीः पश्यति येष्वीति उपासीना सेवमानाः संतः ३ दुर्ज्ञेयत्वमे
वाह गूढः प्रस्फुटः भूतानां शरीराणां मध्ये अत्र हेतुः भूतानामात्मा अन्तर्यामी अत एव हेतुः हे भूतभाव
नेति तेत्वया ४ ता एव साकल्येन पश्यति हे महाविभूतयः काश्चिद्भूम्यादिषु ते ते भूतयः परसायं रसा

उच्चावचेषु भूतेषु दुर्ज्ञेयमन्तात्मभिः उपासते त्वां भगवन् यथातथ्येन ब्राह्मणाः २ येषु ये
षु च भावेषु भक्त्या त्वां परमर्षयः उपासीनाः प्रपद्यन्ते संसिद्धिं तद्वदस्व मे ३ गूढश्चरसि भूता
त्मा भूतानां भूतभावन न त्वां पश्यन्ति भूतानि पश्यन्तं मोहितानि ते ४ याः काश्च भूमौ दिवि
वैरसायां विभूतयो दिक्षु महाविभूते तां मह्यमाख्याह्यनुभावितास्ते नमामि ते तीर्थपदांघ्रि
पल्लवम् ५ **श्रीभगवानुवाच॥** एवमेतदहं पृष्टो प्रश्नं प्रश्नविदां वर युयुत्सुना विना
शने सपत्नैरर्जुनेन वै ६ ज्ञात्वा ज्ञातिवधं गर्ह्यमधर्मं राज्यहेतुकम् ततो निवृत्तो हन्ताहं
हतो ऽयमिति लौकिकः ७
लेऽत्रनुभाविताः त्वयैव केनचित् कचिच्छक्ति विशेषेणासंयोजिताः तीर्थानां पदं च्युतं दंघ्रिपल्लवं च ५.
नरावतारादर्जुन प्रश्नं संवादत्वात् तवायं प्रश्नः साधीयानिति तावन्नमोदते एकेन तिसृभिः प्रश्नं प्रष्टव्य
सपत्नैर्युद्धमिच्छता विनशने कुरुक्षेत्रे ६ युयुत्सुः सोऽर्जुन इति प्रश्नैकः प्रसंगस्तत्राह ज्ञात्वेति लौकिकः

भा०१०

७४

सिचयद्यत्ततोज्ञातिवधान्निवृत्तस्त्वंदामयाप्रतिबोधितःसन्नयथात्वमभिभाषसे एवंसंग्राममखेमाम
म्भाषततद्वदेवतवांपिकृपयेष्यामीतिभावः ८ ताःविभूतीःकथयतिअहमिति अस्मच्छब्दसमाना
धिकरणाःप्रथमांताद्वितीयांतात्र्यसर्वाविभूतयस्तास्ताश्चोपासनार्थंकथ्यंतेषष्ठीचक्काचिन्निर्धारणे
संबंधेचकचित्तिघथायोग्यंद्रष्टव्या ततश्चामीषांभूतानांत्र्यात्मेति सुहृदिति ईश्वरइतिचसामा
न्येनाहमुपास्यइत्यर्थः एवंसर्वत्रतेषांस्थित्युद्भवाप्ययतःतद्धेतुरित्यर्थः ८विशेषतोविभूतीराह

सतदापुरुषव्याघ्रोयुक्तामेप्रतिबोधितः अभ्यभाषतमामेवंयथात्वंरणमूर्द्धनि ८
अहमात्मोद्धवामीषांभूतानांसुहृदीश्वरः अहंसर्वाणिभूतानितेषांस्थित्युद्भवाप्ययः
८अहंगतिर्गतिमतांकालःकलयतामहं गुणानांचाप्यहंसाम्यंगुणान्यौत्पत्तिकोगु
णः १० गुणिनामप्यहंसूत्रंमहतांचमहानहं सूक्ष्माणांमप्यहंजीवोदुर्जयोना
महंमनः ११ हिरण्यगर्भोविदानांमंत्राणांप्रणवस्त्रिवृत अक्षराणामकारोस्मिपदा
निछंदसामहम १२
कलयतांवशीकुर्वतांमध्येगुणानांमध्येसाम्यंसर्वत्रसमत्वं गुणानांसत्वादीनांसाम्यंप्रधानंवा
गुणिनिधर्मिणि औत्पत्तिकोस्वाभाविकोयोगुणःसोहं १० सूत्रंप्रथमकार्यंमहान्महत्तत्वं
सूक्ष्मोपाधित्वाद्दुर्ज्ञेयतात्र्यजीवस्यसूक्ष्मत्वं वुद्धेर्गुणेनचैवमाराग्रमात्रोह्यपरोपिदृष्टइतिइतिश्रुतेः

रम

७४

१३ हविर्द्धानीकामधेनुः १४ १५ नक्षत्रऔषधीनांप्रभुंसोमं पक्षरक्षरक्षसांप्रभुं १६ तत पतांज्ञापूर्वतांद्युमतांदीप्ति
मतांचमध्ये १७ संयमतांयमवतांदंडवतामितर्थः १८ अंगीगिरसांदक्षिणांचमध्येतेषांप्रभृत्वेर्गुर्यः संन्यासः प्रष्प

ऽद्राहंसर्वदेवानांवसूनामस्मिहव्यवाड् आदित्यानांमहंविष्णु रुद्राणांनीललोहितः १३
ब्रह्मर्षीणांभृगुरहंराजर्षीणामहंमनुः देवर्षीणांनारदोहंहविर्द्धानास्मिधेनुषु १४ सि
द्धेश्वराणांकपिलःसुपर्णोहंपतत्रिणां प्रजापतीनांदक्षोहंपितृणामहमर्यमा १५ मा
विद्धिद्रवदैत्यानांप्रल्हादमसुरेश्वरं सोमंनक्षत्रौषधीनांधनेशंयक्षराक्षसां १६ ऐ
रावतंगजेंद्राणांयादसांवारुणांप्रभुं तपतांद्युमतांसूर्यंमनुष्याणांचभूपतिं १७ उच्चैः
श्रवास्तुरंगानांधातूनांमस्मिकांचनं यमःसंयमतांचाहंसर्पाणामस्मिवासुकिः १८
नागेंद्राणामनंतोहमंगिराश्चैदक्षिणां आश्रमाणांमहंतुर्योवर्णानांप्रथमोनघ १९
तीर्थानांस्रोतसांगंगासमुद्रःसरसामहं आयुधानांधनुरहंवज्रपुरस्रोधनुष्मतां २०
धिष्ण्यानामस्म्यहंमेरुर्गहनानांहिमालयः वनस्पतीनामश्वत्थऔषधीनामहंयवः २१
पुरोधसांवसिष्ठोहंब्रह्मिष्ठानांबृहस्पतिः स्कंदोहंसर्वसेनान्यामग्रण्यांभगवानजः २२

मोवर्णःब्राह्मणः १९ स्रोतसांप्रवाहानांचगंगाभागीरथीसरसांस्थिरोदकाशयानांतडागादीनां २० धिष्ण्या

नांवनिवासस्थानानांगहनानांदुर्गाणां २१
ब्रह्मिष्ठानांवेदार्थनिष्ठानांसेनानांचचमूपतीनां
अग्रण्यानांसन्मार्गप्रवर्तकानांचप्रभोब्रह्माहं २२

भा०१०

७५

शुचीनां शोधको नाम पि मार्जन तत्स्मरणादीनां मध्ये यस्माद्धि स्मृ. शोधकोहं २३ योगानामष्टांगानां मध्ये आत्मसंरोधः समाधिरहं मंत्रोस्मीति. कौशलानां विवेकादीनां पुराणानां मध्ये आन्वीक्षिकी आत्मविद्या अन्यख्यातस्थाख्यातिरख्यातिरसत्ख्यातिरनिर्वचनीयख्यातिवादिनां एवमिदमेवं वेति पोऽहं तेषां विकल्पः सोहं २४ कुमारः सनत्कुमारः २५ सन्यासः भूतानाम भयदानं क्षेमानां अभयस्थानानां मध्ये अबहिर्मतिः अंतर्निष्ठा सत्यप्रियवचनं मौन वचनेहि प्रियेणाभाषणं मौनेनैव पुरुषस्याभिप्रायो ज्ञायते अजः प्रजा

यज्ञानां ब्रह्मयज्ञो हं व्रतानामविहिंसनं वाय्वग्न्यर्काम्बुवागात्मा शुचीनामप्यहं शुचिः २३

योगानामात्मसंरोधो मंत्रोस्मि विजिगीषतां आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनां २४ स्त्रीणां तु शतरूपाहं पुंसां स्वायंभुवो मनुः नारायणो मुनीनां च कुमारो ब्रह्मचारिणां

२५ धर्माणामस्मि संन्यासः क्षेमाणामबहिर्मति गुह्यानां सूनृतं मौनं मिथुनानामजस्त्वहं २६

संवत्सरोऽस्म्यनिमिषामृतूनां मधुमाधवौ मासानां मार्गशीर्षोहं नक्षत्राणां तथाभिजित २७

अहं युगानां च कृतं धीराणां देवलोऽसितः द्वैपायनोस्मि व्यासानां कवीनां काव्य आत्मवान् २८

पतिः यस्य देहार्द्धाभ्यां मिथुनमभूत् स एव मत्स्यं मिथुनं अर्द्धो ह वा एष आत्मनः पत्नीति श्रुतेः २६ अनिमिषाणां अप्रमत्तानां मधुमाधवौ वसंतऋत्वर्थः अभिजित उत्तराषाढचतुर्थचरणः तथा च श्रुतिः अभिजिन्नाम नक्षत्रं उपरिष्टादाषाढानां अवस्ताच्छ्रोणायाः इत्यादि २७ कृतं कृतयुगं देवल असितश्च व्यासानां वेदविभागक

रामः

७५

भगवतःउत्पत्तिंप्रलयंचैवभूतानामागतिंगतिं वेत्तिविद्यामविद्यांचसवाच्योभगवानिति १ एवंलक्षणानांभगवतांवासुदेवो
हं २८ सुपेशसांसुरूपाणांपदार्थानांपद्मकोशः दर्भजातीनांकुशः दूर्वादीनांहविःषुचघृतंशारदिषुघृतमेववा ३०
लक्ष्मीःधनादिसंपत् ३१ बलवतांओजःसहःसात्वतांभागवतानांभक्त्युक्तंकर्माहमित्यर्थः तेषामेवमध्येनवव्यूहचनिवासु
देवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववाराहनृसिंहवामनेतिया नवमूर्तयस्तासांमध्येवासुदेवाख्यः ३२

वासुदेवोभगवतांत्वंतुभागवतेष्वहं किंपुरुषाणांहनुमान्विद्याध्राणांसुदर्शनः २८ रत्नानांप
द्मरागोस्मिपद्मकोशःसुपेशसां कुशोऽस्मिदर्भजातीनांगव्यमाज्यंहविष्वहं ३० व्यवसायिना
महंलक्ष्मीःकितवानांछलग्रहः तितिक्षास्मितितिक्षूणांसत्त्वंसत्त्ववतामहं ३१ ओजःसहो
बलवतांकर्माहंविद्धिसात्वतां सात्वतांनवमूर्तीनामादिमूर्तिरहंपरं ३२ विश्वावसुःपूर्वचित्तिर्गं
धर्वाप्सरसामहं भूधराणामहंस्थैर्यंगंधमात्रमहंभुवः ३३ अपांरसश्चपरमस्तेजिष्ठानांविभा
वसुः प्रभासूर्येंदुताराणांशब्दोहंनभसःपरः ३४ ब्रह्मण्यानांबलिरहंवीराणामहमर्जुनः भूता
नांस्थितिरुत्पत्तिरहंवैप्रतिसंक्रमः ३५ गत्युक्त्युत्सर्गोपादानमानंदःस्पर्शलक्षणं आस्वादश्रुत्यव
घ्राणमहंसर्वेंद्रियेंद्रियं ३६

गंधर्वाणांविश्वावसुः अप्सरसांपूर्वचित्तिः गंधमात्रंप्रविकृतं ३३ परमःमधुरः परःपराख्यःशब्दः ३४ अर्जुनःपार्थः
भूतानांप्राणिनांप्रतिसंक्रमःप्रलयः ३५ गत्यादयः पंचकर्मेंद्रियव्यापाराः स्पर्शादयोज्ञानेंद्रियव्यापाराः तत्रलक्षणंदर्श
नंसर्वेंद्रियाणामिंद्रियंतत्तदर्थग्रहणशक्तिरप्यहम् ३६ श्री

भा॰ए॰ तदेवं तत्र तत्र निर्द्धारणेन तत्तत्संबंधेन च विशेषतो विभूतीर्निरूप्येदानीं सामान्यतः सर्वाण्यपि निरूपयति पृथिवीति सा
र्द्धद्वयेन पृथिव्यादिशब्दैस्तन्मात्राणि विवक्षितानि अहं प्रकृतिस्वरूपकारः महान् महत्तत्वं एताः सप्त प्रकृतिविकृतयः विकारः
पंचमहाभूतानि एकादशेंद्रियाणि वेत्येवं षोडशसंख्याकः पुरुषो जीवः अव्यक्तं प्रकृतिः पुरुष इति किंच रजः स
त्वं तम इति प्रकृतेर्गुणाः परं ब्रह्म च यदेतत्सर्वमहमेव ३७ किंच एतत्प्रसंख्यानं एतेषां परिगणनं एतेषां लक्ष
णतो ज्ञानं च तत्फलं तत्वविनिश्चयश्चाहमेव ३८ एतदेवं संक्षिप्याह मयेति जीवेश्वररूपोपाधिविधयोर्ममावे:

पृथिवी वायुराकाशमापो ज्योतिरहं महान् विकारः पुरुषोऽव्यक्तं रजः सत्त्वं तमः परम् ३७
अहमेतत्प्रसंख्यानं ज्ञानं तत्वविनिश्चयः मयेश्वरेण जीवेन गुणेन गुणिना विना ३८
सर्वात्मनापि सर्वेण न भावो विद्यते क्वचित् संख्यानं परमाणूनां कालेन क्रियते मया
न तथा मे विभूतीनां सृजतोऽण्डानि कोटिशः ३९

यश्च गुणगुणिरूपो यश्च क्षेत्रक्षेत्रज्ञरूपः स सर्वोऽपि मया विना मद्व्यतिरेकेण नास्ति अहमेव सर्वमित्य
र्थः ३८ ननु सामान्यतः किमेवं संक्षिप्य कथयसि पूर्ववन्निर्द्धारणसंबंधाभ्यां विशेषतः सर्वाः कथय
त्वेतत्राह संख्यानं पृथिव्यादिपरमाणूनां कालेन महता तदपि मयैव क्रियते न त्वावत्तुं शक्यते तथा मे
विभूतीनां संख्यानं कर्त्तुं न शक्यते कुत इत्यत आह सृजतोऽण्डानीति यतो मया सृज्यमानानां ब्रह्मांडानामे
व तावत्संख्या नास्ति तदंतर्गतानां विभूतीनां संख्येत्यर्थः ३९ श्री॰

७६

राम
७६

किंच मेखला हीनः कुशांश्च दध्यात तत्रा दैलामा लांक पंमत: जटिला: अनाभ्यां गा दिताजात: तथा अधौनद
वासोगः कपीठः दंताश्चवा सश्च दवासांसित धौता निता निताम्न स्पस: अधौत दवासा अधौत दवासा:
स्ववासा वसः कपीठः अनक्रो पीतकादि भार तंत्री ठमानं च यस्पस: २२ जपश्च उच्चारो मत्र परीक्षो त्सर्ग
अत पो ब्राग्मत सिन वाग्यत मौनी भवेत २३ रेतो वृद्धि पर्वनाव विरेत नोत्सृजेत ब्रह्मचारी व्रतधार: अग्रहस्य:
स्वयमेव क पंविस्व कौ रोम्न वगाह्या स्नातो य तासु कृत: प्राणाम: त्रिपदीं गायत्रीं जपत २४ संध्ये च देयतावा

मेखलाजिन दंडाक्ष ब्रलसूत्र कमंडलून जटिलोऽधौत दवासोर कपीठ: कुशान दधत २२ स्नान
भोजन होमेषु जपे च प्रोरेच वाग्यत: न छिंद्यान्नखरोमाणि गाक्षोपस्थो नातान्यपि २३ रेतो नावृकि
र ज्ञात ब्रह्मव्रतधर: स्वयं अवकीर्णो वगाह्याऽसु यतासु त्रिपदीं जपेत २४ अग्न्यर्का चार्य गो
विप्र गुरु वृद्धसुरान्शुचि: समाहित: उपासीत संध्ये च यतो वाग्जपन २५ आचार्यं मां विजा
नीयान्नाव मन्येत कर्हिचित न मर्त्यबुध्यासूयेत सर्वदेवमयो गुरु: २६ सायं प्रातश्च यानीय भै
क्ष्यं तस्मै निवेदयेत यच्चान्यदप्यनुज्ञातमुपभुंजीत संयत: २७ शुश्रूषमाण आचार्यं सदोपासी
त नीचवत यानशय्यासनस्थानैर्नातिदूरे कृतांजलि: २८ एवं वृत्तो गुरुकुले वसेद्भोगविवर्जित:
विद्यासमाप्यते यावद्बिभ्रद्व्रतमखंडितम २९

जपन्नुपासीत मध्यान्हे संध्यानिमित्तं मौनं नास्तीति विवेचनं २५ २६ अन्यद्द्रव्यं तत्स प्राप्तं तद्धनि वेदयेत
तेनानुज्ञातं संयत: सन्नुपभुंजीत तत्पर: २७ यानशय्यासनस्थाने: यानं पप्रतोयानेन निद्रितमप्रमत्ततथा समी
पशयनेन विश्रांतं पादसंवाहनादिभि: समीपासनेन आसीनं कृतांजलिर्नियोगप्रतीक्षया नातिदूरेऽवस्था
ति

एवमुपकुर्वाणस्य धर्मानुक्त्वा नैष्ठिकस्य विशेषधर्मानाह यदीति द्वाभ्यां असौ ब्रह्मचारी यदि तं छन्दसां लोकं महर्लोकं ततो ब्रह्मचारीलोकं चारोढुमिच्छतीत्यर्थः यद्वा छन्दसां लोकमिति ब्रह्मचारीलोकविशेषणं यत्र मूर्तिधराः छन्दांस्युक्तानि तत् तर्हि बृहद्व्रतः सन् बृहत् नैष्ठिकं व्रतं यस्य सः विन्यसेत् समर्पयेत् अधिकस्वाध्यायप्रवृत्तिः क्रियतेऽर्थः ३० ब्रह्मवर्चः वेदाभ्यासजं तेजः तद्वान् ३१ तस्यैवं व्रतस्यापतिसद्धारणाय धर्मानाह स्त्रीणामिति निरीक्षणं सम्भाषणं क्ष्वेलनं परिहासः एवमादिकं त्यजेत् मिथुनीभूतानग्रतस्त्यजेत् न पश्येदित्यर्थः ३२

यद्यसौ छन्दसां लोकमारोक्ष्यन्ब्रह्मविष्टपं गुरवे विन्यसेद्देहं स्वाध्यायार्थं बृहद्व्रतः ३० अग्नौ गुरावात्मनि च सर्वभूतेषु मां परं अपृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः ३१ स्त्रीणां निरीक्षणस्पर्शसंलापक्ष्वेलनादिकं प्राणिनो मिथुनीभूतानगृहस्थोऽग्रतस्त्यजेत् ३२ शौचमाचमनं स्नानं संध्योपासनमार्जवं तीर्थसेवा जपोऽस्पृश्याभक्ष्यासंभाष्यवर्जनं ३३ सर्वाश्रमनियुक्तोऽयं नियमः कुलनंदन मद्भावः सर्वभूतेषु मनोवाक्कायसंयमः ३४ एवं बृहद्व्रतधरो ब्राह्मणोऽग्निरिव ज्वलन् मद्भक्तस्तीव्रतपसा दग्धकर्माशयोऽमलः ३५ अथानंतरमावेक्ष्यन्यथा जिज्ञासितागमः गुरवे दक्षिणां दत्त्वा स्नायाद्गुर्वनुमोदितः ३६

तस्यापि सर्वाश्रमसाधारणं धर्ममाह शौचमिति द्वाभ्यां ३३ ३४ निष्कामनैष्ठिकस्य तु मोक्षफलमाह एवमिति अमलः निःकामश्चेत् दग्धकर्माशयोऽन्तःकरणाय सन् तपोमूर्तः सन् मद्भक्तो भवति ३५ उपकुर्वाणस्य समावर्तनप्रकारमाह अथेति अनंतरं द्वितीयाश्रमं प्रवेक्ष्यन् प्रवेष्टुमिच्छन् यथायथावद्विचारित

वे

राम
७८

तस्याधिकारानुरूपमाश्रमविकल्पसमुच्चयावाह गृहमिति सकामश्चेद्गृहं कृत्वा कारणाभावाद्यदि काम
श्चेद्वनं प्रविशेत् अकृत्वा कारणात्सर्व द्विजोत्तमः ब्राह्मणश्चेत्सन्न्यसेदित्यर्थः यद्वा आश्रमादाश्र
मान्तोनन्तरं गत्वा अन्यथा अनाश्रमी प्रतिलोमं नाचरेदित्यर्थः आश्रमस्परइतिवाछेदः अथ भक्तसाश्र
ॐ यमनियमसाम्यावस्थवद्दमाणात्वात् ३५ विवाहनियमं पूर्ववर्णधर्मैः सह गृहस्थधर्मानाह गृहार्थीति स
दृशीं सवर्णां अजुगुप्सितां कुलतो लक्षणतोऽप्यनिन्दितां कामतस्तु पानन्यामुद्वहेत्तामवर्णामनन्तरां

गृहं वनं चोपविशेत्सर्वजेद्वा द्विजोत्तमः आश्रमादाश्रमं गच्छेन्नान्यथामत्सरश्चरेत् ३६
गृहार्थीसदृशीं भार्यामुद्वहेदजुगुप्सितां यवीयसीं तु वयसा यः सवर्णामनुक्रमात् ३७
इज्याध्ययनदानानि सर्वेषां च द्विजन्मनां प्रतिग्रहोऽध्यापनं च ब्राह्मणस्यैव याजनं ३८
प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदं अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक्तयोः ३९
ब्राह्मणस्य तु देहोऽयं क्षुद्रकामाय नेष्यते कृच्छ्राय तपसे चेह प्रेत्यानन्तसुखाय च ४०

अनन्तरं तत्रापि वर्णक्रमेणोद्वहेदित्यर्थः तिसृणां वर्णानां पूर्वेण द्वे तथैकां यथाक्रमं ब्राह्मणक्षत्रियविशां
भार्याः स्वा शूद्रजन्मनः इति स्मृतेः ३७ इज्यादयस्त्रैवर्णिकस्य सामान्यरूपका धर्माः प्रतिग्रहादित्रयं तु वृत्तिः सा
च ब्राह्मणस्यैव ३८ तत्रापि मुख्यां वृत्तिमाह प्रतिग्रहमिति तयोर्याजनाध्यापनयोरपि कार्पण्यापादित्वं दोषं पश्यन्
शिलैः स्वामिस्यक्तैः क्षेत्रपतितैः कणैः एवं च व्राजिकापर्वं ब्राह्मणेन सोढव्यमित्याह ब्राह्मणस्येति ४०

भा०११

उंछवृत्तिर्नाम विपणादौ पतितकणकणोपादानं तां शिलवृत्तेः पेक्षोक्तं कृतं परितुष्टचित्तस्य मोक्षफलमाह शिलोंछेति मह
त्प्रीतप्याद्विलक्षणं ४१ एवमधनस्य मद्भक्तस्य मद्भक्तोद्धारफलमाह त्रिभिः समुद्धरंतीति दारिद्र्याद्युत्तारयंति
विप्रमित्युपलक्षणं मत्परायणं पंकमपि ४२ राजस्त्वावश्यकमेतदित्याह सर्वा इति ४३ ४४ सर्वेषामपि वृत्तीरा
ह सीदन्निति त्रिभिः पण्यैर्विक्रयार्हैः नतु सुरालवणादिभिः तत्राप्यापदाक्रांतश्चेत् खड्गेन क्षत्रियवृत्त्या वा यद्यपि
गेनतमेऽनंतरां पापीयसीं वृत्तिमातिष्ठेदिति स्मरन् खड्गधारणं पण्यविक्रयाच्छ्रेष्ठं मन्यते तथापि हिंसानावरा

शिलोंछवृत्त्या परितुष्टचित्तो धर्मं महांतं विरजं जुषाणः मय्यर्पितात्मा गृह एव तिष्ठन्नातिप्रसक्तः
समुपैति शांतिं समुद्धरंति ये विप्रं सीदंतं मत्परायणं। तानुद्धरिष्ये न चिरादापद्भ्यो नौरिवार्णवात्
४२ सर्वाः समुद्धरेद्राजा पितेव व्यसनात्प्रजाः आत्मानमात्मना धीरो यथा गजपतिर्गजान् ४३ एवं
विधो नरपतिर्विमानेनार्कवर्चसा विधूयेहाऽशुभं कृत्स्नमिंद्रेण सह मोदते ४४ सीदन्विप्रो वणिग्वृ
त्त्या पण्यैरेवापदं तरेत् खड्गेन वाऽपदाक्रांतो न श्ववृत्त्या कथंचन ४५ वैश्यवृत्त्या तु राजन्यो जीवेन्मृग
यया ऽपदि चरेद्वा विप्ररूपेण न श्ववृत्त्या कथंचन ४६ शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुकटक्रियां।
कृच्छ्रान्मुक्तो न गर्ह्येण वृत्तिं लिप्सेत कर्म्मणा ४७

वृत्तिरेव श्रेष्ठेति भगवतो मतं नतु श्ववृत्त्या नीचसेवया ४५ तत्राप्यापदि मृगयया वा विप्ररूपेणाध्यापना
दिना ४६ कारवः प्रतिलोमजा विशेषास्तक्षादयः तेषां वृत्तिं कटादिक्रियां आपद्गतीर्णास्तु नात्कालेन वर्तितव्या
हत्याहेति ४७ श्रीरामो जयति श्रीरामः

राम

तोऽस्वंवीतव्यवस्थामुक्त्वा पुनर्गृहस्थस्य साधारणं कर्म्मवयस्त्रानाह वेदाध्ययनं ब्रह्मयज्ञः तेनऋषीन् स्वधाकारेण पितॄन् स्वाहाकारेण देवान् बलिहरणेन भूतानि अन्नाद्येर्नृन् आदिशब्दात् मनुष्यान् तज्जापूतत्वं यथोदयं विभवानुसारेण देवादीश्वर दृष्ट्या विधत्ते मद्रूपाणीति ४९ आवश्यकं धर्ममुक्त्वा काम्यधर्ममाह यदृच्छयेति यदृच्छया प्रयत्नविना उपार्जितेन वा शुक्लेन स्वकृत्या लब्धेन शुद्धेन धनेनवा आहरेत् पोष्यान् ५० गृहस्थस्यापि निवृत्तिनिष्ठामेवाह कुटुम्बेष्विति त्रिभिः नप्रमाद्येत ईश्वरनिष्ठायां प्रमत्तो न भवेत् नतु दृष्ट्यादृष्टापेक्षकर्मणि आसक्तः स्यात् प्रमादः विचा

वेदाध्यायस्वधास्वाहाबल्यन्नाद्यैर्यथोदयं देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत् ४९
यदृच्छयोपपन्नेन शुक्लेनोपार्जितेन वा धनेनापीडयन्भृत्यान्न्यायेनैवाहरेत्क्रतून् ५०
कुटुंबेषु न सज्जेत न प्रमाद्येत्कुटुंब्यपि विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ५१
पुत्रदाराप्तबंधूनां संगमः पांथसंगमः अनुदेहं वियंत्येते स्वप्नो निद्रानुगो यथा ५२ इत्थं
परिमृशन्मुक्तो गृहेष्वतिथिवद्वसन् न गृहैरनुबध्येत निर्ममो निरहंकृतः ५३ कर्म्म
भिर्गृहमेधीयैरिष्ट्वा मामेव भक्तिमान् तिष्ठेद्वनं वोपविशेत्प्रजावान्वा परिव्रजेत् ५४

रोत्साहो विपश्चिदिति ५१ तत्रापि दृष्टोऽस्वास्थ्याधिक्यात्तेषु संगमस्वरूपं प्रपंचयति पुत्रादीनामेकत्र संगमः पंथानां प्रयासंगम इति तत्र हेतुः अनुदेहं प्रति देहमेते वियंति नश्यंति निद्रामनुवर्त्ती स्वप्नो निद्रापाये यथेति परिमृशन्निति विवेक उदासीनः ५३ अस्यार्थे प्रमीविकल्पामाह कर्म्मभिरिति गृहाश्रम एवं तिष्ठे

भा०११०

८१

गृहाशयासक्तं गेहेषु मा हृषि स्थितिविभिः ५५ बंधमेवाभिनयेन दर्शयति अहो इति वालाश्च लालनीयः तस्याः स्याश्च आत्मजाश्च मां विना याः संतः कथं जिविष्यंतीति ५६ गृहे य आशयो वासना तेन आसक्तं तदृहृदयं यस्य सः अवधं तम अप्रीतितामसी योनिं ५७ इत्येकादशे सप्तदशोऽध्यायः १७ अष्टादशे वदत धर्मं वनस्थ पतिगोचर अधिकार विशेषे वैराग्यविशेषं चापि तद्वतं १ क्रमप्राप्तान् वनस्थानधर्मानाह वनमिति आयुषः तृतीयभाग पंचसप्ततिवर्ष पर्यंतं ततः स्त्रीरोगिस्य स्ये सविरागे ऽपि संन्यासाधिकारः स्यादिति भावः १ वसीत परिदधीत २

यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः स्त्रैणः कृपणधीर्मूढो ममाहमिति वध्यते ५५ अहो मे पितरौ वृद्धौ भार्या बालात्मजात्मजाः अनाथा मामृते दीनाः कथं जीवंति दुःखिताः ५६ एवं गृहाशयाक्षिप्तहृदयो मूढधीरयं अतृप्तस्ताननुध्यायन्मृतोऽन्धं विशते तमः ५७ इति श्रीभागवते महापुराणे एकादशस्कंधे सप्तदशोऽध्यायः १७ श्रीभगवानुवाच वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा वन एव वसेच्छांतस्तृतीयं भागमायुषः १ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत् वसीत वल्कलं वासस्तृणपर्णाजिनानि च २ केशरोमनखश्मश्रुमलानि बिभृयाद्दतः न धावेदप्सु मज्जेत त्रिकालं स्थंडिलेशयः ३ ग्रीष्मे तप्येत पंचाग्नीन् वर्षास्वासारषाड् जले आकंठमग्नः शिशिर एवं वृत्तस्तपश्चरेत् ४

दतः ३ तान्न धावेत्न शोधयेत् त्रिकालमप्सु मज्जेत मल वस्त्र्यायात् स्थंडिलेशयः भूमिशायी ३ तप्येत पंचाग्नीन् सूर्येण सह चतुर्दिशमग्नीन्निधाय तत्मानं तापयेदित्यर्थः आसार षट् आसारंधारंपातं सहत इति तथा प्रावकाशंनामव्रतं चरेत् जले आकंठमग्नः उदकवासं नाम व्रतं चरेत् ४

राम

८१

उदूखलेनयाऽश्मनावाकुट्टयतीतितथा दंताएवोलूखलंयस्यसतथा ५ संचिनुयात्आहरेत् अन्यदाकालांतरेआहृतंकालांतरेनाद्दीत लब्धेनवेनवेनाद्यैपुराणंतुपरित्यज्योदितिनारदोक्तेः ६ कालचोदितान् आग्रहायणादीन् ७ किंच अग्निहोत्रमिति मुनेश्चनैगमैर्वेदवादिभिः ८ अस्यनिष्कामस्यफलमाह एवमिति धमनिभिः शिराभिःसंततःव्याप्तः यावज्जीवंचीर्णेनतपसाभुक्त्वामांसइत्यर्थः अथवाविलोकान्महर्लोकादिस्क्रमेणाप्युपैतिभावः

अग्निपक्वंसमश्नीयात्कालेऽभ्याहृतमेववा उलूखलाश्मकुट्टोवा दंतोलूखलएववा ५ स्वयं संचिनुयात्सर्वमात्मनोवृत्तिकारणं देशकालबलाभिज्ञोनाददीतान्यदाहृतं ६ वन्यैश्चरुपुरो डाशैर्निर्वपेत्कालचोदितान् ७ नतुश्रौतेनपशुनामांयजेतवनाश्रमी ७ अग्निहोत्रंचदर्शश्चपौर्ण मासश्चपूर्ववत् चातुर्मास्यानिचमुनेराम्नातानिचनैगमैः ८ एवंचीर्णेनतपसामुनिर्धमनिसंततः मांतपोमयमाराध्यऋषिलोकादुपैतिमां ९ यस्त्वेतत्कृच्छ्रतश्चीर्णंतपोनिःश्रेयसंमहत् कामायाऽ ल्पीयसेयुंज्याद्बालिशःकोऽपरस्ततः १०

अतः कारणाद्धिभक्तिद्वाराऽनन्तवतावन्नच्यवते प्रतिबंधकत्वाद्धलेनस्वनेनक्रमेणमुच्यतेइति ९ तंसकामंनिंदति यस्त्वितिनिःश्रेयसंमोक्षफलंअल्पीयसेप्राविरंच्याद्दसमेवतस्मै १० एवंयावज्जीवंवर्तमानस्यमोक्षःसिद्धिःतृ तीयभागावसानेतुमंदविरागेपिसंन्यासाधिकारः यदितुअतोर्वागेवत्वधर्मनाशक्तोभवेत् तदापिसम्यगविरक्तः विरक्तोवा १०

तत्रापि विरक्तस्य तमाह यदेति जातो वै पशुः नपो देहे यस्य सः ११ विरक्तप्रत्याह यदेति १२ तत्रादौ कृत्यमाह इष्ट्वेति यथोपदेशं प्राजापत्यं कृत्वा वै प्रजापतेः स्वामामिष्ट्वा स्वे प्राणेष्वग्नीन् १२ संन्यासे विप्र एव भवति नान्य वर्ण इत्य संन्यासे दैवेनाप्ययेनाह विप्रस्येति केनापि निप्रायेण कुर्वीततमाह अयमिति परं परं ब्रह्म १४ एवं प्रव्रजितस्य धर्मानाह विभृयादित्यादि परं कौपीनाद्न्य वासो यद्धारयितुमिच्छति तर्हि कौपीनमाच्छाद्यते यावता तावन्मात्रं धा

यत्तस्तो नियमे ऽकल्पे जरया जातवेपथुः आत्मन्यग्नीन्समारोप्य मह्यिनो ऽग्निं समाविशेत् ११
यदा धर्मविपाके षु लोकेषु निरयात्मसु विरागो जायते सम्यक् न्यस्ताग्निः प्रव्रजेत्ततः १२ इष्ट्वा
यथोपदेशं मां हुत्वा सर्वस्वमृत्विजे अग्नीन्स्वप्राण आवेश्य निरपेक्षः परिव्रजेत् १३ विप्रस्यैव
संन्यसतो देवा दारादिरूपिणः विघ्नान्कुर्वन्त्ययं ह्यस्मानाक्रम्य समियात्परं १४ बिभृयाच्चेन्मुनिर्वा
सः कौपीनाच्छादनं परं त्यक्तं न दण्डपात्राभ्यामन्यत्किंचिदनापदि १५ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलं सत्यपूतं वदेद्वाचं मनःपूतं समाचरेत् १६ मौनानीहानिलायामा दण्डा वाग्देहचेतसां मय नह्येते यस्य संत्यंग वेणुभिर्न भवेद्यतिः १७

स्येतिस्त्यर्थः सक्तप्रैषोच्चारात् सर्वमेक प्रतो ऽन्यत्किंचिद्पि न बिभृयात् दण्डपात्राभ्यामित्यावस्यकजलपात्रादेरुपलक्षणं १५ मनःपूतं मनसा सम्यग्विचार्य यच्छ्रेष्ठं तदाचरेत् १६ मौनं वाचो दण्डः अनीहा काम्यकर्मत्यागो देहस्य प्राणायामश्चेतसः एते त्रयो दण्डा यस्य न सन्ति स वेणुदण्डैर्युक्तो ऽपि यतिर्न भवति १७ श्री०

चतुर्ष्विति ब्राह्मणादिष्वेव चरेत् भेदेन चातुर्विध्येषु एव एव वा सम्भवे वा विगर्ह्यान् अभिशस्तपतितान् असंक्लृप्तान् अप्राप्ते लाभो भविष्यतीति एवमसङ्कल्पितान् १८ बहिर्ग्रामात् पवितं प्रोक्षणादिभिः शोधितं विभज्य विष्णुब्रह्मार्कभूतेभ्यः अशेषमित्यधिकाहरणं निरस्तं याचितमिति पाठे माधुकरेण याचितमन्नं चेत् तर्हि विभज्य भुंजीत न तु याचितो ऽन्यैस्य चतुष्टयमित्यर्थः माधुकरे तु नैवेद्यं भैक्ष्यं नाम्ने विद्यते नैवेद्यकं क्षिपेत् इत्युक्तितये

भिक्षां चतुर्षु वर्णेषु विगर्ह्यान्वर्जयंश्चरेत् सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेन तावता १८
बहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः विभज्य पावितं शेषं भुंजीताशेषमाहृतं १९ एकश्च
रेन्महीमेतां निःसंगः संयतेंद्रियः आत्मक्रीड आत्मरत आत्मवान्समदर्शनः २० विविक्तक्षेम
शरणो मद्भावविमलाशयः आत्मानं चिंतयेदेकमभेदेन मया मुनिः २१ अन्वीक्षेतात्मनो बं
धं मोक्षं च ज्ञाननिष्ठया बंध इंद्रियविक्षेपो मोक्ष एषां च संयमः २२ तस्मान्नियम्य षड्वर्गं म
द्भावेन चरेन्मुनिः विरक्तः क्षुद्रकामेभ्यो लब्ध्वात्मनि सुखं महत् २३

मौनित्वं बहिरिति स्नाने यदा तदानीं केनापि याचितं चेत् तन्मध्ये तस्मै किंचिद्विभज्य दत्त्वेत्यर्थः १९ किंच एक एकोऽद्वितीयः आत्मन्येव क्रीडा कौतुकं यस्य सः आत्मन्येव रत संतुष्टः आत्मवान् धीरः २० विविक्तं विजनं क्षेमं निर्भयं शरणं स्थानं यस्य सः मद्भावेन विमल आशयो यस्य सः २१ बंधं मोक्षं च केन बंधः केन मोक्ष इति तावा

श्रीभाग० ११ २३

पुरग्रामादीनिति ग्रामाः सताः हिताः व्रजा गोष्ठानि तान् सार्थान् यात्रिकजनसमूहान् २४ यतः शिलवृत्त्याश्रमेन तदीयेनान्धसान्नेन शुद्धसत्वः सन् निवृत्तमोहः संसिध्यतीत्युच्यते २५ ननु मिष्टान्नं विहाय कथं शिलान्नोपजीवित्वं स्यादित्यत आह नेति एतद्दृश्यमानं मिष्टान्नादि वस्तुत्वेन न पश्येत् यतो विनश्यति अतो विनश्यति अतो इहामुत्र च लोके असक्तचित्तः सन् चिकीर्षितात् तदर्थकृत्यात् विरमेत् २६ ननु तथापि यावद्

पुरग्रामव्रजान्सार्थान्भिक्षार्थं प्रविशंश्चरेत् पुण्यदेशसरिच्छैलवनाश्रमवतीम वतीं महीं २४ वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत् संसिध्यत्याश्वसंमोहः शुद्धसत्वः शिलांधसा २५ नैतद्वस्तुतया पश्येत् दृश्यमानं विनश्यति असक्तचित्तो विरमेदिहामुत्र चिकीर्षितात् २६ यदेतदात्मनि जगन्मनोवाक्प्राणसंहतं सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत् २७ श्रीरामो जयति ०

देहनाशपर्यन्तं तु वास्तवत्विं तावत् कुतो विरागः स्यात् तत्राह यदेतदिति एतत् जगत् ममतास्पदं मनोवाक्प्राणैः संहतं सहितम् अहंकारास्पदं शरीरं च सर्वं तत् ज्ञानं स्वप्नवच्च प्रातिभासिकमात्रमिति तर्केण स्वप्नादिदृष्टान्तेन त्यक्त्वा स्वस्थः प्राप्तनिष्ठः सन् पुनस्तत् न स्मरेत् न चिंतयेत् २७ श्रीरामो जयति ०

राम
८३

एवंवनस्थादिधर्मानुक्त्वापरमहंसधर्मानाह ज्ञाननिष्ठ इतिसार्द्धैर्दशभिः वहिर्विरक्तोमुमुक्षुःसन्योग्यानि
ष्ठोवामोक्षेऽप्यनपेक्षोमद्भक्तोवाश्रितिं लिंगैर्न्त्रिदंडादिसहितान् आश्रमान्तत्धर्मान्त्यक्त्वातदासक्तिं
त्यक्त्वायथोचितंधर्मंचरेदित्यर्थः नपुनस्त्यक्तसाधनएवेतिविवक्षितःपुनर्धर्मविधानात् अक्रियत्वस्योक्तरा
ध्यायवत्समारात्वाच्च तर्हिपूर्वस्मात्कोविशेषःतमाह अविधिगोचरः विधिकिंकरोनस्यादितिएतदेवस्फुटी
करिष्यतिशौचमाचमनंस्नानंनतुचोदनयाचरेदित्यादिना २८ कथंचरेत्तदाह बुधःविवेकीचापिबाल

ज्ञाननिष्ठोविरक्तोवामद्भक्तोवानपेक्षकः सलिंगानाश्रमांस्त्यक्त्वाचरेदविधिगोचरः २८
बुधोबालकवत्क्रीडेत्कुशलोजडवच्चरेत् वदेदुन्मत्तवद्विद्वान्गोचर्यांनैगमश्चरेत् २९
वेदवादरतोनस्यान्नपाखंडीनहैतुकः शुष्कवादविवादेनकंचित्पक्षंसमाश्रयेत् ३० नोद्विजे
तजनाद्धीरोजनंचोद्वेजयेन्नतु अतिवादांस्तितिक्षेतनावमन्येतकंचन ३१ देहमुद्दिश्यपशु
वद्वैरंकुर्यान्नकेनचित् एकएवपरोह्यात्माभूतेष्वात्मन्यवस्थितः यथेंदुरुदपात्रेषुभूता
न्येकात्मकानिच ३२

कवत्मानापमानाविवेकशून्यःकुशलःनिपुणोपिजडवत्फलानुसंधानाभावेनविद्वान्पंडितोपिउन्मत्तवत्लोके
विडंरंजनाभावेननैगमःश्रुतीवेदार्थनिष्ठोपिगोचर्यांअनियताचारमिव २९ वेदवादरतःकर्मकांडव्याख्याना
दिनिष्ठःहैतुकाःकेवलतर्कनिष्ठःशुष्कवादेननिःप्रयोजनगोष्ठ्यांयोविवादस्तस्मिन् ३० अतिवादान्दुरुक्तानि
३१ आत्मदृष्ट्यातावद्वैरंकारणंनास्तीत्युक्तंएकएवेति ३२ देहदृष्ट्याऽपिनास्तीत्याह भूतानिचदेहा

[illegible] ३३ [illegible]

भा०२० दैवंतंत्रितं दैवाधीनं यतः ३४ अलं तर्हि भिक्षाप्रयत्नेनापि तत्राह आहारमात्रार्थं समीहेतैव यतः तस्य प्राणधारणाय
उक्तं सम्यक्कल्पितं तेन प्राणधारणेन तत्त्वविचारः स्यादिति तेनापि तत्राह तद्विज्ञायेति ३५ तर्हि किं मिष्टान्नादिकमेव ग्रा
ह्यमेवकेनेत्युक्तं नेत्याह यदृच्छयेति द्वाभ्यां ३६ यथाऽहमीश्वरो लीलया चरामि तथा ज्ञानी ज्ञाननिष्ठः अ
नाशात्तु कुर्यात् न तु विधिकिंकरत्वेन न तस्य ज्ञाननिष्ठाविरोधादिति परे: ३७ कुतो विधिकिंकरत्वाभावस्तत्राह

उपस्थानविधौ देहकाले कालेऽशनं क्वचित् लब्ध्वान्नं दूष्येद्धृतिमाननभयं दैवतंत्रितं ३४ आहारार्थं
समीहेत युक्तं तत्प्राणधारणं तत्त्वं विमृश्यते तेन तद्विज्ञाय विमुच्यते ३५ यदृच्छयोपपन्नान्नमद्याच्छ्रे
ष्ठमुतापरं तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः ३६ शौचमाचमनं स्नानं न तु चोदनया चरेत्
अन्यांश्च नियमान् ज्ञानी यथाहं लीलयेश्वरः ३७ नहि तस्य विकल्पाख्या या च मद्वीक्षया हता आदेहांता
त् क्वचित्ख्यातिस्ततः संपद्यते मया ३८ दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान् अजिज्ञासितमद्ध
र्मो गुरुं मुनिमुपव्रजेत् ३९

तोहितस्य विकल्पाख्यातेः प्रतीतः नन्वेसि सासतस्य याचासीत्तो विमद्वीक्षया शान नहता ननु नेहतां कुन देहप्रमाभद्रत्रा
त तत्राह आदेहान्तात्क्वचित्कदाचित्तद्वाधितैव ख्यातिर्भवति ३८ तदेवं विरक्तस्य परोक्षज्ञानवतः संन्यासं तद्धर्मी
भौतिकैर्लौकैराज्ञवतां विविदिषुप्रत्याह दुःखोदर्केष्विति नजिज्ञासितो मद्धर्मो मत्प्राप्तिसाधनं येन सः ३९

राम

मामेव दृष्टैव गुरुं परिचरेत् ततः परमेकश्चरेदित्यादिधर्मैर्वर्तेत इति भावः ४० अनधिकारिणः संन्यासं निंदति
द्वाभ्यां यस्त्विति प्रचंडोऽस्माशांतेन्द्रियसारथिर्यस्य सः ४१ सुरान् यज्ञस्थान् देवान् स्वात्मानं च आत्मस्थं

तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः ४०
यस्त्वसंयतषड्वर्गः प्रचंडेंद्रियसारथिः ज्ञानवैराग्यरहितस्त्रिदंडमुपजीवति ४१
सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा अविपक्वकषायोऽस्मादमुष्माच्च विहीयते ४२ भिक्षोर्धर्मः शमोऽहिंसा तप ईक्षा वनौकसः गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनम् ४३ ब्रह्मचर्यं तपः शौचं संतोषो भूतसौहृदम् गृहस्थस्याप्यृतौ गंतुः
सर्वेषां मदुपासनम् ४४

मां च निह्नुते प्रसारयतीति निह्नवफलमाह अस्मादिति ४२ चतुर्णां प्रधानधर्मानाह भिक्षोरिति ४३ अन्य
धर्मान्कांश्चित् गृहस्थेष्वपि दिशति ब्रह्मचर्यमिति शौचं रागादिराहित्यं तस्य ब्रह्मचर्यप्रकारमाह ऋतौ गं
तुरिति ४४

भा०ए० एवंभूत वर्णाश्रमधर्मफलमाह इति मामिति द्वयेन मद्भक्तिं विंदते ४५ ततः किमतः आह भक्त्येति महेश्वरत्वे हे
श्वरत्वे हेतुः सर्वोत्पत्त्यप्ययं सर्वस्योत्पत्त्यप्ययौ यस्मात् अत एव तत्कारणं मां ब्रह्मरूपं वैकुंठनिवासिनं
२५ यद्वा ब्रह्मणो विश्वस्य कारणं उपयाति सामीप्येन प्राप्नोति ४६ ततश्चासौ मुक्त एवेत्याह इति एवंभूतेन

इति मां यः स्वधर्मेण भजेन्नित्यमनन्यभाक् सर्वभूतेषु मद्भावो मद्भक्तिं विंदतेऽचिरात् ४५
भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरं सर्वोत्पत्त्यप्ययं ब्रह्म कारणं मोपयाति सः ४६
इति स्वधर्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः ज्ञानविज्ञानसंपन्नो न चिरात्समुपैति मां ४७
वर्णाश्रमवतां धर्म एष आचारलक्षणः स एव मद्भक्तियुतो निःश्रेयसकरः परः ४८
एतत्तेऽभिहितं साधो भवान्पृच्छति यच्च मां यथा स्वधर्मसंयुक्तो भक्तो मां समियात्परं ४९
इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादेऽष्टादशोऽध्यायः १८

स्वधर्मेण निर्णिक्तं शुद्धं सत्त्वं यस्य सः अत एव निर्ज्ञाता मम गतिरैश्वर्यं येन ४७ उक्तमर्थं संक्षिप्याह य एष
आचारलक्षणः पितृलोकप्राप्तिफलः मद्भक्तियुतः मदर्पणेन कृतः ४८ प्रकरणार्थमुपसंहरति एतत्ते राम
तेऽभिहितं यथा भक्तो भक्त्या मां परं संप्राप्नुयादिति ४९ श्रीरामो जयति नमः श्रीरामचंद्रशरणं प्रपन्ने २५

ज्ञानादेर्निर्णयः पूर्वं कृतो ह्याश्रमधर्मतः एकोनविंशतितमे ज्ञानादेस्त्याग उच्यते १ तदेवं तर्कैस्तावद्बाधितोऽपि देहादि
प्रपंचो यावदपरोक्षानुभवेन दिष्ट्या हारि न विलीयते तावत् तत् ज्ञानाभ्यासस्ततो भक्तिरित्युक्तं अष्टादशांतात् कचित्तस्या
तिस्ततः संपद्यते मयेत्याशिना यस्य त्वापरोक्षानुभवेन प्रपंचो लीनप्रायस्तस्य न किंचित्कृत्यमस्तीत्याह यइति
विद्यानुभवः तत्स एवति नश्रुतेन संपन्नः अत एव आत्मवान् प्रशान्ततत्वः नानुमानिकः केवलपरोक्षज्ञानवान्
न भवति अनकार पाठे अनुमानिकः प्राक् श्रुतमनुकूलाश्च तर्कैर्निर्णीतार्थ इत्यर्थः स एव द्वैतं तन्निवर्तकं साधनं च मयि
मायामात्रमिति ज्ञात्वा ज्ञानं च तत्साधनं संन्यसेत् अयमेव विद्वत्संन्यासो नाम १ अत्र हेतुमाह ज्ञानिन इति

श्रीभगवानुवाच योविद्याश्रुतसंपन्नः आत्मवान्नानुमानिकः मायामात्रमिदं ज्ञात्वा ज्ञानं
च मयि संन्यसेत् १ ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः स्वर्गश्चैवापवर्गश्च नान्योऽर्थो म
ते प्रियः २ ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ विभर्ति
माम् ३ तपस्तीर्थं जपो दानं पवित्राणीतराणि च नालं कुर्वन्ति तां सिद्धिं या ज्ञानकलया कृता ४
तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावितः ५

यस्मादहमेव तस्येष्टः अपेक्षितः स्वार्थः फलं हेतुः तत्साधनं च संमतः स्वर्गोऽप्यहमेव अपवर्गः संसारनिवृत्तिश्च अतस्त
स्य न प्राप्यं कृत्यं वा किंचिदस्तीत्यर्थः २ अत्र श्रीवदन्नुभवं प्रमाणयति ज्ञानेति यथोपपन्नानि नमभिनंदितज्ञानीति यतोऽसौ
ज्ञानेन मां धारयति ३ तस्य नान्यत्सोपानमिति तपइति अलं पूर्णां कर्तुम् ज्ञानस्य कलयांशेन ४ ज्ञानेन सहितं स्वात्मानं यथा भव
ति तथा ज्ञात्वा तत्संपन्नः सन् मामेव भज अन्यत्सर्वं त्यजेदित्यर्थः ५ श्री०

तस्य प्रत्ययार्थं पूर्ववृत्तं वचनमाह ज्ञानेति मामेव संसिद्धिं प्राप्ताः ६ तदेवं ज्ञानं संक्षेपेन उपदिशति त्वयीति त्रिविधः आध्यात्मिकादिर्विकारः देहादिरूपः समायाना तु परमार्थः यत यस्मात् अंतरा मध्य एवापतति रज्जो सर्पमालादिवत् नाद्यपवर्गयोः न तु आद्यंते वास्ति अतः यत् यस्य विकारस्य अमी जन्मादयः स्युः तत्तस्य तवाधिष्ठानभूतस्य किं न किंचिदित्यर्थः तस्यापि वस्तुनोऽनंसत्वात् तेषामसत्वादित्याह आद्यंतयोरिति असतः सर्पादेः आद्यंतयोर्यदस्ति

ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि सर्वयज्ञपतिं मां वै संसिद्धिं मुनयोऽगमन् ६
त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो मायांतरापतति नाद्यपवर्गयोर्यत् जन्मादयोऽस्य यदमी तव तस्य किं स्युराद्यंतयोर्यदसतोऽस्ति तदेव मध्ये ७ श्रीउद्धव उवाच ज्ञानं विशुद्धं विपुलं यथैतद्वैराग्यविज्ञानयुतं पुराणं आख्याहि विश्वेश्वर विश्वमूर्ते त्वद्भक्तियोगं च महद्विमृग्यं ८ तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीश पश्यामि नान्यच्छरणं तवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात् ९

रज्ज्वाद्यधिष्ठानं तदेव मध्येऽपि न तु सर्पादिरस्ति एवं त्वयि विकारो नास्तीत्यर्थः यद्वा आद्यंतयोर्यदस्ति तन्मध्येऽप्यस्त्येव न तस्य जन्मादयः संति अतस्त्वं निर्विकार एवेति ७ ज्ञानादिविशिष्टं भक्तियोगं जिज्ञासुः पृच्छति ज्ञानमिति विशुद्धमेतत् ज्ञानं विपुलं विस्तृतं यथा भवति तथा कथयेत् महद्भिर्ब्रह्मादिभिर्विमृग्यं ८ महद्भिर्मृग्यत्वमभिनयेनाह तापत्रयेणाभिहतो लोके स्य अतः संतप्यमानस्य अंघ्रिद्वंद्वमेवातपत्रं तस्मात् न केवलमातपत्रत्वं किंतु अमृतमयमभितो

श्रीतिकृपामुत्पादयन्नाह तापत्रये इति अस्मिन् बिले संसारकूपे पतितं तत्र च कालाहिना दष्टं एवमपि क्षुद्रसुखेष्वेव उरुतर्षं तस्यापि सन्तापं मारणं कथं समुद्धरणीयं इति चेत्तत्राह आपवर्ग्यैः अपवर्गबोधकैर्वाणिमृतैरासिंचेति १० तापत्रयेणाभिहतस्य भवाध्वनि इत्याह ११ १२ ज्ञानादिभिरुपबृंहितान् तत्सहितानित्यर्थः १२ तत्र ज्ञानं कथयति नवेति प्रकृतिपुरुषमहदहंकारपंचतन्मात्राणि एकादशइंद्रिया

दष्टंजनंसंपतितंबिलेस्मिन् कालाहिनाक्षुद्रसुखोरुतर्षं समुद्धरैनंकृपयापवर्ग्यैर्वचोभिरासिंचमहानुभाव १० श्रीभगवानुवाच इत्थमेतत्पुराराजाभीष्मंधर्मभृतांवरं अजातशत्रुःपप्रच्छसर्वेषांनोऽनुशृण्वताम् ११ निवृत्तेभारतेयुद्धेसुहृन्निधनविह्वलः श्रुत्वाधर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत १२ तानहंतेऽभिधास्यामिदेवव्रतमुखाच्छ्रुतान् ज्ञानवैराग्यविज्ञानश्रद्धाभक्त्युपबृंहितान् १३ नवैकादशपंचत्रीन्भावान्भूतेषुयेनवै ईक्षेताऽथैकमप्येषुतज्ज्ञानंममनिश्चितम् १४

णिपंचमहाभूतानित्रयोगुणाएतान् भावान् अष्टाविंशतितत्त्वानिभूतेषुब्रह्मादिस्थावरांतेषुकार्येषुअनुगतानियेनज्ञानेनेक्षेत अथएषुविभावेषु एकंपरमात्मतत्त्वंअनुगतंयेनेक्षेत कार्यकारणात्मकजगत्यपश्यन् परमकारणात्मकमेवैतत् नजुततःपृथगितियेनपश्येत्तज्ज्ञानमित्यर्थः १४ श्रीरामोजयीत नमः नमो०

भा०९० विज्ञानमाह एतदेवेति श्लोकार्द्धेन एतत्त्रयेनैकेनानुगतानेकात्मकान्भावान्पश्येत तान्तथापश्यन्नेवनेत
किंतु तदेकं परमकारणं ब्रह्मैव तथा एतदेव विज्ञानमुच्यते एतदुक्तं भवति परोक्षज्ञानेनापरोक्षभ्रमस्याविद्यामोह

७ दिभिर्विनिवृत्त्यभावात्तज्जगत्प्रपञ्चस्यात्मनः पृथक्सदिति न मन्यते अपरोक्षज्ञानेन तु बाधितमेव जीवन्मुक्तः सं
स्कारशेषं पश्यति ततः परं न पश्यति च अतः परोक्षापरोक्षज्ञानविज्ञानशब्दाभ्यामुच्यते १५ एकेन सर्वका
र्याणामनुगतिं कार्याणां कारणात्पृथक्सत्त्वं चोपपादयति सार्द्धेन तत्र यदि न कदाचिदनीशं जगद्धि

एतदेव हि विज्ञानं न तथैकेन येन यत् स्थित्युत्पत्त्यप्ययान्पश्येद्भावानां त्रिगुणात्मनाम् १५
आदावंते च मध्ये च सृज्यात्सृज्यं यदन्वियात् पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् १८

दिमतेनैतेषां भावानामुत्पत्त्यादयो न स्युः तर्हि कारणस्यैकस्याभावादेकात्मता जगतो मिथ्यात्वं च न स्यात्
अतस्तेषामुत्पत्त्यादीन्साधयति स्थितीति त्रिगुणात्मनां सावयवानामित्यर्थः विमता भावा उत्पत्त्यादिमंतः
सावयवत्वात् घटादिवदिति प्रयोगः तत्र आदौ उत्पत्तेः प्रागंते परिणामांते द्वापत्तौ च कारणत्वेन मध्ये चाश्रयत्वेन
सृज्यात्सृज्यं कार्यात्कार्यांतरं प्रति यदन्वियात् अनुगच्छेत् तत्प्रतिसंक्रमे तेषां प्रलये च यत्परिशिष्येत तदेव स
दिति पश्चेदित्यर्थः १९

राम
८७

वैराग्यमाह श्रुतिरिति द्वाभ्यां श्रुतिः नेह नानास्ति किंचनेत्यादि प्रत्यक्षं प्रपंचस्य कार्य्यत्वादिव्यतिरेकेणान
नुपलब्धेश्चैतन्यव्यतिरेकेणैव च। न किंचिद्दृश्यते इति ऐतिह्यं महाजनप्रसिद्धिः अनुमानं विमतं मिथ्या दृश्य
त्वात् शुक्तिरजतवदित्यादि एवं प्रमाणचतुष्टयं एतेष्वनवस्थानात् एतैर्बाधितत्वात् स एवं सर्वानुगतं
सत्समात्मतत्त्वं पश्यन् विकल्पस्य च मिथ्यात्वात्ततो विरज्यते विरक्तो भवतीत्यर्थः १७ न च वेदोक्तस्वर्गादि

श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयं प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्य
ते १७ कर्मणां परिणामित्वादाविरिंच्यादमंगलम् विपश्चिन्नश्वरं पश्येददृष्टम
पि दृष्टवत् १८ भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेऽनघ पुनश्च कथयिष्यामि
मद्भक्तेः कारणं परं १९ श्रद्धामृतकथायां मे शश्वन्मदनुकीर्त्तनं परिनिष्ठा च पू
जायां स्तुतिभिः स्तवनं मम २० आदरः परिचर्य्यायां सर्वांगैरभिवंदनम् मद्भक्त
पूजाभ्यधिका सर्वभूतेषु मन्मतिः २१

सुखत्वायापि विरज्यते इत्याह कर्म्मणामिति परिणामित्वात् ब्रह्मलोकपर्य्यंतं अदृष्टमपि स्वर्गकं अमंगलं दुःखरूपं नश्व
रं पश्येत् १८ भक्तियोगं कारणमाह भक्तियोगः पूर्वमुक्त एव तथापि त्वयि प्रीतिप्रभवत्वेन भूयः पुनश्च कथयि
ष्यामि १९ श्रद्धामृतकथायां सा इति सर्वत्रान्वज्यते मदनुकीर्त्तनं श्रवणानंतरं मत्कथाया आ
ख्यानमित्यर्थः २० २१

अंगचेष्टा लौकिकी क्रिया वरच सा लौकिकेनापि मद्गुणानामीरणं कथनं २२ मदर्थे मत्प्रजनार्थं तीर्थो
धिनोऽर्थस्य परित्यागः भोगस्य तहूला धनस्य चंदनादेः सुखस्य पुत्रोपलालनादेः इष्टादि वैदिकं यत्क
र्म तदपि मदर्थे कृतं भक्तेः कारणमित्यर्थः २३ भक्तिः प्रेमलक्षणा संजायते अस्य भक्तस्य कोऽर्थः सा
धनरूपः साध्यरूपो वावशिष्यते सर्वोऽपि परत एव भवतीत्यर्थः २४ किं बहुना चित्तमेवांत वीहि निघ्नमपी

मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणं मय्यर्पणं च मनसः सर्वकामविवर्जनं २२ म
दर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः २३ एवं धर्मैर्म
नुष्याणामुद्धवात्मनिवेदिनां मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते २४ यदात्मन्य
र्पितं चित्तं शांतं सत्त्वोपबृंहितं धर्मं ज्ञानं स वैराग्यमैश्वर्यं चाभिपद्यते २५ यदर्पि
तं तद्विकल्पे इंद्रियैः परिधावति रजस्वलं चासन्निष्ठं चित्तं विद्धि विपर्ययं २६
धर्मो मद्भक्तिकृत् प्रोक्तो ज्ञानं चैकात्म्यदर्शनं गुणेष्वसंगो वैराग्यमैश्वर्यं चाणि
मादयः २७

नर्थयोः कारणं तदेवाह यदात्मनीति द्वाभ्यां यदात्मनि मय्यपि ईश्वरे चित्तमर्पितं तदा प्रमानधर्मादी
न्प्राप्नोत्येव २५ एवं तद्व्यतिरेकेणाह तदपि तयत् यदा तत् चित्तं विकल्पे देहगेहादावर्पितं स्यात्
तदाऽधिकं रजस्वलमसन्निष्ठं च भवति ततश्चाविपर्ययं अधर्मादिकं विद्धि २६ स्वत्वमभिप्रेतान् धर्मा

धर्मादीनां महाजनप्रसिद्धानामन्यथा व्याख्यातत्वाद्यमादिस्वपि संख्यातः स्वरूपतो वा किं विदेल क्षणं स्यादिति संभावनया तद्विशेषं जिज्ञासुः पृच्छति यम इति पंचभिः २७ इष्टंच्च यार्हितं धनं चविं २८ परोत्तविद्यादीनां विशेषवत्वं श्री मैणानं २८ ३० प्रश्नानुपस्तानर्थानविपरीतान्प्रशमादीन् ३१ यमनियमानाह अहिंसेतित्रिभिः अस्तेयंम नसापिपरस्वाग्रहणं आस्तिक्यं धर्मेभुतिश्वासः ३२ शौचं बाह्याभ्यांतरं चेतिद्वयं अतोद्वादशनियमाः अद्या

श्रीउद्धवउवाच यमः कतिविधः प्रोक्तो नियमोवाऽरिकर्षन कः शमः कः दमः कृष्णकाति तिक्षाधृतिः प्रभो २७ किंदानं किंतपः शौर्यं किंसत्यमृतमुच्यते कस्त्यागः किंधनं चेष्टं को यज्ञः का च दक्षिणा २८ पुंसः किंस्विद्बलं श्रीमन् भगो लाभश्च केशव काविद्या ह्रीः परा का श्रीः किंसुखं दुःखमेव च २८ कः पंडितः कश्च मूर्खः कः पंथा उत्पथश्च कः कः स्वर्गो नरकः कः कश्च को बंधुरुत किंगृहं ३० क आढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः एतान्प्रश्नान्मम ब्रूहि विपरीतां श्च सत्पते ३१ श्रीभगवानुवाच अहिंसा सत्यमस्तेयमसंगो ह्रीरसंचयः आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयं ३२ शौचं जपस्तपो होमः श्रद्धाऽऽतिथ्यं मदर्चनं तीर्थाटनं परार्थे हा तुष्टिराचार्यसेवनं ३३ एते यमाः सनियमा उभयोर्द्वादश स्मृताः पुंसामुपासितास्तात यथा

धर्मादेरः ३२ उभयोः श्लोकयोः ये स्मृताः ते यमा नियमाश्च यद्वा उभयोः प्रवृत्तिनिवृत्तियोः क्रमतो यमाः सत्का मस्य नियमाः सकामस्य स्मृता इत्यर्थः अत्र हेतुमाह हि यस्मात् उपासिताः सेविताः संतः पुंसां प्रवृत्तानां निवृत्ता नां यथाकामं कामानुसारेणा मोक्षं मभ्युदयं च दुहंतीति ३४ श्री०

९६

भा०११
८९

भ्रमतो रूपासितव्यान् शमादीन् पंचदश स्वादीन् महजन प्रसिद्धोमोतिल स्वस्वानाह शम इत्यादिना यावत्समाप्तिः एतेनैवत
द्विपरीतां शमाद्यो ऽप्युन्नेयाः शमो मन्निष्ठता बुद्धेः ननु शांतिमात्रं दम इंद्रियसंयमः नचारादिदमनं तितिक्षाति
दुःखस्य संमर्षः सहनं न भारादेः जिह्वोपस्थयोर्जयो वेगधारणं धृतिः न तत्त्वेर्यमात्रं ३५ दंडो भूतद्रोहः त
स्यत्यागो दानं नच धनापर्णादि कामत्यागः भोगोपेक्षा तपः न कृच्छ्रादि स्वभावो वासना तस्य जयः प्रतिबंधः शौर्यं न
विमेत्रस्त तस्य दर्शनम् । लोचनं सत्सविषयलात् सत्यं न यथार्थभाषणमात्रं ३६ ऋतं सूनृता सत्या
प्रियाच वाक् एवं चऋतसत्ययोः स्फुट एवविवेकः क्रम प्राप्तंत्यागम्याख्यानुमादेततो यमेदेन शौचं व्याचष्टे

शमो मन्निष्ठता बुद्धेर्दम इंद्रियसंयमः तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ३५ दंड
त्यागः परं दानं कामत्यागस्तपः स्मृतः स्वभावविजयः शौर्यं सत्यं च समदर्शनं ३६ ऋतं च सू
नृता वाणी सत्कविभिः परिकीर्तिता कर्मस्वसंगमः शौचं त्यागः संन्यास उच्यते ३७ धर्म इष्टं
धनं नृणां यज्ञो ऽहं भगवत्तमः दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलं ३८ श्रीरामो जयति

तस्यापि मलत्यागरूपत्वेन त्यागाद्भेदप्रतीतेः कर्मस्वप्रसंगमः अभिनाशक्तिः शौचं त्यागस्तु संन्यास इतित
योर्भेद इत्यर्थः ३७ नृणां इष्टं धनं धर्मः नपश्वादि साधारणं भगवत्तमः परमेश्वरो ऽहमेव यज्ञः मद्धायज्ञो
ऽनुष्ठेयः नक्रियाबुद्ध्येत्यर्थः यद्वा नापेक्षानं दक्षिणा साच ज्ञानोपदेशः नहिरण्यादि दानं तेन हि यज्ञरूपो विष्णुः
प्राप्यते ऽर्दमदमनं बलं तच्च मनोदमनहेतुत्वात् प्राणायाम इति दयालोकप्रसिद्धेर्बलो ऽभिमता ३८ श्री०

राम
८९

लाभंमाचिरव्यासुः प्रथमंभगंततोभेदेनव्याचष्टेलाभेतयोरभेदप्रसिद्धेः भगोभाग्यंतच्चमेऐश्वरोभावोमदीयंऐ
श्वर्यादिकाद्रूपमित्यर्थः उत्तमोलाभस्तामद्भक्तिः नपुत्रादिः विद्यावात्मनिभ्रतीतिस्यभेदस्यबाधः नज्ञानमात्रं
अकर्मसुजुगुप्साहेयत्वदर्शनंह्रीः नलज्जामात्रं ४१ गुणाएवश्रीर्मंडनंनकिरीटादिः दुःखसुखयोरत्ययःअ
तिक्रमः अननुसंधानंसुखंनभोगः विषयभोगापेक्षेवदुःखंनाग्निदाहादिर्वंधान्मोक्षंवेत्त्ययो

भगोमऐश्वरोभावोलाभोमद्भक्तिरुत्तमः विद्यात्मनिभिदाबाधोजुगुप्साह्रीर
कर्मसु ४१ श्रीर्गुणानैरपेक्ष्याद्याः सुखंदुःखसुखात्ययः दुःखंकामसुखापेक्षापंडितो
बंधमोक्षवित् ४० मूर्खोदेहाद्यहंबुद्धिः पंथामन्निगमःस्मृतः उत्पथश्चित्तविवि
क्षेपोस्वर्गःसत्वगुणोदयः ४१

नीतिसपंडितः नविद्यामात्रं ४० अहंबुद्धिरित्युपलक्षणंदेहादिष्वहंममेत्यभिमानवान्मूर्खइत्यर्थः म
न्निगमः मांनितरांगमयतिप्रापयतियोनिवृत्तिमार्गःसतुपंथाः सन्मार्गः नकंटकादिशून्यः चित्तविक्षे
पः प्रवृत्तिमार्गःसउत्पथः नतुचोराद्याकुलः सत्वगुणस्योदयः उद्रेकः स्वर्गः नेंद्रादिलोकः ४१

तमसउच्यतेहरुद्रेकः सनरकः नतामिस्त्रादिः गुरुर्वैवंधुर्नभ्रातादिः सचाहमेवयथाहंजगद्गुरुः एकएवपरोवं
धुर्विद्यमेसन्नपीत्स्यते गुरुःसकलधर्मात्मापत्राकिंचनगोहरिरिति १ ससाधनभोगायतनं गृहेतच्च
मानुष्यमानुषरूपंशरीरमेवनहर्म्यादि गुणैः संपन्नःसर्वासउच्यतेनधनी ४२ असंतुष्टोयःसदरि
द्रःनतिस्वःयोजितेंद्रियःसकृपणःशोच्यः नदीनः विषयेष्वनासक्तधीर्यः सःईशःस्वतंत्रनराजादिः गु

नरकस्तमउन्नाहोवंधुर्गुरुरहंसखे गृहंशरीरंमानुष्यंगुणाढ्योह्याढ्यउच्यते ४२
दरिद्रोयस्त्वसंतुष्टःकृपणोयोऽजितेंद्रियः गुणेष्वसक्तधीरीशोगुणसंगोविपर्ययः
४३ एतउद्धवतेप्रश्नाःसर्वेसाधुनिरूपिताः किंवर्णितेनवहुनालक्षणंगुणदोषयोः ४४
गुणदोषदृशिर्दोषोगुणस्तूभयवर्जितः ४५ इतिश्रीभागवतेमहापुराणेएका
दशस्कंधेभगवदुद्धवसंवादेएकोनविंशोऽध्यायः १९ श्रीरामोजयति०

णासंगःगुणेष्वसंगोयस्यसः विपर्ययः अनीशः एतच्चशमादिविपर्ययोपलक्षणार्थं ४३ उपसंह
रति एतइतिसाधुमोक्षोपयोगित्वेन्या ४४ एतच्चसर्वंगुणदोषयोर्विवेकयोद्रवेनप्रपंचमितितपोः
संक्षेपतोलक्षणमाह किंवहुनावर्णितेनगुणदोषयोर्लक्षणमेतावदेवतदाह गुणदोषयोर्दृष्टिर्दो
नदोषःगुणस्तुतदुभयदर्शनवर्जितःस्वभावइति इत्येकादशेएकोनविंशः १९ श्रीरामः

त्रिशो योगत्रयं प्रोक्तं भक्तिज्ञानक्रियात्मकं गुणदोषवद्वस्त्वर्थमधिकारीविभागतः १ गुणदोषदृशा दोषो
गुणस्तु भयवर्जितः इत्युक्तं तद्विधिप्रतीतविधिश्चेतिपंचभिः विधिश्च प्रतिषेधश्च चरस्मृतव निगमकृप्राज्ञारूपो
वेदः स च विधेयानां प्रतिषेध्यानां च कर्मणां गुणदोषं च पुण्यपापफलं रूपमेवेष्यते १ उत्तमाधममा
वेन तदधिकारिणां वर्णानामाश्रमाणां विकल्पं भेदं च गुणदोषस्वरूपमेवेष्यते प्रतिलोमानुलोम
जं च गुणदोषं तथैवावेष्यते प्रतिलोमजाः उत्तमावर्णास्त्रीषु हीनवर्णेभ्यः पुरुषेभ्यो जाताः सूतवैदे

श्रीउद्धवउवाच विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते अवेक्षते रविंदा
क्ष गुणदोषं च कर्मणां १ वर्णाश्रमविकल्पं च प्रतिलोमानुलोमजं
द्रव्यदेशवयःकालान्स्वर्गं नरकमेव च २ श्रीरामो जयति ०

हकादयः अनुलोमजास्तूत्तमवर्णेभ्यः पुरुषेभ्यो हीनवर्णास्त्रीषु जाताः मूर्द्धावसिक्ताम्बष्ठादयः ते
षां च असत्सत्स्वनियमाः प्रतिलोमानुलोमजाः इति गुणदोषैर्द्रव्यादीन्कर्माहतां स्वर्गं नरकं च
तत्फलरूपं गुणदोषस्वरूपमेवावेक्ष्यते एतच्छोत्तराध्याये प्रपंचयिष्यते २ श्रीरामो जयति श्रीगणे

भा०ए० ८१

तथापि पृच्छति किमायातं तत्राह गुणदोषे०॥ गुणदोषदृशिर्दोष इति निराकृतत्वात् गुणदोषभिदादृष्टि मंतरेण तां विना निषेधविधिलक्षणं कर्मकांडं तव वचः कथं तत्र च वचो तरेण नृणां निःश्रेयसं कथं स्यात् तत्रापि श्रोतव्यो मंतव्य इत्यादि साधनविधेः नानुध्यायाद्बहूंश्छब्दान्वाचो विग्लापनं हि तत् इत्यादि निषेधस्य वा च स्वरूपकत्वादिति भावः यद्वा गुणदोषभिदादृष्टिमंतरेण निषेधविधिलक्षणमपि वचः कथं नु तव म ताद्विवाक्यवत् निःश्रेयसपरं स्यात् सर्वस्यापि वेदस्य तत्परत्वांगीकारादित्यर्थः ३ ननु पितरो देवाश्च सर्वे

गुणदोषभिदादृष्टिमंतरेण वचस्तव निःश्रेयसं कथं नृणां निषेधविधिलक्षणं ३
पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि ४
गुणदोषभिदादृष्टिर्निगमात्तेन हि स्वतः निगमेनापवादश्च भिदाया इति ह भ्रमः ५

ऽप्रत्यक्षतत्त्वज्ञा मनुष्येभ्यः कथं विधिं वदतीति नेत्याह पित्रादीनां सर्वेषां तव त्वदाज्ञारूपो वेद एव तु श्रेयः श्रेयं च चक्षुः प्रमापकं कुत्र अनुपलब्धेऽर्थे सौख्ये स्वर्गादौ च तथा साध्यसाधनयोः इदमस्य साध्यं इदमस्य साधनं इत्यत्रापि तदेवं गुणदोषदृष्ट्यभावे निःश्रेयसे न घटते ४ किंच शास्त्रेणैव विहिता भेददृष्टिः तस्मिन्नेव विषये शास्त्रं कथं निवर्तयेदित्याह गुणेति निगमात्त्वदाज्ञारूपाद्वेदादेव न स्वतः यस्माद्दर्पप्राप्तत्वेन निवर्तते ह स्फुटं भ्रमो भवतीति तं निवर्तयेति ५ श्रीरामः

राम ८१

विषयभेदेप्यधिकारिभेदेनाविरोधं वक्तुं प्रथमं योगत्रयमाह योगा इति योगा उपायाः ब्रह्मत्वकर्मदेवताकांडैः प्रोक्ताः कर्म्म च निष्कामं श्रेयो विधित्सया मोक्षसाधनेछया अन्य उपायो नास्तीति काम्यकर्मादिकं व्यावर्त्तयति तथा चोत्तराध्यायेषु टीकरिष्यति य एतानित्यादिना ६ तेष्वधिकारिभेदमाह निर्विस्मानामिति द्वाभ्यां इह एषामध्ये कर्मसु निर्विस्मानां दुःखबुध्यात त्फलेषु च विरक्तानां अत एव तत्साधनभूत कर्मन्यासिनां ज्ञानयोगः सिद्धिद इत्युत्तरेणान्वयः तेषु फलेषु च अनिर्विस्मचित्तानां दुःखबुद्धिरहितानां अतः कामिनां तत्फलेष्वविरक्तानां मवितर्पः ७ यदृछया केनापि

श्रीभगवानुवाच योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ज्ञानं कर्म्म च भक्तिश्च नोपायोऽन्योस्ति कुत्रचित् ६ निर्विस्मानां ज्ञानयोगो न्यासिनामिह कर्मसु तेष्वनिर्विस्मचित्तानां कर्मयोगस्तु कामिनाम् ७ यदृछया मत्कथादौ जातश्रद्धस्तु यः पुमान् न निर्विस्मो नातिसक्तो भक्तियोगोस्य सिद्धिदः ८ तावत्कर्माणि कुर्वीत न निर्विद्येत यावता मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ९

भागधेयेन ८ तत्र काम्यकर्मसु प्रवर्त्तमानस्य सर्वात्मना विधिप्रतिषेधाधिकार इत्युत्तराध्याये वक्ष्यति निष्कामं कर्म्मयोगाधिकारिणस्तु यथाशक्तिसत्कज्ञानभक्तियोगाधिकारात्प्रागेव तदधिकतयोक्तस्वल्पः तावत्सिद्धानां तु न किंचिदिति सावधिकं कर्मयोगमाह तावदिति नवभिः कर्माणि नित्यनैमित्तिकानि यावता यावत् ९

भा०ए०
६२

कर्मयोगिनो ज्ञानभक्तिभ्यामधिकारे प्रकारमाह स्वधर्मेति अनाशी: काम: अफलकाम: अन्यत् निषिद्धं नरकया नो हि देवैर्वाविहितांतिक्रमाद्वानिषिद्धाचरणाद्वेत्यत: स्वधर्मस्थत्वान्निषिद्धवर्जनाच्च नरकं न याति अफलं कामत्वाच्च स्वर्गमपीत्यर्थ: १० किंतु अस्मिल्लोके अस्मिन्नेव देहे अनघ: निषिद्धत्यागी अत: शुचि: निवृत्तरागादिमल: यदृच्छयेति केवलज्ञानात् विभक्तेर्ऽलभतां द्योतयति ११ अनेन प्रकारेण ज्ञानभक्ति साधनत्वान्नरदेहं सौति स्वर्गिणोपीति निरयिण इति दृष्टांतत्वेनोक्तं ज्ञानभक्तिभ्यां ज्ञानमसोलऽभयं

स्वधर्मस्थो यजन् यज्ञैरनीशो: काम उद्धव न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् १० अस्मिन् लोके वर्तमान: स्वधर्मस्थोऽनघ: शुचि: ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया ११ स्वर्गिणोप्येतमिच्छंति लोके निरयिणस्तथा साधनं ज्ञानभक्तिभ्यां मभयं तद्दसाधकं १२ न नरा: स्वर्गतिं कांक्षेन्नारकीं वा विचक्षणा: नेमं लोकं च कांक्षेत देहावेशात्प्रमाद्यति १३ एवं विद्वान्पुरा मृत्योरभवाय घटेत स: अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदम् १४

स्वर्गिनारकिशरीरं १२ अतो नर: स्वर्गतिं न कांक्षेत् नारकीमिति दृष्टांत: यद्वा स्वानिष्टसाधनकर्माणि कुर्यादित्यर्थ: अस्माति श्रेष्ठतामुनरविमनुष्योभवेयमित्यपि न कांक्षेत यतो देहावेशात् देहासक्त्या स्वार्थे प्रमाद्यति अवधानशून्योभवति १३ अपितु एतद्देहं साधकमिति विद्वान् तथा सिद्धस्मा विमर्त्यं ज्ञात्वा अप्रम

राम
६२

ऽप्रमत्तो मुक्तसंगः सुखं प्राप्नोतीत्यत्र दृष्टांतः छिद्यमानमिति यमैर्यमवन्निर्दयैः पुरुषैः कृतनीडं यस्मिन् तं स्वकेतं स्वसाश्रयं अलंपटः अनासक्तः १५ दृष्टांतिकमाह अहोरात्रैः छिद्यमानमायुर्बुद्ध्वा भयेन वेपथुः कंपो यस्य सः १६ एवमप्रमत्तमानं प्रमत्तं निंदति नृदेहमिति नृदेहं प्राप्य भवाब्धिं यो न तरेत् स आत्महा तत्र हेतवः आद्यं सर्वफलानां मूलं एतदुपार्जितकर्मभिः सर्वप्राप्तेः किंच सुदुर्लभं उद्यमकोटिभिरपि प्राप्तुमशक्यं तथापि सुलभं दैवेच्छया लब्धत्वात् तं चप्लवं सुकल्पं पटुतरं किंच गुरुः संश्रितमात्र एव कर्णधारो नेता यस्य तं मयानुस्मृतमात्रेणानुकूलमारुतेन प्रेरितं

छिद्यमानं यमैरेतैः कृतनीडं वनस्पतिं खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः १५ अहोरात्रैश्छिद्यमानं बुद्ध्वायुर्भयवेपथुः मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति १६ नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा १७ यदारंभेषु निर्विण्णो विरक्तः संयतेंद्रियः अभ्यासेनात्मनो योगी धारयेदचलं मनः १८ धार्यमाणं मनो यर्हि भ्राम्यदाश्वनवस्थितं अतंद्रितोऽनुरोधेन मार्गेणात्मवशं नयेत् १९

एवं तावद्विरक्तस्य वैराग्यद्वारा ज्ञानभक्तिसाधनं कर्मयोगमुक्त्वा इदानीं सम्यग्विरक्तस्य ज्ञानयोगे तस्य च ज्ञानप्राप्तेः पूर्वं किंचित्कर्तव्यं वर्जनीयं चाह सार्द्धेर्नवभिः यदा तु आरंभेषु कर्मसु निर्विण्णः दुःखदर्शनेनोद्विग्नः ततश्च विरक्तश्च तदा संयतेंद्रियः सन् आत्मनोऽभ्यासेन आत्मविषयकध्यानसततत्याभ्यासेन यथा भवति तथा मनो धारयेत् १८ तत्र प्रथममेवात्यंतधारणाऽसंभवात् तत्त्वभावानुस्मरणवशीकरणमाह यर्हि

नतुतर्हियथापूर्वमेवस्यात्तत्राह मनोगतिंनविसृजेत्नोपेक्षेत किंत्वप्रमत्तः सन्नात्मवशंनयेदित्यर्थः २० अवरोधमार्गे
सदृष्टांतमाह एष अश्ववृत्तिमार्गेणमनसःसंग्रह परमोयोगः तत्साधनत्वात् उपचारेणस्तुति यथाअश्वंदांत
स्वप्रसमनीयस्यअश्वंतः अश्वस्यहृदयज्ञत्वमभिप्रायेणगतिमन्विच्छन्नपेक्षमाणः अश्वधारकः प्रथमंकिं
चित्तदनुवर्ततेततश्चावरस्मिनातंधसेवगच्छतिनतूपेक्षतेतद्वदित्यर्थः २१ एवमपिवशीकृतस्यमनसोऽवस्थांतने
अनुलोमपायमाह सांख्येनेतीत्रिभिः सांख्येनतत्त्वविवेकेनसर्वभावानांमहदादीनांतत्त्वानांअनुलोमतः प्रकृत्यादि

मनोगतिंनविसृजेज्जितप्राणोजितेंद्रियः सत्त्वसंपन्नयाबुद्ध्यामनआत्मवशंनयेत् २०
एषवैपरमोयोगोमनसःसंग्रहःस्मृतः हृदयज्ञत्वमन्विच्छन्दम्यस्येवार्वतोमुहुः २१ सांख्ये
नसर्वभावानांप्रतिलोमानुलोमतः भवाप्ययावनुध्यायेन्मनोयावत्प्रसीदति २२
निर्विण्णस्यविरक्तस्यपुरुषस्योक्तवेदिनः मनस्त्यजतिदौरात्म्यंचिंतितस्यानुचिंतया २३

क्रमेणभवंप्रतिलोमजानांपृथिव्यादिक्रमेणाप्ययंचअनुध्यायेत् प्रसीदतिनिश्चलंभवति २२ ननूपाय
सहस्रेणापिमनोविषयाकारतांनत्यजतीति किंअयोगस्य उपदेशेनेतिचेत्तत्राह निर्विण्णस्येति ततश्चागमापा
यीषुदेहेष्ववधिभूतात्मदर्शनात्तद्विवेकात्पन्नसंसारेनिर्विण्णस्य अतोविरक्तस्यततश्चउक्तवेदिनःगुरूपदिष्टस्यार्था
वलोकस्यततोगुरूपदिष्टस्येवकिंचिंतितस्यअनुपुनरनुचिंतयेदौरात्म्यंदेहाद्यभिमनंत्यजतीति २३

किंच यमादिभिर्योगमार्गैः आन्वीक्षिक्या पदार्थरूपशोधनेन ममार्चनध्यानादिभिर्वा वाशब्देनास्य पृथक्त्वात्तंत्र्य दर्शयति एतैरुपायैर्योग्यं परमात्मानं मनसः स्मरेत् नान्यैः अतोऽन्यन्न कुर्यादित्यर्थः २४ ननु पापान्तरे प्रायश्चित्तं कार्यमेव तत्राह यदीति योगेनज्ञानाभ्यासेनैव एतच्चोक्तस्यापि नामकीर्तनाद्युपलक्षणार्थं नान्यत्कृच्छ्रादि २५ ननु नित्यनैमित्तिकं कर्म सत्त्वशोधकत्वाद्गुणः हिंसादिकं तत्त्वबन्धहेतुत्वात् दोष तत्र च तन्निवर्त्तकत्वात् कृच्छ्रादि प्रायश्चित्तं गुण इति विधिप्रतिषेधाभ्यामुक्तत्वात् प्रायश्चित्तं विनायोगेनैव कथं पापं दहेत् तत्राह स्वे स्व इति सार्द्धेन स एव गुणः नेतरः

यमादिभिर्योगमार्गैरान्वीक्षिक्या च विद्यया ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः २४ यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितं योगेनैव दहेदंहो नान्यत्तत्र कदाचन २५
स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः कर्मणां जात्यशुद्धानामनेन नियमः कृतः गुणदोषविधानेन संगानां त्याजनेच्छया २६

तदुपपादयति यस्मात् विधिप्रतिषेधाभ्यामनेन गुणदोषविधानेन कर्मणां नियमः संकोच कृतः कुतः इत्यत आह जात्या अशुद्धानां स्वभावतो अशुद्धानां संगत्याजनेच्छया अयमभावः परमस्य सर्वं द्धिर्न्नामनन्प्रवृत्तेरस्वाभाविकप्रवृत्त्यैव तत्समर्पितत्वात् न च सहसा सर्वतो निवृत्तिः कर्त्तुं शक्यते अतः इदं न कर्त्तव्यमिति स्वाभाविकप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रियते तथा च न प्रवृत्तिपरो वेदः तथोत्तराध्याये वक्ष्याम उपसेवाहिका मोक्षसादिना अतो योगिनः स्वभाविकप्रवृत्त्यभावान्न प्रायश्चित्तादिविधिगम्यरेति २६

स्त

भा०ए०

२६

मंदाधिकारिणो भक्तियोगमाह जातश्रद्ध इति नवभिः मत्कथासु जातश्रद्धः अत एवान्येषु कर्मसूद्विग्नः न तु तत्फलेषु विरक्तः तदाह वेदेति यद्यपि वेद तथापि तत्परित्यागेप्यनीश्वरः अशक्तः २७ एवंभूतोपि श्रद्धालुः भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः सन् ततस्तदनंतरं मां प्रीतः सन् भजेत विषयांस्तु सेवमानोपि तेषु प्रीतिं न कुर्यात् इत्याह गर्हयन्निति २८ कथं भजेत् किं वा ततो भवति तदाह प्रोक्तेनेति द्वाभ्यां श्रद्धामृतकथायां शश्वन्मदनुकीर्तनमित्यादिना तत्र प्रोक्तेन मामसकृत् नित्यं भजतः हृदिस्थाः हृद्गताः कामा नश्यंति २९

जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु वेद दुःखात्मकान्कामान्परित्यागेप्यनीश्वरः २७
ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः भजमानश्च तान्कामान्दुःखोदर्कांश्च गर्हयन्
२८ प्रोक्तेन भक्तियोगेन भजतो मासकृन्मुनेः कामा हृदिस्था नश्यंति सर्वे मयि हृदि स्थिते
३० भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि मयि दृष्टेखिलात्मनि ३१
तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ३२

हृदयमेव ग्रंथिरहंकारः तत्पूर्वकाश्च सर्वे संशयाः असंभावनाद्याः कर्माण्यपि अनारब्धफलानि संसारहेतुभूतानि ३१ तदेवं यद्यप्यधिकारत्रयमुक्तं तत्र च भक्तेरन्यनिरपेक्षत्वात् अन्यस्य च तत्सापेक्षत्वात् भक्तियोग एव श्रेष्ठ इत्युपसंहरति तस्मादिति त्रिभिः मदात्मनः मयि आत्मा चित्तं यस्य चित्तं यस्य तस्य श्रेयःसाधने ३२ राम०

राम

२६

तत्र हेतुः यत्कर्म्मभिरित्यादि द्वाभ्यां इतरैः पितृतीर्थयात्राव्रतादिभिः श्रेयःसाधनैर्यद्भव्यं सत्त्वशुद्ध्यादि ३३ तत्सर्वं अंजसा
अनायासेनैव स्वर्गमपवर्गं मद्धाम वैकुंठं लभत एव वांछा तु नास्तीत्युक्तं यदि वांछतीति ३४ तत्र हेतुमाह न किंचि-
दिति धीराः धीमंतः यतो मम एकांतिनः मय्येव प्रीतियुक्ताः अतो मया दत्तमपि न गृह्णंतीति किं वक्तव्यं न वांछं-
तीत्यर्थः अपुनर्भवं आत्यंतिकं कैवल्यं ३५ तदुपपादयति नैरपेक्ष्यमेव परं उत्कृष्टं अनल्पं महत् निःश्रेयसं फ-
लं तत्साधनं च प्राहुः मे भक्तिः निराशिषः प्रार्थनाशून्यस्य निरपेक्षस्य प्रार्थनाकारणाभावतोऽपेक्षारहितस्य पुंसो

यत्कर्म्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् योगेन दानधर्म्मेण श्रेयोभिरितरैरपि ३३
सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा स्वर्गापवर्गं मद्धाम कथंचिद्यदि वांछति ३४ न किं-
चित्साधवो धीरा भक्ता ह्येकांतिनो मम वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवं ३५ नैरपेक्ष्यं
परं प्राहुर्निःश्रेयसमनल्पकं तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ३६ न मय्येकां-
तभक्तानां गुणदोषोद्भवा गुणाः साधूनां समचित्तानां बुद्धेः परमुपेयुषां ३७ एवमेतान्म-
यादिष्टाननुतिष्ठंति मे पथः क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः ३८ इति श्रीभागवते महा-
पुराणे एकादशस्कंधे विंशोऽध्यायः २०

भवेत् यद्वा मे निरपेक्षस्य या भक्तिः सा निराशिषो भवेदित्यर्थः ३६ अनेन च प्रकारेण सिद्धानां च गुणदोषवृत्ति-
निरोधं परिहारमुपसंहरति न मय्येति गुणदोषैर्विहितप्रतिषिद्धैरुद्भवो येषां ते गुणाः पुण्यपापापादकाः साधूनां
निरस्तरागादीनां अत एव समचित्तानां अत एव बुद्धेः परमीश्वरं प्राप्तानां ३७ काम्यकर्मनिष्ठेति दर्शयन्नेतान्भ-
क्तिमार्गानुपसंहरति एवमिति मत्पथः मत्प्राप्त्युपायान् येऽनुतिष्ठंति ते क्षेमं कालमायादिरहितं मम स्थानं विंदंति
यत्परमं ब्रह्म तद्विदुः इति टीकायां विंशोऽध्यायः २०

जयति स्वपरानंदः परानंदस्य केशरी यत्कृपालवलेशेन श्रीधरः सत्कृतिः कृती १ ईशतां सिद्धयासंतः संमतां
मम साहस्रं मयाहि स्वीयबोधाय कृतमेतत्त्वसर्वतः २० एकविंशे क्रियाज्ञानभक्तिष्वनधिकारिणाम् कार्ममनो
द्रव्यदेशादिगुणदोषाः प्रपंचिताः १ तदेवं गुणदोषव्यवस्थार्थं योगत्रयमुक्तं तत्र ज्ञानभक्तिसिद्धानां न
किंचिद्गुणदोषौ साधकानां तु प्रथमतो नित्यकर्मनिष्ठानां यथाशक्ति नित्यनैमित्तिकं कर्म सत्त्वशोधकत्वा
द्गुणः तदकरणं निषिद्धकरणं च तन्मलीमसकरणत्वाद्दोषः तन्निवर्तकत्वाच्च प्रायश्चित्तं गुणः सि
द्धसत्त्वानां तु ज्ञाननिष्ठानां ज्ञानाभ्यास एव सिद्धिहेतुत्वात् गुणः भक्तिनिष्ठानां पुनः श्रवणकीर्तनादिभि

श्रीभगवानुवाच य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान् क्षुद्रान् कामांश्चलैः प्राणैः
र्जुषंतः संसरंति ते १ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः विपर्ययस्तु दोषः स्यादुभयोरेष नि श्चयः

रेव गुणः तद्विलंबस्तु दोषः उभयेषां दोषवदात्मकं इतीनीयं तु न सिद्धानामपि साधकानां किंतु केवलं काम्यकर्मप्रधानानां तेषां
सकलगुणदोषान् प्रपंचयिष्यन् आदौ तान्निंदति बहिर्मुखान्। निंदति य एतानिति मत्पथः मदुक्तमार्गान् क्षुद्रा
न्तु धान् चलैः श्रोत्रादिभिः प्राणैः देहवाङ्मनोभिरिंद्रियैर्वा जुषंतः सेवमाना भवंति ते संसरंति निरिक्षं रिवलगुणा
दोषभावेन नानायोनीः प्राप्नुवंतीत्यर्थः १ ननु तैरेव कर्मभिः केचिद्गुणदोषभाजः केचिन्नेति कुतो वैषम्यं
न ह्यग्निना केचित्तप्यंते केचिन्नेति संभवति तत्राह स्वे स्व इति अधिकारभेदेन कल्पितौ गुणदोषौ न वस्तुनिष्ठौ

तत्राह ॥ अथ ॥ इति विचिकित्सार्थं योगपमयोगं प्रवेति संदेहद्वारा स्वाभिक प्रवृत्ति प्रतिबंधार्थमित्यर्थः तत्र ॥ अथ ॥
दीयोगपत्वायोगपत्वे गुणदोषौ तन्निमित्तौ पादे पत्वानुपादेयत्वे ॥ भाभौ तन्निमित्तस्वर्पन्नथौ २ तत्र ॥ अथ ॥ धी
धर्मार्थं ॥ अथ ॥ नधर्मः ॥ अथ ॥ नाधर्म इति गुणदोषौ व्यवहारार्थं ॥ अथ ॥ वापिराजादीनां व्यवहारादर्शनाद्य पादेयं
नान्यादिति ॥ भा ॥ भौ यावत्पदेषत्वे ऽप्यापत्तुशरीरनिर्वाहमात्रोपादेनेन पापं अधिकोपादानेन पापमिति
मयामन्वादिरूपेण धर्मरूपां धुरं भारं कर्मजन्यामित्यः ४ ॥ अथ ॥ धीप्रपंचयिष्यन्वेदे कृत्स्नेन तदभिनिवेशोमा

॥ अथ ॥ धीविधीयेते समाने ऽपि वस्तु ॥ अप्यस्य विचिकित्सार्थं गुणदोषौ ॥ भा ॥ भौ ३ ध
र्मार्थं व्यवहारार्थं पात्रार्थमिति चा ऽनघ दर्शितो ऽयमपाचारो धर्ममुद्वहतां धुरं ४ भूतानां व
न्यानिलाकाशा भूतानां पंचधातवः आब्रह्मस्थावरादीनां शारीरा आत्मसंयुताः ५ वेदे
ननायस्रूपाणि विषमाणि समेष्वपि धातुष्वद्भवकल्पांतएतेषां स्वार्थसिद्धये ६ श्रीराम

भ ॥ इति समाने ऽपि वस्तुषु इति यदुक्तं तत्र पंच मतिभ्रमीति त्रिभिः भूतानां प्राणिनां धारयंतीति धात
वः कारणानि शारीरस्मिंभूताः देहतः साम्य मुक्तजीवतो ऽप्याह आत्मसंयुता इति ५ धातुष देहेषु नामरूपा
णि वर्णाश्रमादीनि कल्पनया प्रयोजनमाह एतेषां प्राणिनां स्वार्थसिद्धये प्रवृत्तिनियमद्वारा धर्मादि

श्रेः

भा०ए०
८९

न केवलं देहेष्वेव अपितु देशकालादिभावानामपि आदिशब्देनान्नपानादयो फलनिमित्ताधिकारिणां ग्रहणं वस्तू-
नां उपादानानां व्रीह्यादीनामपि मया नियमसंकोचार्थमित्यर्थः १ एवं गुणदोषविषयं पारशोध्यतयोः अ-
शुद्धिमत्त्वात् अशुद्धिं प्रपंचयति अकृष्णसार इत्यष्टभिः देशानां मध्ये कृष्णसारहरिणरहितो ऽशुचिः
तत्रापि अब्रह्मण्यः ब्राह्मणभक्तिशून्यो ऽसंतमश्च चिः कृष्णसारो ऽपि कृष्णेन मृगेण सारः श्रेष्ठो यः सोपि
असौवीरः कीकटः सवीराः सभुरसाः तद्वत्सौवीरः कीकटोपि अशुचिः तत्क्षेत्रसवेप्रापत मो देशः ससत्वत्रयत्र
लभ्यत इति तद्विवर्जितः कीकटः अंगवंगकलिंगादि असंस्कृतः संमार्जनादिशून्यः म्लेच्छवर्त्तावाईरणं

देशकालादिभावानां वस्तूनां मम सत्तम गुणदोषौ विधीयेते नियमार्थं हि कर्मणाम् १
अकृष्णसारो देशानामब्रह्मण्यो ऽशुचिर्भवेत् कृष्णसारो ऽप्यसौवीरः कीकटासंस्कृतेरिणं
८ कर्मण्यो गुणवान्कालो द्रव्यतः स्वत एव वा यतो निवर्त्तते कर्म्म स दोषो ऽकर्म्मकः स्मृतः ९

इरणं ऊषरं एकवद्भावः ततश्चाशुचिः तदन्यः शुचिरित्यर्थः उक्तं भवति ८ कालस्य शुद्धिं दर्शयति
कर्मण्य इति द्रव्यतः द्रव्यसंपत्त्या स्वतो वा पर्वान्हादिर्यः कर्मण्यः कर्मार्हः स कालः तस्मिन्कर्मणि
गुणवान्यतः यस्मिन् द्रव्यालाभेन राष्ट्रविप्लवादिना वा कर्म निवर्त्तते यश्चासूतकादौ दर्शाहादि
लक्षणो ऽकर्मकः कर्मानर्हः स्मृतः स कालो दोषः अशुद्ध इत्यर्थः ९ श्रीरामो जयति श्रीरामः

राम
८९

वस्ता राष्ट्रोपप्लवानां द्रव्याणां अशुद्धिर्दर्शयति द्रव्यसंतिवतुर्भिः द्रव्येण तोयादिना शुद्धिः मंत्रादिना शुद्धिः वचनेन
शुद्धमशुद्धं वेति संदेहस्थलीमस्तेवं नुपेरणाब्राह्मणवचनेन शुद्धिः संस्कारेणाग्नो स्नानादिना पुष्पादेः शुद्धिः अन्नपा
णादिना त्वशुद्धिः कालेन स्नानादिना न वैरकादेः शुद्धिः कालेमेघादकं ग्राह्यं वर्ज्यं तु अहमेव हि अकाले दशरा
त्रस्पर्शनं शुद्धिर्विधौ १ पाजुपितान्नादेरशुद्धिः अंबसजाद्युपहतानां तद्गागाद्युदकानां महत्वात्ल्लतान्याशुध
१० शक्ताशक्तास्त्रयोपाणागादिसक्तकान्नादेः शक्तान्प्रतप्तशुद्धिः अन्नं शाक्तानप्रतिशुद्धिर्वालवृद्धातुराणां
वुद्धापकन्मादेदहराहाद्वहित्वनिनाशुद्धिः समन्वाजीर्णमलवदस्त्रादेः समन्नं प्रतुशुद्धिः इदेद्रं प्रति

द्रव्यस्य शुद्धशुद्धीवद्व्येणाद्वचनेनेन च संस्कारेणाथ कालेन महत्वात्स्वतयाऽथवा १०
शक्ताऽशक्ताऽथवा वृद्धा समन्वाचपरात्मने अर्घं कुर्वंति हि यथा देशावस्थानुसारतः ११

शुद्धिः तत्रापि विशेषमाह यदिति एतेवद्भ्य वचनाद्योद्भ्याऽशुद्धिधाराऽप्रात्मनेव अर्घं कुर्वंतितदेशा
वस्थीच शारत एव यथावत् कुर्वंति न सर्वतः तथा तेह निर्भय एव देशो स्नानादिना शुद्धिं कुर्वंति न तु चोरा
द्याकुले तथा रोगादिग्रस्तितः एवाद्यवस्थायामेव कुर्वंति न वाल्परोगाद्यवस्थायामिते तथा च स्मृतिः देशं
कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं उपपत्तिमवस्थां ज्ञात्वा शौचं प्रकल्पयेत् ११ श्रीरामरामराम

द्रव्यादिभिर्द्रव्यस्य शुद्धिरुक्ता तत्र च वादिशुद्धिरेकरूपेव द्रव्यवस्तुतः शुद्धिर्बहुरूपेति तां प्रपंचयति धान्येति धान्या
नां आयुना दारुणां लौकिकं प्रहेचनसादिकं अस्थिगजदंतादितंतूनां तोयेन रसाः तैलघृतादयः तैजसाः सुवर्णा
दयस्तेषां अग्निना च मणीनां मृत्तोयाभ्यां पार्थिवानां चरण्यां घटेष्टकादीनां पृथक् पृथक् कालादिभिः शुद्धिः तत्रा
पि कालं तु जायुपघातता रतम्येन देशकालावस्थानुसारेण च एते रन्ये अयुतायुते मिलिते केवले च कालस्य
पुनर्ग्रहणं पतत्वप्रदर्शनार्थं १२ अस्पृश्यसंसर्गे शुद्धिक्रमं कालेपनितबयेष्याह यत् पीठपात्रवस्त्रादि येन तत्संगण
गन्धलेपं च व्यपोहतीति तत्प्रजाति स्वगतं च मलं सका प्रकृतिं स्वमेव रूपं भजते यत्तस्य तत् शौचं शोधनं याव

धान्यदार्वस्थितंतूनां रसतैजसचर्मणां कालवाय्वग्निमृत्तोयैः पार्थिवानां युतायुतैः
१२ अमेध्यलिप्तं यद्येन गंधलेपं व्यपोहति भजते प्रकृतिं तस्य तच्छौचं तावदिष्यते १३
स्नानदानतपोवस्थावीर्यसंस्कारकर्मभिः मत्स्मृत्या चात्मनः शौचं शुद्धः कर्माच
रेद्द्विजः १४

तावत् गंधादिकं व्यपोहति तावत् प्रमाणं स्वरूपं तत्प्राप्तिस्तावत् तत्कर्मणामिष्यते १३ एवं तावत् द्रव्यशुद्धिरुक्ता इदानीं
कर्तृशुद्धिमाह स्नानेति अवस्था कौमारादिः वीर्यं शक्तिः संस्कार उपनयनादिः कर्म संध्योपासनादि दीक्षादिलक्षणं आत्म
नः स्नानादिकारस्य कर्तुः एतैः स्नानादिभिर्यथायथं तत्कार्यनिःसरीरगो शुद्धिः इयं च शुद्धिर्न व्यवहारार्था किंतु विहितक
मार्थेत्याह शुद्ध इति द्विज इत्युपलक्षणं शूद्रादेरपि १४

मंत्रशुद्धिमाह सद्गुरुमुखाद्यथावत्परिज्ञानं मंत्रस्य शुद्धिः कर्मशुद्धिमाह ईश्वरार्पणं कर्मणः शुद्धिः धर्माधर्मयोः स्वरू
शुद्धी प्रपंचयति प्रकरणोपसंहरति धर्म इति देशकालद्रव्यकर्तृमंत्रकर्मभिः षड्भिः शुद्धैर्धर्मः संपद्यते एतेषां यो विपर्ययः सो
ऽधर्मः तद्धेतुरित्यर्थः १५ अयं च गुणदोषविभागो न वास्तव इत्याह क्वचिदिति आपदि प्रतिग्रहादिगुणोऽप्यनापदि निषि
द्धत्वाद्दोषः परधर्मश्च परस्य गुणोपि स्वस्य दोषः दोषोपि कुटुंबत्यागादि विरक्तो दर्शनदोषः अपि तु विधिबलेन गुणः
एवं येयं गुणदोषयोरेकस्मिन्नेवार्थे नियमः गुणदोषार्थो वायो नियमः नियामकं शास्त्रं स तयोर्भेदमेव बाधते १६

मंत्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्पणं धर्मः संपद्यते षड्भिरधर्मस्तु विपर्ज्जयः १५ क्वचिद्गुणोपि
दोषः स्याद्दोषोपि विधिना गुणः गुणदोषार्थनियमस्तद्भिदमेव बाधते १६ समानकर्माचि
रणं पतितानां न पातकं औत्पत्तिको गुणः संगो न शयानः पतत्यधः १७ श्रीनृसिंहाय नमः

दोषस्य क्वचिद्दोषत्वाभावे गुणत्वे चोदाहरणं दर्शयति समानस्य तस्यैव कर्मणः सुरापानादेराचरणं अपतितानां
पतनहेतुरपि जातस्य कर्मणा वा पतितानां पुनः पातकं अधिकरंशकं न भवति एवमेव न पतितत्वात् अतोत्र दोषस्य
दोषता नास्तीत्यर्थः तथा संगोपि यो पतेर्दोषः स गृहस्थस्यौत्पत्तिकः एवं स्वीकृतो न दोषः अपि तु गुणः अतो भा
र्यामुपेयादिति विधानात उभयत्र दृष्टांतः एवमेवाधः शयानो यथा न पतति १७ श्रीरामो जयति श्रीराम

भा०ए०

९८

अतो गुणदोषनियमविधीनां प्रवृत्तिसंकोचद्वारा निवृत्तावेव तात्पर्यमित्यभिप्रेत्याह यतो यत इति १८ यथाश्रुतप्रवृत्तिप
रतां वेदस्य निराकर्तुं प्रवृत्तिमार्गस्यानर्थहेतुतां दर्शयति विषयेष्विति चतुर्भिः प्रथमं विषयेषु गुणाध्यासात् परमरमणीयता
बुद्धिस्ततस्तेषु संगः आशक्तिः तत्र तेषु विषयेषु येन प्रतिहन्यते कामः तेन सह कामात् स्वकलिः कलहो विवादः १९ दुर्वि
षहः तीव्रः तमः संमोहः तेनाधेय चेतना नाकार्याकार्यस्फूर्तिः द्रुतं शीघ्रं २० शून्याय कल्पते असत्तुल्यो भवतीत्यर्थः स्वार्थ
विभ्रंशः पुरुषार्थहानिः मूर्छितस्य मृततुल्यस्य २१ तमुल्लत प्रपंचयति विषयेति नापरं आत्मानात्मनात्म देहादिकं चनवे

यतो यतो निवर्तेत विमुच्येत ततस्ततः एष धर्मो नृणां क्षेमः शोकमोहभयापहः १८ विषयेषु गुण
ध्यासात् पुंसः संगस्ततो भवेत् संगात्तत्र भवेत्कामः कामादेव कलिर्नृणां १९ कलेर्दुर्विषहः क्रोधस्तम
स्तमनुवर्तते तमसा ग्रस्यते पुंसश्चेतना व्यापिनी द्रुतं २० तया विरहितः साधो जंतुः शून्याय कल्पते ततोऽस्य
स्वार्थविभ्रंशो मूर्छितस्य मृतस्य च २१ स एषामभिनिवेशेन नात्मानं वेद नापरं वृक्षजीविकया जीवन् व्यर्थं
भस्त्रेव यः श्वसन् २२ फलश्रुतिरियं नृणां न श्रेयो रोचनं परं श्रेयोविवक्षया प्रोक्तं यथा भैषज्यरोचनं २३

वृक्षवत् जीविकयैव यो वर्तते स मूर्छिततुल्यः अत एव यो भस्त्रेव श्वसन् वर्तते स मृततुल्यः अतः स्वार्थनाश इत्यर्थः २२ ननु
तत्र स्वर्गादिफलश्रवणात् कृतः स्वार्थभ्रंश इत्यत्राह इयं फलश्रुतिः न श्रेयः परमपुरुषार्थपरा भवतीत्यर्थः २३ किंतु बहि
र्मुखानां नृणां लौकिक विवक्षया प्रवृत्तावपि फलश्रवणं रुच्युत्पादनमात्रं बहिर्मुखस्य तावत्प्रवृत्तिर्न भवतीत्यर्थः नाव यथा
भैषज्ये रोचनं रुच्युत्पादनं तथा हि पिब निंबं प्रदास्यामि खलु ते खंडलड्डुकान् पित्रैवमुक्तः पिबति न फलं तावदेव तु २३

राम

९८

न तु कर्मकाण्डे मोक्षस्य नामापि न श्रूयते कुत एवं व्याख्यायते यथाश्रुतस्यार्थस्यानादित्वात्तत्राह उत्पत्त्येति द्वाभ्याम् उत्पत्त्यैव स्वभावत एव कामेषु
वादिषु प्राणेषु आयुरिन्द्रियबलवीर्यादिषु पुत्रादिषु च अनर्थहेतुषु परिपाके दुःखहेतुषु २४ अतस्तान् स्वार्थं परमसुख
मविदुषः अतो न तान् प्रति वेदो यथा बोधयिष्यति तदेव श्रेय इति विश्वासितानित्यर्थः तानेवं भ्रमतां वृजिनाध्वनि काम्यव
र्त्मनि देवादियोनिषु भ्राम्यतः ततः पुनस्तमः स्थावरादियोनिं विशतः पशुकाम इति आयुरिन्द्रियादिकाम इति च
कथं पुनस्तेष्वेव कामेषु स्वयं बुधो वेदो युञ्ज्यात् प्रवर्तयेत् तथा सत्यनाप्तः स्यादिति भावः २५ कथं तर्हि कर्म कर्ममीमांसकाः

उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च आसक्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु २४ न तानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि कथं युञ्ज्यात् पुनस्तेषु तांस्तमो विशतो बुधः २५ एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः फलश्रुतिं कुसुमितां न वेदज्ञा वदंति हि २६ कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः अग्निमुग्धा धूमतांताः स्वं लोकं न विंदंति ते २७ श्रीरामकृष्णाय नमः

फलपरतां वदंति तत्राह एवमिति व्यवसितं वेदस्याभिप्रायं कुसुमितां अवांतरफलप्ररोचनया रमणीयां परमफल
श्रुतिं वदंति कुतस्ते कुबुद्धयस्तत्राह हि यस्माद्वेदज्ञा आसादयतस्तथा न वदंतीति २६ कुबुद्धितां प्रपंचयति कामिन इत्यादि
भिः कामित्वात् कृपणाः ततो लुब्धाः तत्र हेतुः लालसाः ततः पुष्पेष्ववांतरफलेषु परमफलबुद्धयः अतएवाग्निमुग्धा अग्निसा
ध्यकर्मणि निवेशेन लुप्तविवेकाः ततश्च धूमतांताः धूमे ता धूममार्गे श्रांता येषां ते स्वं लोकमात्मतत्त्वं तथा च श्रुतिः
कश्चिद्ब्रवाक् अस्मात् लोकात् प्रेत्यात्मा नैव स्वं पश्यत् अहमस्मीति कश्चित् स्वं लोकं न प्रतिजानाति अग्निमुग्धो हैव धूमतांत इति २७

कोसौ स्वलोकस्तमाह नेति हृदिस्थमात्मानं मां स्वलोकं नतु हृदिस्थमहंकारास्पदं जानंत्येव स सं परमात्मानं तं न जानंतीत्याह य इदं यच्च ततिरिक्तं जगन्नास्ति भूतं यत श्चोत्पद्यते यत इदं ब्रह्म जातं तं तु तो न जानंतीति हि यस्मात् उक्थं तु मैं वशास्त्र प्रधानीयं पशुर्हिंसा साधनं गायेषां ते अत केवलं अभुतृप प्राणतर्पणपराः नीहारं तमः तेन व्याप्तानि चक्षूंषि येषां ते यथा सन्निहितमपि न जानंति तद्वत् तथा च श्रुतिः नतं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव नीहारेण प्रावृता जल्पा चासुतृप उक्थशासश्चरंति २८ वेदतात्पर्यानानाभिज्ञास्ते अन्यजंतीत्याह ते परोक्षमस्फुटं मे मतमविज्ञाय देवादीन्यजंते अन्तरे गान्वयः स्वमतमेवाह हिंसायां मांसभक्षणार्थं तत्फलायै च यदि रागः स्यात्तर्हि यज्ञ एवेत्यमनज्ञातचारापदि संरक्षेयं न तावत्संकल्पेन चोदने

नते मामंग जानंति हृदिस्थं य इदं यतः उक्थशस्त्रा ह्यसुतृपो यथा नीहारचक्षुषः २८ ते मे मतमविज्ञाय परोक्षं विषयात्मकाः हिंसायां यदि रागः स्याद्यज्ञ एव न चोदना २९ हिंसाविहारा ह्यालब्धैः पशुभिः स्वसुखेच्छया यजंते देवता यज्ञैः पितृभूतपतीन्खलाः ३० श्रीरामः

तेवं रूपं यद्यपि नित्यनैमित्तिकयोः कामविशेषात्मत्वं चोनास्ति तथापि कर्मणा पितृलोको इति सामान्यतः पितृलोककामा नास्त्येव कृत्स्नतः करणाश्रुद्धिकामाव नोवेति भावः तदुक्तं नाकामस्य क्रियाकाचिद्दृश्यते चेह कर्हिचित् यद्यद्धि कुरुते जंतुः तत्तत्कामस्य चेष्टितमिति २९ अतस्ता हेय हिंसया विहारः क्रीडा येषां ते ३० श्रीरामोजयति श्रीरामः

किंवते ऽतिमंस्तुवहस्त्याह स्वप्नोपममिति अमुंपरलोकंप्राशिवश्वासिल्लोकेसंकल्पनतुनिश्चितविघ्रकाऽस्मात
अर्थान्स्तजंतिकर्मसुविनियोजयंति यथाकश्चिद्दरिद्रःकुस्तरसमुद्रतरलघनेनवहुधनार्जनेच्छयासिद्धधनंस
जन्तुभयधृष्टोभवतितद्वदित्यर्थः ३१ अतोरजःसत्वतमोनिष्ठास्तरजःसत्वतमोजुषःस्वानरूपानिंद्रादीनेवो
पासतेनतुमां यद्यपींद्रादीनामपिमदंशत्वान्मदुपासनमेवततस्तथापियथावन्नोपासतेभेददर्शित्वादित्यर्थः
३२ इतिसंकल्प्यास्मृतंतमेवसंकल्पंदर्शयति दूषयति तस्माभोगस्मांतेमहाशालामहागृहस्थाः ३३ ततःकि
मित्यतआह एवमिति अतोमत्त्ववरणालाभावान्नित्यंसंसतिरतोभवंतीतिभावः ३४ तदेवंप्रवृत्तिपरत्वंनि

स्वप्नोपममंलोकमसंतंश्रवणप्रियं आशिषोहृदिसंकल्प्यत्यजंत्सर्थान्यथावणिक् ३१ रजः
सत्वतमोनिष्ठारजःसत्वतमोजुषः उपासतइंद्रमुख्यान्देवादीन्नतथैवमां ३२ इष्ट्वेहदेवता
यज्ञैर्गत्वारंस्यामहेदिवि तस्यांतइहभूयास्ममहाशालामहाकुलाः ३३ एवंपुष्पितयावाचाव्याक्षिप्त
मनसांनृणां मानिनांचातिस्तब्धानांमद्वार्तापिनरोचते ३४ वेदाब्रह्मात्मविषयास्त्रिकांडविषयाइमे

परोक्षवादऋषयःपरोक्षंममचप्रियम् ३५

णाकत्वनिवत्यतिपरत्वमेवोपसंहरति वेदाइतिकर्मब्रह्मदेवताकांडविषयाइमेवेदाःब्रह्मात्मविषयाःब्रह्मैवात्मा
नसंसारीत्येतत्पराःतत्परत्वाप्रतीतेश्चफलश्रुतिरियंमरणांनश्रेयोरोचनेपरंश्रेयोविवसयाप्रोक्तायथाभैषज्य
रोचनमित्युक्तमेवकारणमनुस्मारयति परोक्षेतिपरोक्षवादाःप्रतीतिद्वयार्थप्रतिपादनपराःऋषयोमंत्रास्त
द्द्रष्टारोवातनुपरोक्षंब्रह्मतत्किमितियतःपरोक्षमेवममप्रियंअयंभावःप्रभ्रांतःकररणोवतदोऽहंयेनान्येरन

ननु वेदतात्पर्यविज्ञैर्जैमिन्यादिभिः किमिति तथा न वर्णितं मां विना न कश्चन वेद तदर्थं वा न कोपि वेद तत्राशयेनाह शब्दब्रह्मेति यावत्स
मात्मस्वरूपतोर्थतश्च दुर्विज्ञेयं तच्च स्वरूपतः सूक्ष्मं स्थूलं चेति द्विविधं तत्र सूक्ष्मं तावत्स्वरूपतोपि दुर्विज्ञेयमित्याह प्राणेंद्रियमयं
द्रयमं प्राणमयं प्रस्रुतं ततो मनोमयं पश्यंत्याख्यं ततः इंद्रियमयं मध्यमाख्यं तस्य वाग्व्यंजनात्मकत्वेन वागिंद्रियप्रधान
त्वात् किंच अनंतपारं समष्टिप्राणादिमयस्यानिर्विशेषस्य ब्रह्मणः कालतो देशतश्चापरिच्छेद्यत्वात् अर्थतोपि दु
र्विज्ञेयत्वमाह गंभीरं निगूढार्थं अतएव दुर्विगाह्यं मीतिप्रवेशानर्हं तथा च श्रुतिः चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्रा
ह्मणा ये मनीषिणः गुहायां त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंतीति प्रथमपर्य. वाचः शब्दब्रह्मणः

शब्दब्रह्म सुदुर्बोधं प्राणेंद्रियमनोमयं अनंतपारं गंभीरं दुर्विगाह्यं समुद्रवत् ३६
मयोपबृंहितं भूम्ना ब्रह्मणानंतशक्तिना भूतेषु घोषरूपेण बिसेषूर्णेव लक्ष्यते ३७

परिमितानि गणितानि यद्यपि ज्ञायंते परं तत्वमेभिरिति पदानि रूपाणि चत्वारि तानि वक्तार्यविप्रमनीषिणः तईद्य
यस्ते विदुर्नान्ये यतो गुहायां देहमध्ये त्रीणि निहितानि नेंगयंति स्वरूपं न प्रकाशयंति यतः केवलं वाचः तुरीयं च
तुर्यभागं वैखरीरूपं मनुष्याः शिक्षिता वदंति तमपि वर्णमपि कष्टेनैव न तु तत्वं जानंति ३६ तत्र मनीषिभिरपि वेद्यं यत्स
मरूपं दर्शयति मयेति मयांतर्यामिणा पवृंहितं अधिष्ठितं अतस्तस्यानेन ध्यापरिहेदमाह भूम्नेति अपरिच्छिन्नेन
तेऽप्यविकारित्वमाह ब्रह्मणेति अविकृतस्यापि नियंतृत्वं घटयति अनंतशक्तिनेति भूतेषु सर्वप्राणिषु
घोषरूपेण लक्षणालक्ष्यते मननविधिभिः अंतः सूक्ष्मत्वेन दर्शनिष्ठं ततः बिसेशोभ ऊर्णातंतुरिवेति ३७

प्र

राम
१००

ततो वैस्वर्य्यख्यातैया. बृहत्यावाचउत्पत्तिप्रकारं सदृष्टांतमाह यथेतित्रिभिः हृदयात्सकाशात्मुखात्मुखद्वारात् उद्वमतेव
हः प्रकट्यतीति दार्ष्टांतिके दर्शयति आकाशादिति प्राणः तदुपाधिर्हिरण्यगर्भरूपः प्रभुर्भगवानते नरूपेणाछंदोमयो
वेदमूर्त्तिः स्वतस्स्वप्नमयघोषवान्नादोपादानमनसा निमित्तभूतेन निमित्ततामेव दर्शयति स्पर्शादीन्वर्णान्निरूपयति
संकल्पयतीस्पर्शरूपितेनस्पर्शाभिहरणमयमलक्षणं हृदयाकाशाद्धृतीं सृजतीतितृतीयश्लोकेनान्वयः ३८ बृ
हतीं शाब्दतोर्थ्यख्यानाय विशेषणानि सहस्रपदवीं बहुमार्गांतस्वाह ॐकारात् उरःकंठादिसंयोगव्यंजितैः स्पर्शो

यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् आकाशात् घोषवान् प्राणो मनसा स्पर्शरूपिणा
३८ छंदोमयो ऽमृतमयो सहस्रपदवीं प्रभुः ॐकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषिताम्
३९ विचित्रभाषाविततां छंदोभिश्चतुरुत्तरैः अनंतपारां बृहतीं सृजत्याक्षिपते स्वयं ४०

दिभिर्भूषितां ॐकारश्चात्र हृदुत्थ सूक्ष्मोभिप्रेतः नतु ऽकारादिवर्णरूपः तस्य व्यंजकोटित्वात् तत्र स्पर्शाः कादि पं
चवर्गाः स्वराः अकारादयः षोडश ऊष्माणः शषसहाः अंतस्थाः यरलवाः ३९ विचित्राभिर्वैदिकलौकिकभा
षाभिर्विततां यथोत्तरं चतुर्भिश्चतुर्भिरक्षरैरुत्तराणि उत्तरादीन्यधिकानि येषां तैः छंदोभिरुपलक्षितां एवमनंतपारां सृज
ति स्वयमेवाक्षिपते उपसंहरति च ४०

तेषु कतिचित् छंदांसि दर्शयति गायत्रीति तत्र चतुर्विंशत्यक्षरा गायत्री ततश्चतुरक्षरवृद्ध्योष्णिगादिछंदांसि क्रमतोऽतिच्छंदः अतिजगतोऽत्यतिविराडुच्यतेऽस्यार्थः एतैश्छंदोभिरुपलक्षिता गिर इति पदैरन्वयः अतो वक्ष्यते विसावाल्पेनस्वरूपतो दुर्ज्ञेयमुक्तं ४१ अर्थतोपि दुर्ज्ञेयत्वमाह किमिति कर्मकांडे विधिवाक्यैः किं विधत्ते देवताकांडे मंत्रवाक्यैः किमाचष्टे प्रकाशयति ज्ञानकांडे किमनूद्य विकल्पयेत् निषेधार्थमित्येवमस्या हृदयं तात्पर्यं मत्तोऽन्यः कश्चित् न वेद ४२ ननु तर्हि त्वं मत्स्वरूपया कथय तमिति कथयति मामेव यज्ञरूपं विधत्ते मामेव तत्तद्देवतारूपमभिधत्ते न मत्तः पृथक् यदाकाशादिप्रपंचजातं तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिना विकल्प्यापोह्यते निराक्रियते

गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च त्रिष्टुब्जगत्यतिछंदो ह्यत्यष्ट्यतिजगद्विराट् ४१ किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ४२ मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते त्वहं एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदां ४३ मायामात्रमनूद्यांते प्रतिषिध्य प्रसीदति ४४ इति श्रीभागवते महापुराणे एकादशस्कंधे एकविंशोऽध्यायः २१

तद्व्यहमेव न मत्तः पृथगस्ति ४२ कृतसंकेतावधिः सर्ववेदार्थसंक्षेपतः कथयति एतावानेव सर्वेषां वेदानामर्थः तं मेवाह शब्दो वेदः मां परमार्थरूपमाश्रित्य भिदां मायामात्रमित्यनूद्य अंते नेह नानास्ति किंचनेति प्रतिषिध्य प्रसीदति उपरतव्यापारो भवतीत्ययं भावः यथाहं कुरोयोरसः स एव तद्विस्तारभूतनानाकांडशाखास्वपि तथैव प्रणवस्यायोऽर्थः परमेश्वरः स एव तद्विस्तारभूतानां सर्ववेदकांडशाखानामपि संगच्छते नान्यदिति ४३ निस्पृतः

द्वाविंशे तत्त्वसंख्यानामविरोधो विधीयते पुंप्रकृत्योर्विवेकश्च जन्ममृत्युविधा इव १ तदेवं वेदनाप्रवृत्तिपरत्वं
निराकृत्य मोक्षपरत्वं निर्णीतं सति मोक्षपरत्वेपि तत्त्वांतरविवादः तथाहि केचित्तत्त्वसंख्यासु विवदंते तत्रा
पि चवाद्याद्यर्थसद्देश्यात्मतत्त्वेप्येकत्वनानात्वादिषु तत्र किं सत्यमिति जिज्ञासया पृच्छति कतीति त्रिभिः ऋषिभिरागमे
षु बहुधा संख्यातानि तेषु कति युक्तानीत्यर्थः भगवन्मतानुवादपूर्वकं बहुधा संख्यानं प्रपंचयति नवेति त्रि
भिः त्वं तावदष्टाविंशति तत्त्वान्यात्थ एतानि च वयं शुश्रुम श्रुतवंतः १ एतावत्त्वं भाव एतावत्त्वं नाम नानात्वमि

श्रीउद्धवउवाच कतितत्त्वानि विश्वेशसंख्यातान्यृषिभिः प्रभो नवैकादश पंच त्रीण्यात्थ त्वमिह
शुश्रुम १ केचित्षड्विंशतिं प्राहुरपरे पंचविंशतिं सप्तैके नवषट्केचित्चत्वार्येकादशापरे २
केचित्सप्तदशप्राहुः षोडशैके त्रयोदश एतावत्त्वं हि संख्यानामृषयो यद्विवक्षया गायंति
पृथगायुष्मन्निदं नो वक्तुमर्हसि ३ श्रीभगवानुवाच युक्तं च संति सर्वत्र भाषंते ब्राह्मणा यथा
मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटं ४

त्यर्थः २ यद्विवक्षया यत्प्रयोजनमभिप्रेत्य च गायंति हे आयुष्मन्नित्यमृते: २ ३ विवक्षाभेदेन सर्वं युक्तमेव मा
यया च किं नाम युक्तमित्याह युक्तमिति यथा ब्राह्मणा भाषंते तत्युक्तं च न वस्तात अस्मात्संति सर्वत्रांतर्भूतानि
सर्वाणि तत्त्वानि किं च मायामिति अन्यसत्त्वेपि मामाश्रित्य वदतां तद्दुर्घटमेव तत्रापि उद्गृहस्वीकृत्य नहि मरीचि
जलपूर्णं भारतादि विवादर्शि चिद्धर्षितमिव भवति ४ श्रीभगवान

किंचित्कुतः प्रत्यक्षादिप्रतीतिप्रपंचस्य बाध्यायोगात् वेदांतार्थीनां च कार्यपरत्वप्रतिपादनपरत्वेनार्थवादत्वात् द्वैतं सत्यमिति मन्यंते तन्मतं मन्त्रद्वयेन दूषयति यदि तैनामरूपाभिः नामरूपोपलक्षितं पंचभूतात्मकं द्वयं द्वैतं यत्तदबाधितमिति पंडितमानिनां अत्र वयमेव पंडिता इत्यभिमानवतां वेदांते ध्वयमर्थवाद इति प्रतीतिः न तत्त्वविदां यत् अर्थेन सा प्रतीति तत्राहि न तावद्विध्येकवाक्यत्वं तेषां मन्तव्यं तोऽर्थवादत्वं स्यात् नचाकर्त्तृभोक्तृपरमानंदरूपात्मप्रतिपादनां कर्मविधिशेषतां भजते न चाबाधितत्वं द्वैतस्य नामरूपात्मकत्वात् ग्राह्यत्वात्पंचवर्णात्मकत्वात् स्वप्नवादिसाधर्म्यमनेनैवाभ्यसनरागादि

यन्नाम आकृतिभिर्ग्राह्यं पंचवर्णमबाधितं व्यर्थेनाप्यर्थवादोऽयं द्वयं पंडितमानिनां ३६ योगिनोऽपक्वयोगस्य युंजतः काय उत्थितैः उपसर्गैर्विहन्येत तत्रायं विहितो विधिः ३७ योगधारणया कांश्चिदासनैर्धारणान्वितैः तपोमंत्रौषधैः कांश्चिदुपसर्गान्विनिर्दहेत् ३८ कांश्चिन्ममानुध्यानेन नामसंकीर्तनादिभिः योगेश्वरानुवृत्त्या वा हन्यादशुभदान्बुधः ३९ श्रीरामो जयति

श्रुतिभिश्च बाधितत्वादिति ३६ तदेवं ज्ञानयोगं सपरिकरं निरूप्येदानीं तन्निष्ठस्य विघ्नप्रकारमाह योगिन इति त्रिभिः योगं युंजतः कायोपपंचतरेवो त्पन्नैरुपसर्गैरोगाद्युपद्रवैः अभिभूयते तत्रायं विधिः प्रतीकारो विहितः ३७ योगधारणया सोमसूर्यादिधारणया पंततापशीतादीन् आसनैर्वायुधारणान्वितैः वातादिरोगान् तपोमंत्रौषधैः पापग्रहसर्पादिकृतान् ३८ ममानुध्यानादिभिः कामादीन् योगेश्वरानुवृत्त्या दंभमानादीन्हन्यात् ३९ श्रीरामो जयति

आत्मनो निर्विकारतां प्रपंचयति एष इत्यनेन अपरोक्षतया नित्यप्राप्तस्यात्मनः प्राप्तिं वारयति स्वयंज्योतिरित्यनेन अज्ञानमलापाक
रणलक्षणं विकृतिं वारयति अज इत्युत्पत्तिं वारयति अप्रमेयेति ज्ञानलक्षणातिशयाधानेन संस्कारं महानुभूतिरिति देश
कालपरिच्छेदाभावेनास्तित्ववृद्धिविपरिणामक्षयनाशान् ज्योतिष्ट्वादेर्हेतुः सकलानुभूतिरिति एकोऽद्वितीय इति विका
रहेतुरन्यस्याभावात् तस्याभावान्न कोऽपि विकार इति दर्शयति ननु ज्योतिर्विषयनाशात् ज्योतिष्ट्वादेर्हेतुः सकलानुभू
तिरिति चेत्तत्राह वचसां विरामेऽप्यगोचरत्वेन निवृत्तेस्तस्मात् यतश्च श्रुतिः यतो वाचो निवर्तन्ते अप्राप्य मनसा सह इति
अत्र हेतुः येनेषिताः प्रेषिताः तथा च श्रुतिः केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः केनेषितां वाचमिमां वद

एषः स्वयंज्योतिरशेषयोऽमलानुभूतिः सकलानुभूतिः एकोऽद्वितीयो वचसां विरामे येनेषिता वागसव
श्चरंति ३६ एतावानात्मसंमोहो यद्विकल्पस्तु केवले आत्मन्नृते स्वमात्मानमवलंबो न यस्य हि ३५

त्मा

ति च श्रुतिः श्रोत्रं करद्देवो युनक्ति श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं प्राणस्य प्राणं चक्षुषश्चक्षुरिति ३६ अद्विती
यत्वमुपपादयितुं भेदस्याभावत्वमाह एतावानिति केवले अभिन्ने आत्मन् आत्मनि विकल्प इति यत एतावानेव स
र्वोऽप्यात्मनो मननस्य संमोहः भ्रमः हि यतः स्वमात्मानमृते विना यस्य विकल्पस्याचलत्वं आश्रयो नास्ति रजतभ्रमस्येव
शुक्तिं विना नेह नानास्ति किंचन इंद्रो मायाभिः पुरुरूप ईयते एको हंसो हृदयः ज्ञाता इत्येवं इत्यादि श्रुतेरित्यर्थः ३५

भा०१० तद्देव मात्मा न विक्रियत इत्युक्तं तेनन्वे तदुत्पन्नं बद्धावस्थायामुत्पद्यमानत्वात् मुक्तावस्थायां च गृह्यमाणत्वात्
नहि व्रीह्योरवघातेन व्रीहितावस्थागतस्तंडुलीभावेन गृह्यमाणो विक्रियते तत्राह एवमिति बद्धावस्थायां गुरोः
कर्मभिश्च चित्रमज्ञानकार्यं देहेंद्रियादिलक्षणं प्रत्यग्नपृथ्व्यासेनाविविक्तं गृहीतमासीत् तदेव पुनर्ज्ञानेन विनिवर्त्त

एवं गृहीतं गुणकर्मचित्रमज्ञानमात्मात्मन्यविविक्तमंग निवर्त्तते तत्पुनरीक्षयैव न गृह्यते ना
पि विसृज्य आत्मा ३२ यथा हि भानोरुदयो नृचक्षुषां तमो निहन्यान्न तु सद्विधत्ते एवं समी
क्षा निपुणा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धेः ३३

ते आत्मा पुनः केनापि रूपेण गृह्यते नापि त्यज्यते अयं भावः मुक्तो हि क्रियाफलत्वेन भवेत्तावदात्मनो विकारः तस्मा
त्स्वारोपिताज्ञानमात्रनिवर्तनरूपत्वान्नात्मसंस्पर्शित्वं बंधमोक्षयोः अतो न विकार इति ३२ एतदेव दृष्टां
तेन स्पष्टयति यथेति न तु पदार्थमवसद्घटादि पुनर्विधत्ते करोति मे समीक्षा आत्मविद्या ३३ श्रीरामोजयति

ननु कथंचिद्विषयसंगे यस्यैव योगाद्भ्रंशः स्यात् अन्तं तर्हि सोपायेन योगमार्गेण तत्राह कुयोगिन इति मनुष्यभूतैर्बंधुशि
ष्यादि रूपैः त्रिदशैरुपसृष्टैः प्रेरितैः तथा च श्रुतिः यस्मात्तदेषां न प्रियं यदेतं मनुष्या विदुरिति भूयोपि योगं न तु कर्म
तंत्रं कर्मविस्तारं २८ ननु विदुषोपि सर्वथा देहाद्युपकारकं आहारादि कर्म दुष्परिहरमिति पुनः संसारः स्यात् अत आह करो
तीति विदुषोप्यसौ जंतुर्देहस्त्वं भोजनादि कर्म करोति क्रियते च तेन कर्मणा सुखाद्यपि प्राप्नोतीत्यर्थः केनापि संस्का
रादिना चोदितः सन् आनिपातात् मरणपर्यंतं करोति विद्वांस्तु प्रकृतौ देहे स्थितोपि तत्र कर्मणि सानुविक्रीते निरहंकारित्वा
त् स्वसुखविचारस्थितेः संसारं न प्राप्नोति २८ किं च आत्मनि तातौ वैदेहिक कर्मणि निर्विकारत्वं कायतो देहमप्यसौ न पश्यतीत्याह ति

कुयोगिनो ये विहिता ह्यंतरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः ते प्राक्तनाभ्यासबलेन भूयो युंजंति योगं न तु कर्मतंत्रं
२८ करोति कर्म क्रियते च जंतुः केनाप्यसौ चोदित आनिपातात् न तत्र विद्वान्प्रकृतौ स्थितोपि निवृत्ततृ
ष्णः स्वसुखानुभूत्या २९ तिष्ठंतमासीनमुत व्रजंतं शयानमुक्षंतमदंतमन्नं स्वभावमन्यत्किमपीह
मानमात्मानमात्मस्थमतिर्न वेद ३० यदि स्म पश्यत्यसदिंद्रियार्थं नानानुमानेन विरुद्धमन्यत् न
मन्यते वस्तुतया मनीषी स्वाप्नं यथोत्थाय तिरोदधानं ३१

इदं मिति उक्षंतं मूत्रयंतं स्वभाव प्राप्तमन्यद्यपि दर्शन स्पर्शनादि ईहमानं प्रकुर्वंतं आत्मानं देहं ३० ननु इंद्रियवतः सर्वथा
कथमदर्शनं संभवतीति तत्राह यदीति यद्यपि असंतं बहिर्मुखानामिंद्रियाणामर्थं पश्यति तथापि नानात्मसात्
मिथ्या स्वप्नवदित्यनुमानेन विरुद्धं बाधितं सत् अन्यदात्मव्यतिरिक्तं मनीषी वस्तुतया न मन्यते स्वाप्नं उत्थाय प्रबुद्धा
संस्कारमात्रेण स्वाप्नविषयं स्फुरंतं अत एव स्वयमेव तिरोभवंतं यथा तद्वत् ३१ श्रीरामशरणं श्रीरामो जयति

भा० ११ एवं विविक्तज्ञानवतो मुक्तस्येन्द्रियादिकृतो गुणदोषसंबंधः स्यादित्याह समाहितैरिति मत्सुविविक्तधाम्नः मम सुष्ठु विविक्तं धाम
स्वरूपं येन तस्य २८ प्रकाशकस्य प्रकाश्यगुणदोषा न संभवतीति रविदृष्टांतेनोक्तं असंगत्वस्य तेनावस्थितस्य न कोपि
१२५ गुणदोष इत्याकाशदृष्टांतेनाह यथेति वाय्वादीनां शोषणदहनक्लेदनरजोभ्रसरत्वादिभिर्गतागतैरागमापायिभिः
ऋतुगुणैः शीतोष्णादिभिर्वा अहंमतेः अहंकारात् सत्त्वादिमलैः संसृतिहेतुभिर्न युज्यते यद्वा अहंकारस्य संसृतिहेतुभिरिति २९

समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः विक्षिप्यमाणैरुत किं नु दूषणं घने
रुपेतैर्विगतैरवेः किं २८ यथा नभो वाय्वनलाम्बुभूगुणैर्गतागतैर्वर्तुगुणैर्न सज्जते तथाऽक्षरं सत्वरजो
तमोमलैरहंमतेः संसृतिहेतुभिः परं २९ तथापि संगः परिवर्जनीयो गुणेषु मायारचितेषु तावत्
मद्भक्तियोगेन दृढेन यावद्रजो निरस्येत मनःकषायः ३० यथामयोऽसाधुचिकित्सितो नृणां
पुनःपुनः संतुदति प्ररोहन् एवं मनोऽपक्वकषायकर्म कुयोगिनं विध्यति सर्वसंगं ३१ श्रीरामोजं०

मुक्तस्यैवं तथापि असम्यग्ज्ञानी न यथेष्टमाचरेदित्याह तथापीति गुणेषु विषयेषु रजः रागः मनसः कषायः इति
३० दुर्निरासतामाह एतद्दृष्टांतेनोपपादयति यथेति नृणामामयो रोगः असाधु असम्यक् यथा न भवति तथा
अपक्वकषायकर्म दग्धाः कषाया रागादयो यस्मिन् तानि कर्माणि यस्मिन् तत् अत एव सर्वसंगं सर्वेभ्यआदिषु
सज्जमानं मनः कुयोगिनं असम्यग्ज्ञानिनं विध्यति भ्रंशयति ३१ श्रीरामः श्रीरामः श्रीराम

राम
१२५

एवंसामान्यतः कार्यप्रकारयोः कारणप्रकाशकाभ्यांमभेदमुक्त्वाधुनातदुभयविवेकपूर्वकंप्रपंचस्यब्रह्माभेदमाह अविद्य
मानइतियोयंवैकारिको विकारसमूहः सएषप्रागविद्यमानोराजसः सर्गः रजोद्वारेणब्रह्मकार्यभूत इत्यर्थः अवभास
तेपिब्रह्मप्रकाशरूपत्वेनेत्यर्थः ब्रह्मतुस्वयंस्वतः सिद्धंनतुकार्यमित्यर्थः ज्योतिश्चप्रकाशकमित्यर्थः अतः कारणात् इंद्रिया
णांचअर्थानांचआत्मनांशरीराणांचप्राणानाममनश्चदेवतानामप्युपलक्षणं तथाविकाराः भूतानिएवंचित्रंब्रह्मैवभा
तीति २१ उपसंहरति एवंनिगमनतयः प्रत्यक्षेपितिसनमाने स्फुटंयथाभवतितथाब्रह्मविवेकहेतुभिः तथापरस्यदेहा
देरपवादेनआत्मतत्त्वनिरासेनचकीदृशेनविशारदेननिपुणेनगुरुणानिमित्तभूतेनेतिवा आत्मविषयंसंदेहंछि

अविद्यमानोऽप्यवभासतेयोवैकारिकोराजससर्गएषः ब्रह्मस्वयंज्योतिरतोविभातिब्रह्मेंद्रियार्थात्मवि
कारचित्रं २१ एवंस्फुटंब्रह्मविवेकहेतुभिः परापवादेनविशारदेन छित्वात्मसंदेहमुपारमेतस्वानंदतुष्टोऽ
खिलकामुकेभ्यः २२ नात्मावपुःपार्थिवमिंद्रियाणिदेवाह्यसुर्वायुर्जलंहुताशः मनोन्नमात्रंधिषणा
चसत्वमहंकृतिःखंक्षितिरर्थसाम्यं २३

त्वास्वानंदतुष्टः सन्नखिलेभ्यः कामुकेभ्यः इंद्रियादिभ्यः उपारमेतनिःसंगोभवेत् २२ परावरंप्रपंचयति वपुरात्मानभवति पार्थि
वत्वात् घटवत् तथाइंद्रियाणितदधिष्ठातारोदेवाअसुः मनः धिषणाबुद्धि सत्वंचित्तंअहंकृतिरित्येतेप्यात्मानभवंतिकुतः अन्न
मात्रंअन्नोपचयमत्वात शरीरवत् वायुर्जलंच हुताशनस्तेजः खंक्षितिरितिपंचभूतानि अर्थाः शब्दाद्यः साम्यंप्रकृतिश्च
नात्मानजडत्वात् घटवत् इति यद्वाहिशब्देनानुमानांतराणिसूचितानि तद्यथाइंद्रियाण्यात्मानभवंति करणत्वात्
वास्यादिवत् देवाअवैकारिकत्वात मनोवत् प्राणश्चवायुत्वाद्बाह्यवायुवत् इत्यादि २३ श्रीरामोजयति

तदेवंकार्यस्यकारणमव्याकृतमनुक्ताप्रकाशस्यप्रकाशकात्मतामाह विज्ञानमिति त्रियवस्थ्यकाम्समयका
ठःधुदेन्मुरोधेननाग्रदास्थ्यवस्थायद्विज्ञानंमनःतद्रवस्याकारणमत्तेचयद्गुणत्रयं पत्तुकारणंकार्यकर्तृका
रणमध्यात्मकार्यमधिभूतंकर्ताधिदैवं एवंगुणत्रयकार्यभूतंत्रिविधंजगत एतद्येनतुर्येणासामान्यज्ञानमा
त्रेणासमन्वयेनभवतियेनानुगतंप्रकाशतस्त्रयं: तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीति
तथास्वत्तःसर्वश्रुणुतश्रोत्रस्यश्रोत्रंमनसोयेमनोविदुरित्यादिश्रुतेः नतुविशेषविज्ञानव्यतिरेकेणतुर्येणनो

विज्ञानमेतत्त्रियवस्थमगगुणत्रयंकारणकार्यकर्तृ समन्वयेनव्यतिरेकतश्चैश्चये
नैवतुर्येणतदेवसत्यं २० नयत्पुरस्तादुतयन्नपश्चान्मध्येचतन्नव्यपदेशमात्रं
भातंप्रसिद्धंचपरेणयद्यत्तदेवतत्स्यादितिमेमनीषा २१

पलभामहे तत्राह व्यतिरेकतश्च समाप्या सैयदस्तितदेवसत्यमिति २० एवंकालत्रयेप्यव्यभिचारित्वा
सत्यत्वमुक्तंव्यभिचारिणस्त्वसत्यतामाह नयदिति मध्येचतत्स्थपञ्चनास्तिकिंतव्यपदेशमात्रंकुतः यतः यद्य
त्परेणाव्यन्वयेनभातंजातंप्रसिद्धंप्रकाशितंचयत्तदेवकारणंप्रकाशकंतावन्मात्रंस्यान्नत्वपरमितिमेमतिर्मनीषा
बुद्धिः वाचारंभणंविकारेणामध्येयंप्रतिकेतस्यैवसत्यं सर्वंखल्विदंब्रह्मेत्यादिश्रुतेः कारणप्रकाशकव्यतिरेके
णावकार्यस्यप्रकाशस्यचानुपलंभादितिभावः २१ श्रीरामोजयति

एतदेव ज्ञानं स्वरूपसाधनफलैर्निरूपयति ज्ञानमिति विवेको ज्ञानं साधनान्याह निगमो वेदः तपः स्वधर्मः प्रत्यक्षं स्वानुभावः ऐतिह्यमुपदेशः अनुमानं तर्कः फलमाह आद्यंतयोर्यदस्य जगतः मध्येऽपि तदेव केवलं न तु जगदिति किं तत् कालयति प्रकाशयतीति यः तथा हेतुः कारणं च यत् तदेव एतज्ज्ञानं भवतीति यत् अस्य विश्वस्य कारणं प्रकाशकं च ब्रह्म तदात्मकमेतत् न ततः पृथगित्येवं निश्चयफलो निगमादिसाधनैर्ज्ञायते यो विवेकः तत् ज्ञानमिति १८ तत्र नानात्मेदव्यवहारालंबनस्यापि विश्वस्य कारणमात्रात्मकत्वं सदृष्टांतमाह

ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानं आद्यंतयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये १८ यथा हिरण्यं सुकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् १९

यथेति सुकृतं सत् कुंडलादिरूपेणाविरचितं यद्धिरण्यं कीदृशं हिरण्मयस्य कुंडलादेरुत्पत्तेः पूर्वं पुरस्तात् नाशाच्च पश्चाद्यदस्ति मध्ये कटककुंडलमित्यादिनानाव्यपदेशैर्व्यवहारं प्राप्यमाणमपि तदेव यथा तद्वदस्य विश्वस्य कारणात्मतोऽहमेव नानाव्यवहारालंबनं न तु मत्तः पृथग्विश्वमिति १९ रामचंद्राय नमः

ननु कथंचिद्ध्यानतो विषयस्फूर्त्तिर्जीवन्मुक्तस्यापि दृश्यते तस्मात्पुनः संसारप्रसंगः स्यात्तत्राह यथा हीति प्रस्वापः स्वप्नः ब
ह्वनर्थभृद्भीतिप्रदातीति तथा १४ अहंकारादात्मनो देहादिसन्निकर्ष एव संसारलक्षणमित्यन्वयव्यतिरेकाभ्यां
दर्शयति शोकेति स्पृहादयस्तेषामदर्शनात् अहं सुखीति दुःखीति वेत्यहं सुखीति प्रतीत्यभावात् सुखादीनां कृष्णसादिद्
व्यभिचारस्तावदुपपत्तिरिति भावः जन्मेहं म्रिये न दृश्येते ऽःखेदोत्थप्रव्रजयः अतस्तस्यैव संसारो न मे संसृतिसाक्षिणः १५
न केवलमहंकारस्य संसारस्तादृश्यापि तस्यैवेति मुक्तावहंकारादिबोधः प्रसज्येत तत्राह देहेति देहाद्यभिमानो
यस्य सः आत्मैवते तेषां मतमहितेन जीवः अत एव गुणकर्ममयी मूर्त्तिर्यस्य सः एवं च सूक्ष्मोपाधिभिर्वेष्ट्येव सूत्रादिशब्दै

यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् स एव प्रतिबुद्धस्य न वै मोहाय कल्पते १४ शोकहर्ष
भयक्रोधलोभमोहस्पृहादयः अहंकारस्य दृश्यन्ते जन्ममृत्युश्च नात्मनः १५ देहेन्द्रियप्राणम
नोभिमानी जीवोन्तरात्मा गुणकर्ममूर्त्तिः सूत्रं महानित्युरुधेव गीतः संसार आधावति कालतंत्रः १६
अमूलमेतद्बहुरूपरूपितं मनोवचःप्राणशरीरकर्म ज्ञानासिनोपासनया शितेन च्छित्वा मुनि
र्गां विचरत्यतृष्णः १७

गीतिः संसारे परमेश्वराधीनः सर्वतः आधावति अतो नायं देहो वइति भावः १६ तदेवमहंकारकृतं बंधमु
पपाद्य तन्निवर्त्तकज्ञानेन तन्निवृत्तो मुक्तिरित्याह अमूलमिति वस्तुतो मूलरहितं स्वप्नवज्ज्ञानतः तत्त्ववहुभी रूपैः रूपितं प्रका
शितं तेजसा लिंगतुल्यमिति वा किं तत्तदाह मन इति मनआदीनां देहबंध यद्वा मनआदिभिः क्रियते इति
कर्म अहंकार रागाद्युपासनया निशितेन ज्ञानखड्गेन छित्वा १७

एतन्निष्ठास्तु पापमाह प्रत्यक्षेणेति यदाद्यंतवत् देहादिकं तदसदिति ज्ञात्वा निःसंगो विचरेत् आद्यंतवत्त्वे प्रमाणानि प्रत्यक्षेण घटादि अनुमानेन सावयवत्वेन हेतुना पृथिव्यादि निगमेन प्रलयप्रसाधकवाक्यादि आत्मसंविदा स्वानुभवेन सर्वं दृश्यमाद्यंतवत् असदेवेति ज्ञात्वेति ९ ननु यथात्मसंविदा सर्वं दृश्यमसदित्युच्यते तथैवात्मा स्वप्रकाशो देहो देहादि चेतनं जडमिति कस्य स्यात् तदपि च संसारप्रतिभासो न घटत इति चोदयति नैवेति आत्मा स्वदृक् जडयोः अत्र हेतुः द्रष्टृदृश्ययोः मा भूत् द्वयोरपि तत्राह उपलभ्यत इति १० एतत्प्रपंचयति आत्मेति अव्ययत्वादिपंचविशेषणैर्नाशादिरागादि गुणपरिणामाज्ञानपरिच्छेदानीमसंभवं दर्शयति हेतुहेतुमत्तया पंच

प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा आद्यंतवदसज्ज्ञात्वा निःसंगो विचरेदिह ९ श्रीउद्धव उवाच नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः अनात्मस्वदृशोरीश कस्य स्यादुपलभ्यते १०
आत्माव्ययोऽगुणः शुद्धः स्वयंज्योतिरनावृतः अग्निवद्दारुवदचिद्देहः कस्येह संसृतिः ११
श्रीभगवानुवाच यावद्देहेन्द्रियप्राणैरात्मनः सन्निकर्षणम् संसारः फलवांस्तावदपार्थोऽप्यविवेकिनः १२ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा १३

अचित् जडं अयं भावः यथैवाग्निर्दारुस्तरसोर्भेदेनानुपलंभे विदाह प्रकाशमेकं अग्निरेव प्रकाशकः तथा देहात्मनोरपीति न संसृतिस्तयोरन्यतरस्यापि घटत इति ११ सत्यं तथाप्युभयोरेवमविवेकेन संसारस्तन्निमित्ताहं च अभिमानादिति सन्निकर्षणं संबंधः नन्वसंगस्य कुतः संबंधस्तत्राह अविवेकिनः अज्ञानकृत इत्यर्थः न त्वस्वप्रकाशस्य कल्पनाजात संसारस्तत्राह अपार्थोऽपि मिथ्याभूतोऽपि केवलं फलवान् फलं स्फूर्तिर्न तु तत्त्वतोऽस्तीत्यर्थः १२ नन्वसतो

भा०९० द्वैतासम्भतयान्नीतिनिःस्पृो निर्विषयत्वं प्रपंचयतिसाद्धैः षड्भिः किंभिन्नमिति अवस्तुनो द्वैतस्य मध्येकिंभिन्नं किंवाऽभिन्नं कियद्भि
१३२ द्विकियद्वाऽभिन्नमित्यर्थः अवस्तुत्वमेवाह वाचेति वागिन्द्रियेणोक्तत्वं वाचाउदितं उक्तं चक्षुरादिभिरुपलक्षितं वा दृष्टं तत
दृष्टतमिति ६ नन्वेवंसतिदेहादिभावानामप्यसत्त्वात्कथं भयहर्षादितत्रसदृष्टांतेनाह छायाप्रतिबिंबेनसाऽऽत्म्यप्रतीति   ३
घ्नतिःआभासःभ्रांतिरजतादिः एतेयथाऽसंतोप्यर्थकारिणोभवंति आत्मानमभिज्ञायअप्य यदात्मस्वरूपलयः यावन्ने
वलीयंतेतावदसर्वंतामित्यर्थः ५ ननुरज्ज्वादिभ्रांतिभिरेवद्वैतंनिरूप्यपितिकथंमसत्त्वंस्यात्तत्राऽऽत्मनेवेतिद्वाभ्यांत्राय

किंभिन्नंकिमभिन्नंवाद्वैतस्यावस्तुनःकृपा वाचोदितंतथैवांतं मनसाध्यातमेवच ६ छायाप्रसादि
याऽऽभासाघसंतोप्यर्थकारिणः एवंदेहादयोभावाय थैताऽऽत्मतोभयं ५ आत्मैवतद्दिंकिंच
सृज्यतेसृजति प्रभुः त्रायतेत्रातिविश्वात्मा ह्रियतेहरतीश्वरः ८ तस्मान्नह्यात्मनोऽन्यस्मादन्यो
भावोनिरूपितः निरूपितेयंत्रिविधानिर्मूलाभातिरस्मनि ९ इदंगुणमयंविद्धित्रिविधंमाययाकृतं
एतद्विद्वन्मदुदितंजानन्विज्ञाननैपुणं ननिंदतिनचस्तौतिलोकेचरतिसूर्यवत् १०

तेपात्मपातेत्रीतिपात्मवीत ८ अन्यस्मात्स्वव्यतिरिक्तात् त्रिविधअध्यात्मादिरूपाभातिःप्रतीतिः ९ ननुरूपनिर्म
लंप्रतीयतेतत्राह इदमिति ज्ञानविज्ञानयोर्नैपुणंपनिपुणंदत्तंयथावत्समोभूत्वा एतन्निष्ठाप्राप्त्युपायमाह प्रत्यक्षेणेति   ५ राम
यदाद्यंतवत् द्वैतंतद्सदितिज्ञात्वा निःसंगोविचरेत् आद्यंतवत्त्वेप्रमाणानि प्रत्यक्षेणाघटादिध्वंसःअनुमानेनसावय   १३२
वत्वेनघटवत् पपिव्यादि निगमेनअप्रत्यक्षमाकाशादि आत्मसंविदास्वानुभवेनसर्वंदृश्यमाद्यंतवत् असच्चेति

सातुः फलमुक्तं अपहर्त्तारं निंदति य इति विड्भुक् विष्ठाभोजी क्रिमिः ५४ कर्त्तुर्यत्फलं तद्देवान्येषामप्याह कर्त्तुरिति सारथेः सहकारि
णः हेतुः प्रयोजकस्य अनुमोदितुः प्रेत्य तत्फलमित्यन्वयः कुतः यतः कर्मणामेते भागिनः भागार्हाः तत्रापि विशेषमाह भूयसि
कर्त्तरि सारथ्यादौ अल्पयोगित्वे फलमिति पूर्वः पत्रादिमात्रेणापकर्षितोऽयं परंपरं प्रागेव दर्शितमिति प्रीतः सकलः शरणागमः
५५ इति सप्तविंशतितमोऽध्यायः २७ अष्टाविंशे तु यः पूर्वं विस्तरेण प्रदर्शितः ज्ञानयोगः पुनस्तं समासेन समाहृत्य निरूप्यते
१ इदानीमति विस्तरेणोक्तं ज्ञानयोगं संक्षेपेणैव वक्तुमाह परेति परेषां स्वभावान् शांतघोरादीन् कर्माणि च तत्र हे

यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः वृत्तिं स जायते विड्भुग् वर्षाणामयुतायुतं ५४ कर्तुश्च सारथे
र्हेतोरनुमोदितुरेव च कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलं ५५ इति श्रीभागवते एकादश
स्कंधे सप्तविंशोऽध्यायः २७ श्रीभगवानुवाच परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् विश्व
मेकात्मकं पश्यन् प्रकृत्या पुरुषेण च १ परस्वभावकर्माणि यः प्रशंसति निंदति स आशु भ्रश्य
ते स्वार्थादसत्यभिनिवेशतः २ तैजसे निद्रयाऽऽपन्ने पिंडस्थो नष्टचेतनः मायां प्राप्नोति मृत्युं वा
तद्वन्नानार्थदृक् पुमान् ३

तु विश्वमिति १ विक्षेपदोषमाह परेति स्वार्थात् ज्ञाननिष्ठालक्षणात् असति मिथ्याभूते द्वैते द्वैताभिनिवेशात् २ भ्रंशमे
व दृष्टांततो दर्शयति तैजसे राजसाहंकारकार्ये इंद्रियगणे निद्रयाऽऽपन्ने अभिभूते सति पिंडस्थो जीवः केवलं मनोमात्रेण
मायां स्वप्नरूपां प्राप्नोति ततो मनसि लीने नष्टचेतनः सन् मृत्युं मृत्युतुल्यं सुषुप्तिं वा प्राप्नोति यथा तद्वन्नानार्थदृक्
द्वैताभिनिवेशी विक्षेपं लयं च प्राप्नोतीति यथा प्राज्ञसंपर्काद्विश्वस्य भोगस्य अपलक्षणो भ्रंशः एवमनात्मसंपर्कादात्म

ततः शेषाग्रहणपूर्वकं वैकल्पिकोद्वासनप्रकारमाह इतिरिति अनयैव प्रार्थनया शेषां निर्माल्यं मया दत्तां ध्यात्वा शि
रसा धाय च वा यद्युद्वासयेत् तर्हि प्रतिमायां यत्स्वं ज्योतिः तत्पुनरपि हृत्पद्मस्थज्योतिषि वोद्वासयेदित्यर्थः ४७ तेष्वधि
ष्ठानेषु किं स्वमित्यपेक्षायामाह अर्चादिष्विति यदा यत्र श्रद्धा तदा तत्र तदधिष्ठानेषु मम पूजा मुख्यत्वं कुतः यतः स
र्वभूतेष्विति ४८ उभयतः इह परत्र च ४९ सम्प्रत्याह मदर्चामिति त्रिभिः पुष्पोद्यानानि च कारयेत् पूजायात्रोत्सवा

इति शेषां मया दत्तां शिरस्याधाय सादरं उद्वासयेच्चेदुद्वास्यं ज्योतिर्ज्योतिषि तत्पुनः ४७ अर्चादिषु
यदा यत्र श्रद्धा मां तत्र चार्चयेत् सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ४८ एवं क्रियायोगपथैः
पुमान्वैदिकतांत्रिकैः अर्चन्नुभयतः सिद्धिं मत्तो विंदत्यभीप्सितां ४९ मदर्चां संप्रतिष्ठाप्य मं
दिरं कारयेद्दृढं पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितान् ५० पूजादीनां प्रवाहार्थं महापर्व
स्वथान्वहं क्षेत्रापणपुरग्रामान्दत्वा मत्सार्ष्टितामियात् ५१ प्रतिष्ठया सार्वभौमं सद्मना भुव
नत्रयं पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ५२ मामेव नैरपेक्ष्येण भक्तियोगेन विंदति
भक्तियोगं स लभत एवं यः पूजयेत मां ५३

श्रितान् पूजा प्रत्यहं यात्रा विशिष्टपर्वणि बहुजनसमागमः उत्सवः वसंतादिमहोत्सवः तदाश्रितान् ५० क्षेत्रा
दीन् दत्वा पूजायात्रोत्सवाश्रितानित्यस्य विवरणं पूजादीनामिति प्रवाहार्थं संततानुवृत्त्यर्थं मत्सार्ष्टितां मत्स
मानैश्वर्यं ५१ प्रतिष्ठादीनां व्यस्तसमस्तानां फलमाह प्रतिष्ठयेति मत्साम्यतां मया साम्यमित्यर्थः ५२ सका
मं प्रत्युक्तं अहैतुकं भक्तं प्रत्याह मामेवेति अहैतुकभक्तियोगः कथं भवतीति तत्राह अहैतुकभक्तियोगमिति ५३ १३१

राम

मूलमंत्रेणाष्टाक्षरेणाथ वा येन मंत्रेणोपासितस्तेन वा भगवते निवेदयेदन्नं प्रत्यह चमरुतिग्रहणेनैतस्यार्थः उपवासेऽप्येवं मूलमंत्रः तेनैव प्राश्य चाचमेत ततो होमं इति मंत्रैः स्वाहान्तैर्नाममंत्रैर्यथाम्नायं प्रजाकमेण वा अग्नये स्विष्टकृते स्वाहेति सर्वत्र स्विष्टकृतं च हुत्वा ८१ ततो वह्निस्थं पुनर्भगवन्तमभ्यर्च्य च नमस्कृत्य पार्षदेभ्यो नैवेद्यशेषेण बलिं हरेत् ततः पूजास्थानमागत्य देवस्याग्रे समुपविश्य यथाशक्ति मूलमंत्रं जपेत् ८२ तत्र उपयुक्तं भगवतो भोजनशेषं नाम्नि ध्यात्वा आचमनं दत्वा उच्छेषं विष्वक्सेनाय कल्पयित्वा तदन्नं पापघ्नं स्वयं भुञ्जीत ततः सुरभिमत्सुगंधवर्ती

गुरुर्यावन्मूलमंत्रेणाचार्यो राज्ञोपहरेत ततः धर्मादिभ्यो यथान्यायं मंत्रैः स्विष्टकृतं बुधः ८१ अभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो बलिं हरेत् मूलमंत्रं जपेद्ब्रह्म स्मरन्नारायणात्मकं ८२ दत्वाचमनमुच्छेषं विष्वक्सेनाय कल्पयेत् मुखवासं सुरभिमत्ताम्बूलाद्यमथार्हयेत् ८३ उपगायन् गृणन्नृत्यन् कर्माण्यभिनयन्मम मत्कथाः श्रावयन् शृण्वन् मुहूर्तं क्षणिको भवेत् ८४ स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि स्तुत्वा प्रसीद भगवन्निति वन्देत दण्डवत् ८५ शिरो मत्पादयोः कृत्वा बाहुभ्यां च परस्परं प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ८६

ताम्बूलादिकं मुखवासं दत्वाऽथ पुनरपि सम्पूर्णं अर्हयेत् पुष्पांजलिना पूजयेत् ८३ अभिनयन् स्वस्मिन्नाविष्कुर्वन् क्षणिकः क्षणमेवं परित्यज्य लब्धावसरो भवेत् ८४ स्तवस्तोत्राणां भेदः पौराणैः प्राकृतैरपीति ८५ कथं प्रणामो दृष्टव्यश्चेत् तथा माह शिर इति बाहुभ्यां शिरोऽन्तराभ्यां परस्परं मम शिरोऽन्तरोपरि हस्तौ गृहीत्वा यद्वा पृष्ठतः परस्परं निबद्धाभ्यां

[illegible] ६

फलाभयस्त्वाधिनाऽग्नावपि पूजाप्रकारमाह· विधिनास्व ग३ सौ तत्प्रकारेणामेखलादिभिरुपलक्षिते विहिते तउक्तौ विस्ता
रोघ्नायत स्मिंस्तस्मिन्मेखलात्रितयं रग्गला: हस्तमात्रो भवेऊर्त्तः सयोनिर्व्वेदिकातथेतित्यादि उक्तं प्रज्वलितं मग्निं परतः
समहृत्य एकत्र मेलयेत ३६ दर्भैः परिस्तीर्य परितः प्रोक्षयेत् अन्वाधाय अन्वाधानं संज्ञकं व्याहृतिभिः समित्त्रयस्य
क्षेपादि तत्पकर्म्मकृत्वाग्नेरुत्तरतो द्रव्याणि होमोपयोगीत्यासाघ निधाय प्रोक्षणापात्रे प्रोक्षणीपात्रोदकेन प्रोक्ष्या
ग्नौ मां ध्यायेत ३७ शंखादिभिरलसंतः शोभमानाश्चत्वारो भुजायस्य तं ३८ स्फुरंति किरीटादीनि यस्य तं ३९

विधिनाविहितेकुंडे मेखलागर्त्तवप्रिभिः अग्निमाधाय परितः समहृत्याग्निनोद्दितं ३६ परिस्ती
र्याऽपपर्युक्षेत्तन्वाधाय यथाविधि प्रोक्षणपाऽऽसाद्य द्रव्याणि प्रोक्ष्याग्नौ भावयेत मां ३७ तप्त
जांबूनदप्रख्यं शंखचक्रगदांबुजैः लसच्चतुर्भुजं शांतं पद्मकिंजल्कवाससं ३८ स्फुरत्किरीट
कटककटिसूत्रवरांगदं श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ३९ ध्यायेन्नभ्यर्च्य दारूणि
हविषाभिघृतानि च प्रास्याज्यभागावाघारौ दत्वा चाज्यप्लुतं हविः ४० श्रीगणेशायनमः

हविषा घृतेन अभिघृतानि संसिक्तानि दारूणि शुष्कसमिधः प्रास्य प्रक्षिप्य आघारौ तत्संज्ञकौ यागौ एवमाज्यभागौ
एवमाज्यभागौ च दत्वा तदर्थं आहुती द्वे त्वित्यर्थः तत्राघारौ प्रजापतये स्वाहा इंद्राय स्वाहेति चोत्तरदक्षिणापरि
धिमारभ्याग्निमध्यादापरिधिप्रांतं धारा लक्षणौ आज्यभागौ अग्नये स्वाहा सोमाय स्वाहेत्येवं होम लक्षणौ ४० राम

पाद्यादीनुपचारानवक्ष्यवेदितुकं तान्येव गणाविधिभिः प्रपंचयति वं इनोल्लेतिषड्भिः २८ मंत्रानाह स्वर्णधर्मानुवाकः
सुवर्णधर्मपदिस्वनम इत्यादिमहापुरुषविद्या जितंतेपुंडरीकाक्षनमस्तेविश्वभावन सुब्रह्मण्यनमस्तेस्तु महापुरुषपूर्व
जेति पुरुषसूक्तं सहस्रशीर्षेत्यादिनीराजनादीनियथामंत्रविधि कृत्वेतिसामानिइदं निरोभेमणिनाह वंताइसस्याभ्यचिर्गे
तानि आदिशब्देन रोहिणादीनि ३० वस्त्राद्युपचारेष्वलंकारलक्षणं गणं विधत्ते वस्त्रेति पत्रारागिकपोलवक्षस्य
तादिषु ।४।लिखिताःपत्रभंगपः मकरिकाथ्रेसत्रमयथाभवतितथा यथोचितमलंकुर्वीतिकार्यसर्वसाधारणं ३१

वं इनोशीरकर्पूरकुंकुमागरुवासितैः सलिलैःस्नापयेन्मंत्रैर्नित्यदाविभवेसति २८ स्वर्णधर्मा
नुवाकेन महापुरुषविद्यया पौरुषेणापिसूक्तेन सामभीराजनादिभिः ३० वस्त्रोपवीताभरणप
त्रस्रग्गंधलेपनैः अलंकुर्वीतसप्रेममद्भक्तोमांयथोचितं ३१ पाद्यमाचमनीयंचगंधंसुमनसोक्ष
तान् धूपदीपोपहार्याणिदद्यान्मेश्रद्धयार्चकः ३२ गुडपायससर्पिषिसक्कुल्यापूपमोदकान्
संयावदधिसूपांश्चनैवेद्यंसतिकल्पयेत् ३३ अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनं अन्ना
द्यं गीतनृत्यानिपर्वणिस्युरुतान्वहं ३४

अथाल्क्षणंगणंविधत्ते पाद्यमिति ३२ नैवेद्ये वैभवलक्षणं गणं विधत्ते गुडपायसेति सक्कुल्याःतैलपक्वविशेषाः
आपूपानामंडकाहीनांसमूहःसूपान्वंजनादिसतिविभवइतिशेषः ३३ कालभेदेन गणंविधत्ते अभ्यंगेति अभि
षेचनंपंचामृतादिस्नपनं अन्नाद्येति अन्नेभक्ष्यंभोज्यं आद्यंभक्ष्यंपर्वणिपर्वकाद्द्वश्यादौ अन्वहंप्रत्यहंवाविभवेति

भा०पु०

१२८

कल्पयेत्तद्ह पाद्येति पाद्यं धर्म्मादिभिर्म्मासनं २४ तत्र पद्मं कल्पयित्वा भाभ्यां वेष्टितं त्राभ्याम् अभयसिद्धये मह्यं पा
द्यादीनुपचारांस्तत्प्रकल्पयेत् इत्यन्वयः उपस्थरः प्रावरणं अरहितम् घं उभयसिद्धये वेष्टितं तत्रोक्तभक्तिमूर्तिं वाञ्छये अयम
र्थः धर्मज्ञानवैराग्यैश्वर्यरूपासनपर्यङ्कस्याग्नेयादिचतुःकोणेषु पादाः अधर्मादीनि पूर्वादिदिक्षु गात्राणि
त्रयो गुणाः पट्टिकाः तत्र पद्मादिकम् मध्ये च विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वी सत्येशाना अनुग्रहेति नव शक्तयः
एवंरूपं पादाद्यं धर्म्मादिभिर्नवभिश्च शक्तिभिरासनं कल्पयित्वेति कर्णिकायां केशरेस्तत्रस्य सूर्यादिमण्डलैः प्रोज्ज्वल

पाद्यो यस्य शोर्हरणादीन् उपचारान्प्रकल्पयेत् धर्म्मादिभिश्च नवभिः कल्पयित्वासनं मम २४ प
द्मम् अष्टदलं तत्र कर्णिका केशरोज्ज्वलं उभाभ्यां वेष्टितं त्राभ्याम् मह्यं तु भयसिद्धये २५ सुदर्शनं पाञ्चज
न्यं गदासीषु धनुर्हलान् मुशलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् २६ नन्दं सुनन्दं गरुडं प्रचण्डं
चण्डमेव च महाबलं चैव कुमुदं कुमुदेक्षणम् २७ दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून् सुरान् स्वे स्वे
स्थाने त्वभिमुखान्पूजयेत्प्रोक्षणादिभिः २८

मित्यर्थः २५ अत्र पाद्यादिपूजामाह सुदर्शनमिति त्रिभिः तत्रस्य सांगमित्यंगावरणपूजास्वितास्य आसने वै वशस्त्रा
भरणमष्टकं ततः सुदर्शनादिमुशलान्तानायुधानष्टसु दिक्षु कौस्तुभमालाश्रीवत्सानुरसि २६ नन्दादीन्पार्षदा
न् अष्टदिक्षु गरुडं पुरतः नामाग्रतः २७ दुर्गादीन् विदिक्षु कोणेषु गुरून्वामतः सुरानिन्द्रादीन् लोकपालान् पूर्वादिदिक्षु एवं
एतान्देवान्देवस्याभिमुखान्प्रोक्षणादिभिः अर्घ्यादिभिः पूजयेदित्यर्थः २८ श्रीराम राम राम राम राम

राम

१२८

पाद्यार्घ्यार्थं त्रीणि पात्राणि कलशोदकैः पूरितानि तैर्द्रव्यैः साधयेत् तत्र पाद्यादि द्रव्याणि पाद्ये श्यामाक दूर्वाऽब्जविष्णुक्रां
तादि द्रव्याणि गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः १२ दूर्वाचितिक्रमाद्र्घ्यद्रव्याष्टकमुदीरितमिति १ जातीलवंगक
कोलैर्मतमाचमनीयकमीरितम् २ ॥ २१ तानि च त्रीणि पात्राणि पाकमंत्रहृदयादिमंत्रैर्गायत्र्या च सर्वाण्यभिमंत्रयेत्
तदनंतरं पिंडे देहे वाय्वग्निसंशुद्ध इति क्रोधाज्ञातेन वायुना मोचितेन प्राणायामेनाग्निना संदग्धेन ललाटस्थचं
द्रमंडलामृतप्लावनेन नाममये जाते तस्मिन् हृत्पद्मस्थापरंब्रह्मजीवकलां श्रीमन्नारायणमूर्तिं ध्यायेत् केचिदेतां नाचो

प्रोक्ष्यपात्राणि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च साधयेत् पाद्यार्घ्याचमनीयार्थं त्रीणि पात्राणि देशिकः २१ हृदा
शीर्ष्णाथ शिखया गायत्र्या चाभिमंत्रयेत् पिंडे वाय्वग्निसंशुद्धे हृत्पद्मस्थां परां मम अण्वीं जी
वकलां ध्यायेन्नादांते सिद्धभावितां २२ तयात्मभूतया पिंडे व्याप्ते संपूज्य तन्मयः आवाह्यार्चादि
षु स्थाप्य न्यस्तांगं मां प्रपूजयेत् २३

नादांतेसिद्धभावितां प्रणवस्य अकारोकारमकारविंदुनादः पंचांशाः तन्नादांते सिद्धैर्ध्यातां तथा च श्रुतिः यो वेदादौ स्वरः प्र
तिष्ठितः तस्य प्रकृतिलीनस्य यः परः स महेश्वरः २२ तयात्मभूतया स्वेनैव भावेन चिंततया अमृतमयेन पिंडे दीपेनेव प्रभ
या गृहमिव व्याप्ते सति तस्मिन्नेवाहे मानसैरुपचारैः संपूज्य तन्मयः सन्नर्चादिष्वावाह्य स्थापनमुद्रया स्थापयित्वा २३

अप्रधिष्ठानभेदेन प्रधानोपचारमाह सार्धेन कृत्वा जीतं तत्तविन्यासः यथास्थानमंग प्रधानदेवतानां तत्तन्मंत्रैः स्थापनं १९ अ
मर्हणां उपस्थानां चा स्तिनादिभिस्तु परांस्तिायननं सर्वत्र साधारणं माह अञ्जयेत १७ १८ एवमधिकारादिव्यवस्था
मुक्त्वेदानीं पूजाप्रकारमाह शुचिरिति संभृतो संभारा: पूजासाधनानियेन सः प्रागेव संतसंभारो सन्नासीनः नेवासीनः

स्नानालंकरणं प्रेष्ठमर्चयामेव तु भव स्थंडिले तत्वविन्यासो वन्हावाज्यप्लुतं हविः १६ सूर्ये चाभ्यर्ह
णां श्रेष्ठं सलिले सलिलादिभिः श्रद्धयोपहृतं प्रेष्ठं भक्तेन मम वार्यपि १७ भूर्यप्यभक्तोपहृतं न मे
तोषाय कल्पते गंधो धूपः सुमनसो दीपोन्नाद्यं च किं पुनः १८ शुचिः संभृतसंभारः प्राग्दर्भैः
कल्पितासनः आसीनः प्रागुदग्वार्चेदर्चायां त्वथ संमुखः १९ कृतन्यासः कृतन्यासां मदर्चां पा
णिना मृजेत् कलशं प्रोक्षणीयं च यथावदुपसाधयेत् तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव
च: २०

सन्नद्ध्वा तत्तत्संभारार्थं वारं न निषेधति इत्यर्थः प्राङ्मुख उदङ्मुखो वा प्रासीनः अर्चायां तु स्थिरायां संमुखः अर्चाभिमुख उप
विष्ट सन् १९ पूजनं तरंगर्वादि नमस्कारपूर्वकं यथोपदेशं स्वस्मिन् कृतन्यासः कृतो मूलमंत्रन्यासो यस्यां तां मम अर्चां पाणिना
मृजेत् निर्माल्याधपकर्षणादिना शोधयेत् कलशं पूर्णकुंभं प्रोक्षणीयं प्रोक्षणीयोदकपात्रं उपसाधयेत्
वंदनापुष्पाद्यैः दिभिः संकल्पयेत् तदद्भिः प्रोक्षणीयाद्भिः देवयजनं देवपूजास्थानं २० २० २०२० २०२०

किंच संध्योपासनादीनिकर्म्माणि वेदेनचोदितानि संकल्पेन विहितानियस्मृत्यानितैः सहमेपूजांकुर्यात् नतुता
निपरित्यज्यैतदपि सम्यक् परमेश्वर विषयसंकल्पो यस्य तथाभूतः सन्कर्मनिर्हारिणीं ११ अर्चाभेदानाह शै
लीन शैलीशिलामयीलोहीसुवर्णादिधातुमयीलेप्याम्लेपनात्मिकी हृदि पूजायांमनोमयी १२ प्रकारभेदमाह
द्वस्येमिति प्रतिष्ठाप्रतिमैव जीवस्यभगवतोमंदिरं द्विधाप्रतिष्ठाचाचलान्यासोनभगवन्मंदिरंभवतीति प्रतिमा
भेदेनविशेषमाह सार्द्धेन उद्वासो विसर्जनं १३ अस्थिरायामर्चनेविकल्पः आवाहनंकुर्यान्नवा संस्कृतायांकु

संध्योपास्यादिकर्म्माणिवेदेनाचोदितानिमे पूजांतैःकल्पयेत्सम्यक्संकल्पःकर्मपावनीं ११
शैलीदारुमयीलोहीलेप्यालेख्याचसैकती मनोमयीमणिमयीप्रतिमाष्टविधास्मृता १२ च
लाचलेतिद्विविधाप्रतिष्ठाजीवमंदिरं उद्वासावाह्नेनस्तःस्थिरायामुद्धवार्चने १३ अस्थिरायां
विकल्पःस्यात्स्थंडिलेतुभवेद्द्वयं स्नपनंत्वविलेप्यायामन्यत्रपरिमार्जनं १४ द्रव्यैःप्रसिद्धैर्म
द्यागःप्रतिमादिष्वमायिनः भक्तस्यचयथालब्धैर्हृदिभावेनचैवहि १५ श्रीरामचंद्रः

र्यात् अन्यत्रकुर्याद्ध्यानवेति अविलेप्यायांमृन्मयलेख्यव्यतिरिक्तायां अन्यत्रविलेप्यायांलेख्यायांच
परिमार्जनमेव शिवचनंकुर्यात् १४ इदानींसकामनिष्कामभेदेनविशेषमाह द्रव्यैरिति प्रकर्षेणसिद्धैःसु
शोभनैः अमायिनोनिःकामस्यभक्तस्यतुयथालब्धैःपत्रचंदनादिसर्वथानलभ्यतेतत्र हृदिभावेनभावेन
भावनया वा हृदिमद्यागः तदाभवनमयेर्द्रव्यैरित्यर्थः १५ श्रीगरो०
य

भा०१०

उद्धवस्तु नारविशेषतः प्रश्नः आराधनात्मकचतुर्भिः एतत् वर्णानां निःश्रेयस्करं वदंति अंगिरसः सुतो बृहस्पतिः २ निः
सृतं तव मुखपद्माच्च मितस्य देवी पार्वती ३ सर्ववर्णानां त्रैवर्णिकानां ४ विश्वेश्वरा ये तेषामीश्वरः ५ कर्मकांडस्य

१२७

पूजाविधानस्य नास्त्यंतो ग्रंथतः पारं चानुष्ठानतो यस्य तस्य ६ वैदिक एव मंत्रो वैदिकान्येवं चांगानि च
यस्मिन् पूजायां स तादृशः स वैदिकः एवं तांत्रिकोऽपि मिश्रो व्याख्यातः दाद्दिः मखः पूजा ७ यदा त्रैवर्णिको यजेत् तदा वि

एतद्वदंति मुनयो मुहुर्निःश्रेयसं नृणां नारदो भगवान् व्यास आचार्योंगिरसः सुतः २
मेरु ४
निःसृतं ते मुखांभोजाद्यदाह भगवानजः पुत्रेभ्यो भृगुमुख्येभ्यो देव्यै च भगवान् भवः ३
एतद्वै सर्ववर्णानामाश्रमाणां च संमतं श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद ४ एत
त्कमलपत्राक्ष कर्मबंधविमोचनं भक्ताय चानुरक्ताय ब्रूहि विश्वेश्वरेश्वर ५ श्रीभगवानुवाच
न ह्यंतोऽनंतपारस्य कर्मकांडस्य चोद्धव संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्वशः ६ वै
दिकस्तांत्रिको मिश्र इति मे त्रिविधो मखः त्रयाणामीप्सितेनैव विधिना मां समर्चयेत् ७
यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः यथा यजेत मां भक्त्या श्रद्धया तन्निबोध मे ८
अर्चायां स्थंडिलेऽग्नौ वा सूर्ये वाप्सु हृदि द्विजः द्रव्येण भक्तियुक्तोऽ
र्चेत्स्वगुरुं मामामायया ९ पूर्वं स्नानं प्रकुर्वीत धौतदंतोंगशुद्धये उभयैरपि च स्नानं मंत्रै

एम
१२७

र्मृदग्रहणादिना सह संध्योपास्त्यादीनि कर्माणि वेदचोदितानि मम पूजासु च आचरेत् मंत्रैः १० वैदिकैः तांत्रिकैः प्रणयनैः पूर्वं कुर्यात्

शोधमाह यस्तात्पर्यं मेकाद्दरादि काले स्वनिगमेन स्वाधिकारप्रवृत्तेन वेदेनोक्तं द्विजत्वं उपनयनं ८ अर्चा

किंच यथान्नमेव प्राणिनो जीवनं एवमहमेव यथा शरणं धर्म एव यथा प्रेत्य परलोके वित्तं तथा संत एवार्वाक् संसारता
पाद्बिभ्यतः पुंसः अरणं शरणं ३३ किंच संतश्चक्षूंषि सर्गनिर्गमज्ञानानि चक्षूंषि पुनः सम्यगुत्थितोपि बहिः तद्
एकमेव चक्षुरित्यर्थः ३४ अध्यायार्थमुपसंहरति वैतसेन इति सुद्युम्नभावेनोमावनं प्रविष्टस्य वीतासेना स्त्रीभा
वं प्राप्तस्य पुत्रो वैतसेनः पुरूरवास्ततः एवं प्रकारेणोर्वश्या लोकास्थानाद्ब्रह्मलोकपर्यन्तानिस्पृहस्ततोपि सत्संगा
दपि हेतोर्मुक्तसंगः सन्नात्मारामो भूत्वा पृथ्वीं चचारेति ३५ इति श्रीभागवते एकादशे षड्विंशः २८ सप्तविंशे क्रि

अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहं धर्मो वित्तं नृणां प्रेत्य संतोर्वाग्बिभ्यतोरणं
३३ संतो दिशंति चक्षूंषि बहिरर्कः समुत्थितः देवता बांधवाः संतः संत आत्माहमेव च ३४
वैतसेनस्ततोप्येवमुर्वश्या लोकनिस्पृहः मुक्तसंगो महीमेतामात्मारामश्चचार ह ३५
इति श्रीभागवते महापुराणे एकादशस्कंधे पारमहंस्यां संहितायां भगवदुद्धवसंवा
दे ऐलगीतं नाम षड्विंशोऽध्यायः २८ श्रीउद्धव उवाच क्रियायोगं समाचक्ष्व भवदा
राधनं प्रभो यस्मात्त्वां ये यथार्चंति सात्वताः सात्वतर्षभ १

यायोगः सद्यश्चित्तप्रसादकः सर्वकामाप्तिहेतुश्च संगः प्रोक्तः समासतः १ रागाद्याकुलचित्तानां कुतोऽसंगादिसंभवः
इति कृपार्चनं भक्तजनस्य यापृच्छति २ क्रियायोगमिति भवदाराधनरूपं यस्मादिति कारणाधिष्ठानादिप्र
श्नः सर्वकारणं निमित्तत्वसाविशिष्टत्वात् यथेति कस्मिन्नधिष्ठाने केन प्रकारेणेति प्रश्नः ये अधिकारिणः
सात्वता भक्ताः १

भा०११० १२५

एवमुर्वश्यभिनिवेशं निरूप्य पिता इदानीं तस्य विवेकमाह दशभिः पुंश्चल्येति अयं भावः कर्म्मभिर्देवादिभिः एवमेव प्राप्नो त्यतः परमेश्वरमेव भजेयमिति १५ परमेश्वरप्रसादं विना सैवैतपदिष्ट्या इत्यपि तद्वाक्यान्मोहान निवर्त्तत इत्याह बोधि तस्यापीति देव्या उर्वश्यास्सूक्तवाक्येन यथार्थवचनेन पुंश्चल्या मम एवमामा प्राप्त प्रामात्तानकास्तोऽन्नाशिवासउक्तं नवैस्त्रैणायानि सख्यानि संतीत्यालावुकाः रणं हृदयान्येतासामित्यनेन १६ पूर्वपुंश्चल्या अपहृतं चित्तमित्युक्तं तस्याश्च पकारेऽनुस्मृतः इदानीं ममैवायमपराध इत्याह किमेतयेति नः अस्माकं अनया एतया किमपकृतं न किंचिदपि

पुंश्चल्यापहृतं चित्तं को न्वन्यो मोचितुं प्रभुः आत्मारामेश्वरमृते भगवन्तमधोक्षजं १५ बोधित स्यापि देव्या मे सूक्तवाक्येन दुर्मतेः मनोगतो महामोहो नापयात्यजितात्मनः १६ किमेतया नोऽप कृतं रज्ज्वा वा सर्पचेतसः रज्जुस्वरूपाविदुषो योऽहं यदजितेंद्रियः १७ क्वायं मलीमसः कायो दौ र्गंध्याद्यात्मकोऽशुचिः क्व गुणाः सौमनस्याद्या ह्यध्यासोऽविद्यया कृतं १८ श्रीराम

यथा रज्जुस्वरूपाविदुषो रज्जौ सर्पः पुंसस्तस्याः सर्पकल्पनया रज्ज्वा किमपि नापकृतं तद्वत् यद्यस्माद्योहमे वंभूतः स च अजितेंद्रियस्तस्मादहमपराधीत्यर्थः १७ ननु तथापि सर्वसौगंध्यप्रमादिगुणाः संमोहमत्र जनयंति अतो न अपराध्यते पि स्व मतिपरिकल्पितत्वमेवाह चतुर्भिः क्वायमिति मलीमसः अप्रीतिमलिनः सुमनसा इव सुमनसां गंधः सौकुमार्या दिः सौमनस्याः सौमनस्य मनोभावा १८ राम

१२५

तदेवाहन्नाहमिति अपिनिर्मुक्तः मपिरममायक्रसंगतः प्रपुदितोवासूर्यइति अत्र यथाउर्वश्यावंचिताअतएवखे
द्उत्प्रापिवर्षपंगारणामपिगतासहानिनवेदिति ८ येनसंमोहेनआत्मादेहः क्रीडामृगवत्प्रधीनः
८ ननुप्रणयकुपिताया अत्रजनपर्षमधीनाय तोवसत्यनतत्रतस्तीत्याह सपरिधंराज्यादिसिलिंईश्वरं
ईश्वरंचक्रवर्तीनिनरणामित्यलोयतीमकिप्रत्वगमअप्रनुगतोस्मि १० किंचममप्रभावाद्यमिमानोवथैवेत्याह

नाहंवेदाभिनिर्मुक्तः सूर्योवाभ्युदितोऽमया मुषितोवर्षपंगानांवताहानिगतान्युत ८ अहो
मेआत्मसंमोहोयेनात्मायोषितांकृतः क्रीडामृगश्चक्रवर्तीनरदेवशिखामणिः ९ सपरीछ
दमात्मानंहित्वातृणमिवेश्वरं यांतीस्त्रियंवान्वगमंनग्नउन्मत्तवद्रुदन् १० कुतस्तस्यप्रभावः
स्यात्तेजईशत्वमेववायोन्वगच्छंस्त्रियंयांतीखरवत्पादताडितः ११ किंविद्ययाकिंतपसाकिंत्यागे
नश्रुतेनवा किंविविक्तेनमौनेनस्त्रीभिर्यस्यमनोहृतं १२ स्वार्थस्याकोविदंधिङ्मांमूर्खंपंडित
मानिनं योहमीश्वरतांप्राप्यस्त्रीभिर्गोखरवज्जितः १३ सेवतोवर्षपंगान्मेउर्वश्याअधरासवं
नतृप्यत्यात्मभूः कामोवन्हिराहुतिभिर्यथा १४

कुतस्तस्यमेतेजोवलंखरोयथापादताडितोपिखरीमनुगच्छतितद्वत् ११ एवंभूतस्यसर्वंसाधनंव्यर्थमित्याह किमिति त्यागेनसंन्यासे
नविविक्तेनएकांतसेवया मौनेनवाङ्नियमनेन १२ अकृतप्रतः संन्नात्मानंनिंदतिद्वाभ्यां स्वार्थस्येति अकोविदमज्ञाता
रं गोखरवत्गौरिवखरइवेति १३ अधरासवंसेवमानस्यआत्मभूर्मनो

सिद्धं॰ पुरूरवा ५८ राम

भा०ए० अथेतिहासमाह ऐलःपुरूरवाःसंम्राट्चक्रवर्त्ती वृहच्छ्रवाः कीर्त्तिर्यस्य सः उर्वशीविरहात्प्रथमो मुंह्यन् पश्चात्कु

१२८ रुक्षेत्रेतांसमागम्यगंधर्वदत्तेनाग्निनादेवानिष्ट्वा पुनउर्वशीलोकंप्राप्य शोकापगमेसतिततोनिर्विण्णस्स

न्निमांगाथामगायतेतिनवश्लोकैर्धात्वर्थःसारेणद्रष्टव्यः ४ तस्यप्राक्तनीं मोहावस्थामाह त्यक्त्वेति आत्मानंराजानंतस्य

लाभप्रथवाशाप्यायाः आत्मानंत्यक्त्वा व्रजंतीमन्वगात् घोरेतिष्ठेति अयेजायेमनसातिष्ठ घोरेवचांसिमि

ऐलः संम्राडिमांगाथामगायतवृहच्छ्रवाः उर्वशीविरहान्मुह्यन्निर्विण्णःशोकसंयमे ४

त्यक्त्वात्मानंव्रजंतीतांनग्नउन्मत्तवन्नृपः विलपन्नन्वगाज्जायेघोरेतिष्ठेतिविक्लवः ५ कामा

नतृप्तोनुजुषन्क्षुल्लकान्वर्षयामिनीः नवेदयांतीर्नायांतीरुर्वश्याकृष्टचेतनः ६ ऐलउवा

च अहोमेमोहविस्तारःकामकश्मलचेतसः देव्यागृहीतकंठस्यनायुःखंडाइमेस्मृताः ७

आक्रोशवाक्येहेतु नवोमंत्राणितिष्ठाःसखेवतेमयस्कर्पकरतेचरणाहमित्येवंमंत्रैर्विलपन् ५ वैक्लव्येकारण

माह कामानिति वर्षाणांयामिनी रात्रीः यामिनीः रात्रीः यंतीःअपयांतीः आगामिनीः आकृष्टचेतनायस्य सः राम

६ तस्यगंधर्वलोकंप्राप्तस्यवहुकालमुर्वश्याभोगानंतरंनिर्विण्णस्यगाथामाहाष्टाभिः तत्रानुभिरनु १२८

तापःप्रपंच्यते अहोइति यतोनयाइमेअहोरात्ररूपा आयुःखंडानस्मृताः ७

यद्वृक्षो योगनिष्ठया विघातोऽत्र संगतः साधुसंगेन तन्निष्ठा परा काष्ठेति वराप्यते १ योगिनो योगविभ्रंशाः संग
तः संभवेदिति सर्वथा तन्निवृत्त्यर्थमैलगीतं वितन्यते २ निःसंगो मां भजेद्विद्वान् अप्रमत्तो जितेन्द्रियः सक्तं तत्र विप
त्त्यनर्थे कृत्यपि यद्यन्यजीवन्मुक्तस्यापि तर्हि संगोऽपुवीरस्तस्यानर्थः स्यादित्याशंक्य तान्वाच्यपदर्वकं परिहरति
साद्वीभ्यां मल्लक्षणं मत्स्वरूपं लभ्यते येन तमिमं नरदेहं लब्ध्वा मद्धर्मे भक्तिलक्षणे प्रास्थितः सन् आत्म
स्थं आत्मन्येव नियंतृत्वेन स्थितं परमानंदरूपं मा परमात्मानं मां समुपैति सम्यक् प्राप्नोति १ न चैवंभूतस्यापि विष

श्रीभगवानुवाच मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः आनंदं परमात्मा
नं मात्मस्थं समुपैति मां १ गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया गुणेषु मायो
मात्रेषु दृश्यमानेष्ववस्तुतः वर्तमानोऽपि न पुमान् युज्यतेऽवस्तुभिर्गुणैः २ संगं न कु
र्यादसतां शिश्नोदरतृपां क्वचित् तस्यानुगस्तमस्यंधे पतत्यंधानुगांधवत् ३

यसंगो नामास्तीत्याह गुणमय्येति गुणमय्या जीवयोन्या जीवोपाधिस्तया विमुक्तः गुणेषु वर्तमानोऽपि न तैर्युज्यते सं
गं न प्राप्नोति अत्र हेतुः अवस्तुभिः नन्ववस्तुभिरप्यन्ये युज्यमाना दृश्यंते तत्राह अवस्तुत्वेन दृश्यमानेषु न युज्य
ते २ तथापि संगं वर्जयेदित्याह संगमिति असतां लक्षणमाह शिश्नोदरतर्पयतीति शिश्नोदरतृपस्तेषां क्वचि
त् कदाचिदपि आस्तां तावद्बहूनां संगः किंतु तस्यैकस्याप्यनुगः अनुवर्ती सन् अंधं प्रगनुगच्छतीत्यों

भा० एका० ३

भा०११०

१२२

सत्वसंसेवया प्राप्तिकान्सेवसेवेत पुमान् सत्वविवृद्धये इति प्रागुक्तया नैरपेक्ष्येण उपशमात्मकेन सत्वेनैव एवं सति मां प्राप्नोतीत्याह संपद्यत इति संपद्यत इति सार्द्धेन जीवं जीवत्वकारणं लिंगशरीरं ३५ मां प्राप्तस्य न पुनः संसार इत्याह जीव इति नवाह्यैर्विषयभोगैर्नान्तरः तस्मात्तेन ३६ गुणक्षे

सत्वं चाभिजयेद्युक्तो नैरपेक्ष्येण शांतधीः संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय मां ३५ जीवो जीव विनिर्मुक्तो गुणैश्चाशयसंभवैः मयैव ब्रह्मणा पूर्णो न बाह्यैर्नान्तरश्चरेत् ३६ इति श्रीभागवते महापुराणे एकादशस्कंधे पंचविंशोऽध्यायः २५

तामसर्ससारणप्रथामजितचरणकथाकथनादिभिः धुनुतभक्तिरसेनविवेकिनो नहि पुनः सुरत्नमंजरी घ्ना १ इति श्रीभागवते महापुराणे एकादशस्कंधे भावार्थदीपिकायां टीकायां श्रीधरस्वामिना विरचितायां भगवदुद्धवसंवादे देहनिर्वाणनिरूपणो पंचविंशोऽध्यायः २५

राम

१२२

इदानीमुक्तं त्रैगुण्यप्रपंचस्य संसारहेतुत्वमनुवदंस्तन्निर्जयान्मोक्ष इत्याह एता इति सार्द्धेन येन निर्जिताः सः पश्चाद्विशि-
ष्टेन भक्तियोगेन मन्निष्ठः सन्मद्भावाय मोक्षाय प्रपद्यते योग्यो भवति ३२ तस्माद्विवेकिनामिदमेव युक्तमि-
त्याह तस्मादिति ज्ञानविज्ञानयोः संभवो यस्मिंस्तमिमं नरदेहं ३३ भजनप्रभजन प्रकारमाह निः

एताः संसृतयः पुंसो गुणकर्मनिबंधना येनैते निर्जिताः सौम्य गुणा जीवेन चित्तजाः
भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ३२ तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसं-
भवं गुणसंगं विनिर्धूय मां भजंति विचक्षणाः ३३ निःसंगो मां भजेद्विद्वानऽप्रम-
त्तो जितेंद्रियः रजस्तमश्चाभिजयेत्सत्वसंसेवया मुनिः ३४

संगरहितं सार्द्धेन विद्वान् विवेकी अप्रमत्तः सन् प्रमादरहितः सन् जितेंद्रियः जितानींद्रियाणि येन सः
सत्वसंसेवया रजस्तमसी जित्वा एतादृशः मुनिः संगरहितः सन् मां भजेत् इति ३४ ३४ ३४ ३४ ३४

देहाऽक्रांतित्वालीनाग[illegible]णोत्कर्षफलमाह [illegible] ते [illegible] गा[illegible]तिभा[illegible] तिलयोयेषांते
एवंतमोलयाश्चापिनिर्गुणाइत्यत्रतुलय [illegible] [illegible] देवदत्त [illegible] २२ ज्ञानीगुणो
त्कर्षकृतमेवतत्तत्फलसाधनंकर्मत्रैविध्यमाह मदर्पण त्रि [illegible] फ[illegible] [illegible] भावेनैवकृतंयन्नि
जंकर्मनित्यादितत्सात्विकंफलंसंकल्पतेयत् ममैतत् [illegible] प्रावहि[illegible] [illegible] नि[illegible] [illegible] लंच त्वाद्दिशाद
दंभमात्सर्यादिकृतं २३ ज्ञानीसगुणानिर्गुणभेदेन [illegible] नं त्रैविध्यमाह [illegible] इत्यादि त्यतिदिकाल

सत्वेप्रलीनाः स्वर्यांतीनरलोकंरजोलयाः तमोलयास्तुनरयं यांतिमामेवनिर्गुणाः २२
मदर्पणंनिष्फलंवासात्विकंनिजकर्मतत् राजसंफलसंकल्पंहिंसा[illegible] [illegible] २३ कैव
ल्यंसात्विकंज्ञानंरजोवैकल्पिकंतुयत् प्राकृतंतामसंज्ञानंमन्निष्ठंनिर्गुणंस्मृतं २४ वनंतुसात्वि
कोवासोग्रामोराजसउच्यते तामसंद्यूतसदनंमन्निकेतंतुनिर्गुणं २५ सात्विकःकारकोसंगीरागांधो
राजसःस्मृतः तामसःस्मृतिविभ्रष्टोनिर्गुणोमदपाश्रयः २६ सात्विक्याध्या[illegible] [illegible]कीश्रद्धाकर्म
श्रद्धानुराजसी तामस्यधर्मेयाश्रद्धामत्सेवायांतुनिर्गुणा २७

विवर्मयथैवकात्विकंदेहादिविषयंयत्तज्ज्ञंराजसंप्राकृतंबालमूकादिज्ञानंज्ञानतु[illegible] [illegible] परमेश्वरविषयं २४
वनंविविक्तत्वात्सात्विकोवासःभगवन्निकेतनंतुसाक्षात्तद्दाविर्भावान्निर्गुणंस्थानं २५ कारकः [illegible]कर्त्ताप्यसंगोऽभि
मानरहितः रागांधःअत्यभिनिवेशवान्स्मृतिविभ्रष्टःअनुसंधानशून्यः मदपाश्र[illegible] मय्येवकारणतासहितनिरहं

भा०११०

१२२

पथ्यं हितं परिणामे सुखकारं पूतं शुद्धं अनायस्तं अनायासतः प्राप्तं भोज्यमित्यादि इन्द्रियाणां प्रेष्ठं भोगकाले सुखदं के
अम्ललवणादि आर्तिदं दुःखदं दैन्यकरं अशुचि च शद्वोपहतमन्नं निवेदितं निर्गुणमित्यभिप्रेतं २८ आत्मोत्थं सुखं मद्
ध्यानं लवणादि आर्तिदं दुःखदं दैन्यकरं ... ज्ञानवदेव द्रष्टव्यं २९ उक्तं संसारहेतुमतं त्रैगुण्यमुपसंहरति द्रव्यमिति द्वाभ्यां
याश्रयमित्यपि ... विषयत्वेन ज्ञानवदेव द्रष्टव्यं
द्रव्यं पथ्यं पूतादि देशो वनग्रामादि फलं सात्त्विकं सुखमित्यादि कालः यदा भजेत मां भक्त्या ... सत्त्वजयेत्यादि
नायोऽर्थः उक्तः ज्ञानं केवल्यं सात्त्विकं ज्ञानमित्यादि कर्म मदर्पणमित्यादि कारकः सात्त्विकः कारको ऽसंगीत्यादि
।वे

पथ्यं पूतमनायस्तमाहार्यं सात्त्विकं स्मृतं राजसं चेन्द्रियप्रेष्ठं तामसं चार्तिदाशुचि २८ सात्त्विकं सु
खमात्मोत्थं विषयोत्थं तु राजसं तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयं २९ द्रव्यं देशः फलं का
लो ज्ञानं कर्म च कारकः श्रद्धावस्थाऽऽकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ३० सर्वे गुणमया भावाः पु
रुषाव्यक्तधिष्ठिताः दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ३१

श्रद्धा सात्त्विक्याद्यवस्था जागरणमित्यादि आकृतिः ... ऊर्ध्वं गच्छन्तीत्यादिनोक्ता देवत्वादिरूपा श्रद्धा समतिनिष्ठा सत्त्वे
प्रलीनाः स्वर्यान्तीत्यादिनोक्ता स्वर्गादिः एवं सर्वोऽप्ययं भावस्त्रैगुण्यस्त्रिगुणात्मकः ३० ३१ ... बलमेषस्य किं तया राम
वंतः पुरुषाव्यक्ताधिष्ठितास्ते सर्वे भावा गुणमया एव तत्त्वप्रपंचः दृष्टमिति ३१ जयतिनमः श्रीः १२२

तम: तृतीयमाह क्रोधइति क्रोधोऽसहिष्णुता लोभोऽन्यपराङ्मुखता अनृतमशास्त्रीयप्रमाणमितिभास्कर: । [illegible]
याञ्चा प्रार्थना दम्भो धर्मध्वजित्वं क्लम: श्रम: कलि: कलह: शोकमोहौ प्रसिद्धौ [illegible] वदत्ती इ: सर्वं [illegible]
तद्रूप्राप्राणदमेवं मविपर्यासोऽस्वीकाभी: भयं अधर्मो जाड्यं ४ अत्र पर्वशो क्र [illegible] ता: श्लो [illegible] योतावर्णिता प्राया
अन्यापप्रायाद्यादितिभाव: ५ विभक्तानां गुणानां वृत्तयो वर्णिता: मिश्राणामो [illegible] रु सन्निपा इतित्रि [illegible] मेति
च मतावुक्त सर्ववृत्तिसामानाधिकरण्येन दर्शनात्सन्निपातजत्वं अहंरा तत: कामो क्रो धादि त याम मरांतिरस्कि

क्रोधो लोभोऽनृतं हिंसा याञ्चा दम्भ: क्लम: कलि: शोकमोहौ विषादार्त्ती निद्रालस्यभीरजुधम: ४ सत्व.
स्य रजसश्चैव तारतमस्य श्चान्पर्वश: वृत्तयो वर्णितप्राया: सन्निपातमथो शृणु ५ सन्निपातस्त्वह
मिति ममेत्युद्भवया मति: व्यवहार: सन्निपातो मनो मात्रेंद्रियासुभि: ६ धर्मश्चार्थश्च कामश्च पर
सो परिनिष्ठित: गुणानां सन्निकर्षोऽयं श्रद्धा रतिधनावह: ७

काम: क्रोध इत्यादिद्वयं तत्सर्वं क सर्वोऽव्यवहारश्च संनिपातकार्यमित्याह व्यवहारस्तु इति अत्र हेतु: मनश्च
मात्रा इति अप्रसव आते: मनआदीनां सात्विकतामसराजसत्वात्तैर्व्यवहार: संनिपातज इति भाव: ६ अत्र सो
परस्परयोर्धर्मादिषु परिनिष्ठितो भवति तद्रूप्यं त्रिगुणनिष्ठा रूप: सन्निपातकार्यधर्मादीनां सत्वतमोरज:
कार्यत्वात् विषयत: संनिपातजत्वमुक्तं फलं तश्च्यत पात्रमाह श्रद्धा रतिधना निसत्वरज सो [illegible] नयान्यविहंतीति
तैर्या ७ श्री०

भा० ९३

१२०

धर्मो निष्ठायामेव सन्निपातं दर्शयति प्रवृत्तिलक्षणे काम्यधर्मे यद्वंसो निष्ठा भवति न [illegible] न्यदग्
हाश्रम एवासक्तस्तिष्ठेत् गृहस्थः पश्चात् स्वधर्मे च नित्यनैमित्तिके तिष्ठेत् गुणाना सं[illegible] मप[illegible] न्निपातः
हि यस्मात् काम्यधर्मे गृहस्थसक्तिः स्वधर्मो रजस्तमः सत्त्वमयाश्रयः ८ तदेवेति [illegible] प्रदर्शयन्नं [illegible]
मान्यो न यथा भवेदिति युक्तं तद्दर्शयति पुरुषमिति त्रिभिः ९ १० हिंसां शत्रुमरणादिकं [illegible] जेत् ताम
संविघात् एतैर्गुणैरेवं भूतो भवतीति तात्पर्यार्थः ११ ननु तथापि गुणावेशेन कर्त्ता [illegible]

प्रवृत्तिलक्षणो निष्ठा पुमान् यर्हि गृहाश्रमे। स्वधर्मे चानुतिष्ठेत गुणानां [illegible] य॰ ११ [illegible]
पुरुषं सत्वसंयुक्तमनमीयाच्छमादिभिः कामादिभी रजोयुक्तं क्रोधाद्यैस्तमसा युतं ९ यदा भजति
मां भक्त्या निरपेक्षः स्वकर्मभिः तं सत्त्वप्रकृतिं विद्यात् पुरुषं स्त्रियमेव वा १० यदा आशिष आशास्य
मां भजेत स्वकर्मभिः तं रजःप्रकृतिं विद्याद्धिंसामाशास्य तामसं ११ सत्त्वं रजस्तम इति गुणा जीव
स्य नैव मे चित्तजा यैस्तु भूतानां सज्जमानो निबध्यते १[illegible]

[illegible] जीवस्यैव न ममेति नियमः यतो मां भजेत तेषां स्वारम्भ एते तत्राह [illegible] ३ [illegible] ६ ३० [illegible] मप [illegible]
मितिजीवस्यैव नाम कुतः यतश्चित्तजाः जीवोपाधौ चित्ते अभिव्यज्यन्ते [illegible] ३१ राम
पारगा [illegible] मध्ये सज्जमानः [illegible] सज्जमानो गुणा [illegible] १२०
हा नाति विशेषः [illegible] यदा भूतानामपञ्चीकृतानां यत्कार्यं [illegible] इति श्रुते तस्य

तत्स्वमिश्रगुणमिश्रगुणकार्यो रागादर्पदेहो मेनैकगुणो [illegible] [illegible] तारागुणैः अथ
तत्प्रथमं भवेत भास्वतीर प्रकाशार्थं विशदं स्वच्छं शिवं शं [illegible] [illegible] गता [illegible]
नहेतुकत्व तदेतयोर्युक्तेन आदि राजस [illegible] इत्यादिभिश्च १३ [illegible] सत्वं [illegible] संप्रिण [illegible]
तुः चलं प्रवृत्तिस्वभावं कृत संगः स्नुखात्य शसा श्रियाच युज्येत तत्का [illegible] [illegible]

यदेतरौ जयेत्सत्वं भास्वरं विशदं शिवं तदा सुखेन युज्येत धर्मज्ञानादिभिः पुमान् १३ यदा जयेत्तमः
सत्वं रजः संगं भिदा चलं तदा दुःखेन युज्येत कर्मणा यशसा श्रिया १४ यदा जयेद्रजः [illegible]
मूढं लयं जडं युज्येत शोकमोहाभ्यां निद्रया हिंसयाशया १५ यदा चित्तं प्रसीदेत इंद्रियाणां च
निर्वृतिः देहेऽभयं मनोऽसंगं तत्सत्वं विद्धि मत्पदं १६

युज्यते द्वितीयादेभयं भवतीत्यस्ते चलहेतुतात कर्मणा च युज्यते १४ यदा रज सत्वं च कर्म भर्तं तम
मूढं विवेकभ्रंशं लयं प्रावरणात्मकं जडं घनमात्मकं अतो [illegible] शोकमोह हिंसाभि [illegible] आशया
उत्साहघमात्मावेन केवलमाशया युज्येतेति दृष्टंजन इति पाठे लयात्मक तमेवा [illegible] मोहेः १५ किंच
यदा चित्तं प्रसीदेत स्वच्छं भवेत निवृत्तिरूपरतिः तत्र हामत्पदं मदुपलब्धिस्थानं सत्वं [illegible] १६

यदा कुत क्रियया विकुर्वन् विकारं प्राप्नुवन् अधीर्भवति आसमंतादिक्षिप्ताधीर्वं [illegible] सः तेतसंबंधींद्रियाणां
अनिवृत्ति स्वस्वविषयेभ्यो विक्षिप्तं तं गात्राणि कर्मेंद्रियाणि तेषाम स्वास्थ्यं विकाराधि [illegible] लोचनं [illegible] वलं रजउ
त्कटं निशामय जानीहि १७ यदा सीतिरो भवत् चेतसो ग्रहणे चित्तत्कारणं [illegible] सत्त्वितं विलीये
तमनोपि कं कल्पात्मकं नवंलीनं तमो ज्ञानं ग्लानि र्विषादश्च भवति तत्तदा तमउत्कटं [illegible] रविद्धि १८ किं
च एधमान इति इंद्रियाणि एव निर्वृत्ति प्रवृत्तिमोहस्वभावानि ह्वास [illegible] सिद्ध इति नेद [illegible] का संगादधि देव

विकुर्वन् क्रियया धीरनिवृत्तिश्चापि चेतसां गात्रास्वास्थ्यमन्नो भ्रांतं रज [illegible] र्निशामय १९
सीदच्चित्तं विलीयेत चेतसो ग्रहणे क्षमं मनो नष्टं तमो ग्लानिस्तमस्तदुपधारय [illegible] एधमानेन
गुणेन सत्त्वे देवानां बलमेधते असुराणां च रजसि तमस्युत रक्षसां [illegible]
विधाद्रजसा स्वप्नमादिशेत् प्रस्वापं तमसा जंतोः सुरीयं त्रिषु संततं २० उपर्युपरि गच्छं [illegible] निःसत्वे
न ब्राह्मणा जनाः तमसाधोध आमुख्यादज्जसा [illegible] नैतरे [illegible]
विकानां गुणानां मनामु त्कर्षकार्याणि आह ज्ञानी [illegible] १९ [illegible] स्थाने द्वाव [illegible] सादिति प्रसंगा
न्निर्गुणावस्थामाह तुरीयं चतुर्थं मवस्थां [illegible] रनामानि जाग [illegible] ततं २० नकेवलं तत्तमेवेसर्थः
२० गुणेन कार्य कारणात्व कर्मफलनिःसंगः [illegible] र्थी [illegible] [illegible] श्रीरामे [illegible] गुणादीति
पार्श्वब्रह्मलोकम् [illegible] भिन्नापोतर्थः आह [illegible] मवति २१